अखिल भारतीय 'गीता पुरस्कार' प्रतियोगिता में हरियाणा शासन द्वारा
'प्रथम' पुरस्कृत

सेतुबन्धम्

(नाटकम्)

हिन्दीभाषानुवादोपेतम्

रचनाकार :—

गोस्वामी बलभद्रप्रसाद शास्त्री

एम० ए०, साहित्याचार्यः, साहित्यरत्नम्

साहित्य निकेतन, बरेली

प्रकाशिका :
विमला गोस्वामी
35-A/9 E, रामपुर बाग, बरेली ।

(केन्द्रीय शिक्षा मन्त्रालय नई दिल्ली द्वारा प्रदत्त वित्तीय सहायता से मुद्रित)

सर्वाधिकार सुरक्षित

प्रथम संस्करण १०००

प्रकाशन तिथि : दिसम्बर २१, १९७८

मूल्य :—

वितरक :—साहित्य निकेतन
सुभाष मार्केट, बरेली ।

मुद्रक : विशाल प्रिन्टिंग वर्क्स
नैनीताल रोड, बरेली ।

अनुक्रमणिका:

कथामुखम्	
प्रथमाङ्कः	१—१६
द्वितीयाङ्कः	१७—३२
तृतीयाङ्कः	३३—५२
चतुर्थाङ्कः	५३—६४
पञ्चमाङ्कः	६५—८०
षष्ठाङ्कः	८१—९४
सप्तमाङ्कः	९५—११२
अष्टमाङ्कः	११३—१२९
नवमाङ्कः	१३०—१४२
दशमाङ्कः	१४३—१६२

नाटकान्तर्गत - पात्रपरिचयः

१.	सूत्रधारः	नाटक प्रस्तावकः
२.	नटी	सूत्रधार पत्नी
३.	रामः	दाशरथिः
४.	लक्ष्मणः	रामानुजः
५.	सीता	राम पत्नी
६.	अगस्त्यः	प्रसिद्धर्षिः
७.	दुर्मुखः	रावण गुप्तचरः
८.	विल्वलः	मायाविराक्षसः
९.	सूर्पणखा	रावणस्वसा
१०.	सत्यव्रतः	ऋषि कुमारः
११.	प्रियव्रतः	ऋषि कुमारः
१२.	अकम्पनः	रावणसेनापतिः
१३.	माल्यवान्	रावणस्यामात्यः
१४.	मारीचः	प्रसिद्धोराक्षसः
१५.	पान्थः	चित्रकूट पथिकः
१६.	तापसः	पंचवटी सेवकः
१७.	हनुमान्	प्रसिद्धो रामभक्तः
१८.	सुग्रीवः	किष्किन्धा स्वामी
१९.	रावणः	लङ्केश्वरः
२०.	मन्दोदरी	रावणभार्या
२१.	मदनिका	मन्दोदरी-सखी
२२.	विभीषणः	रावणानुजः
२३.	अङ्गदः	वालि पुत्रः
२४.	जाम्ववान्	ऋक्षराजः
२५.	त्रिजटा	राक्षसी

कथा-मुखम्

बुधैः प्रशस्ता विविधैः कृतिद्वयी, पुरस्कृता चापि यथा मनीषिभिः ।
अनेन सम्यक् सुरगीःसमर्चना-विधौ कवित्वं स्फुटितं कवेरपि ॥१॥

तथा हि रामस्य चरित्र-चित्रितं, विशुद्धसन्मानवमान्यतान्वितम् ।
प्रणम्य श्रद्धावनतस्तमीश्वरं, लिखाम्यहं नव्यदृशात्र नाटकम् ॥२॥

त्रिलोकवन्द्यं चरितं यशस्विनो, सुगीतकीर्ते रघुवंशजन्मनः ।
बुधा रसज्ञाः कवयो महर्षयः, प्रगीय याता निजनामवन्द्यताम् ॥३॥

अजोऽप्यसौ निर्गुण ईश्वरः सतां, हिताय धर्माभ्युदयाय सर्वदा ।
पुनः पुन र्बद्ध इव स्वमायया, करोति कृत्यान्यवतीर्य देहिनाम् ॥४॥

चरित्रमेतत् पुरुषोत्तमस्य वै, धरावतीर्णस्य विभोरजन्मनः ।
गृहे गृहे रामकथाभिरन्वितं, बिभर्ति सद्धर्मलतां जगत्-त्रये ॥५॥

महोदयस्यास्य चरित्रकीर्तनै, र्धरावतीर्णस्य जनोपकारिणः ।
स्व जीवनं जन्म कुलं पवित्रयन्, करोति लोकः स्वपथप्रदर्शनम् ॥६॥

युगे युगे यस्य कथा-पयस्विनी. निमज्जतोऽपावयताखिलान् जनान् ।
गुणानुवादान् पुरुषोत्तमस्य वै, समुत्सहे गातुमनाविलानहम् ॥७॥

'पुराणमित्येव न साधु' पश्यता, चरित्रमार्यस्य मया मनस्विनः ।
मनुष्यसामान्यगुणैः समन्वितं, समीक्षितं तर्कदृशाप्यलौकिकम् ॥८॥

आर्याणामिह हिंसकाक्रमणतो भीता दिशं दक्षिणाम् ।
या आर्येतरजातयो बहुविधाः शान्ताः प्रयाताः पुरा ।
रामो धर्मसमन्वयस्य च तयोः संवर्धयन् प्रक्रियाम् ,
सेतुं संस्कृतिमध्य एवमकरोत् तन्निर्मितं नाटके ॥९॥

छन्दो भङ्गेऽपि शक्ति-प्रवणरसभरो यत्र शब्द-प्रयोगः,
श्लोके बद्धः स्वभावात् स्वयमिह रचनाप्रक्रिया-संविधाने ।
अन्यत्रापि क्वचिच्चेत् सहजकविमनोभावभूमौ प्ररूढा-
दृश्यन्ते काव्यदोषा अवनतशिरसा स्वीक्रियन्ते मया ते ॥१०॥

यथा रामेण विहित, आर्यानार्येषु तादृशः ।
काव्यक्षेत्रे समाजेऽपि कुर्यात् सोऽद्य समन्वयः ॥११॥

कवि परिचयः

प्रज्ञावलामर्जित गौरवाणां, गोस्वामिनां वंशवरे वरेण्यः ।
अभूच्छिवाराधनसिद्धकामः, शैवाग्रगण्यो बलदेवनामा ॥१॥

गौरवशाली प्रशंसावान् गोस्वामियों के श्रेष्ठ कुल में शिव की आराधना से सिद्धकाम शैवाग्रगण्य श्रेष्ठ बलदेव नामक व्यक्ति हुए ।१।

तीर्थे मतामर्चितपादपीठे, ग्रामे सकाहेति वसन् मनस्वी ।
लेभे चतुर्वर्गफलस्वरूपान्, वंशप्रदीपांश्चतुरात्मजान् सः ॥२॥

अर्चित पादपीठ वाले सत्पुरुषों के शैवतीर्थ 'सकाहा' ग्राम-निवासी उस मनस्वी के चतुर्वर्गफलस्वरूप वंशप्रदीप चार पुत्र हुए ।२।

ज्यायानसौ तेषु धिया वरीयान्, गोविन्दनामा यशसा महीयान् ।
भिषग्वरो यः स्वगुणैरुदारै– र्जने – जनेऽभूद् बहुमानपात्रम् ॥३॥

उनमें बुद्धि में श्रेष्ठ, ज्येष्ठ, यश से सम्मानित गोविन्द नाम वाले वैद्यवर हुए जो अपने उदार गुणों से जनता में बहुसम्मान–पात्र थे ।३।

पुरारिमाराधयतोऽस्य गेहे, भार्या सती देवगणप्रसादात् ।
असूत सूनुद्वयरत्नमार्या, काले फलं सत्कृतिवत् कवीनाम् ॥४॥

शिव की पूजा करते हुए उनके गृह में देवगणों के प्रसाद से सती पत्नी ने समय पर दो पुत्र रत्न पैदा किए जिस प्रकार कवियों की सत्कृति समय पर फल उत्पन्न करती है ।४।

सोऽयं तयोर्ज्येष्ठतरः कवीनां, पादानुगामी बलभद्रनामा ।
गुरोः प्रसादाद् गिरमुद्गिरन्तीं, श्लोकैः समाबध्य कवित्वमाप ॥५॥

उनमें से ज्येष्ठ, कवियों के चरणानुगामी, बलभद्र नाम वाले ने गुरु के प्रसाद से निकलती हुई वाणी को श्लोकों में बाँध कर कवित्व प्राप्त किया है ।५।

गीर्वाणवाणीं स्वकुलानुरूपा– मधीत्य विद्यामपि दास्यवृत्तिम्
स्वीकृत्य खण्डस्य विकाससेवा– विकारिणः कृत्यमसौ करोति ॥६॥

अपने कुल के अनुरूप संस्कृत भाषा को पढ़कर भी दास्यवृत्ति स्वीकार करके वह खण्ड-विकास-अधिकारी का कृत्य कर रहा है ।६।

शुद्धि-पत्रम्

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
६	१	श्रण्वन्तु	शृण्वन्तु
११	१४	पश्यन्त्यार्यविरा	पश्यन्त्यार्यवरा:
१५	१०	गमययन्तु	गमयन्तु
२३	८	तो	तप्ते
२७	१४	नेप	नैष
३३	४	तीव	तीव्र
३३	४	श्रमम	श्रमम्
३४	१६	भ्रातृणामं	भ्रातृणाम्
३७	१	माल्यवन्	माल्यवान्
३७	५	नासाछेदनं	नासाच्छेदनं
४२	८	विरोधत्व	विरोधस्त्व
४४	१	अकम्पन्	अकम्पन
४५	१५	क्रिया	क्रिया
५६	१४	निघ्ननत्यपि	निघ्नन्त्यपि
५४	६	वयजेन	व्याजेन
	१८	तमा	तथा
		मख	मुख
	१६	क्रया	क्रिया
		निन्दनीव	निन्दनीय
५६	८	रूपेता	रुपेता
५७	१	यत्रा	यथा
	८	समुत्कण्ठितै	समुत्कण्ठनं
५९	१५	भयात्	भूयात्
६१	६	मातर	मात:
	१३	धर्मं:	धर्मः
	१५	बिना	विना
६३	५	मातर	मास:

पृष्ठम्	पंक्तिः	अशुद्धम्	शुद्धम्
६२	१६	क्षितियते	क्षितिपते
		लक्षमणो	लक्ष्मणो
७२	१	सठः	शठः
७३	५	रामोऽप्यपि	रामोऽप्यापि
८०	३	सुग्रीय	सुग्रीवाय
८४	१	सुविचारितां	सुविचारितं
९१	४	ये	मे
९३	१३	मुखामिः	मुखाभिः
९९	६	ऽस्मि	ऽसि
	१४	रह बंहु	रहं वहु
१०१	११	विह्रत	विहित
१०४	१०	धर्मस्यध्र्ना	धर्मस्याधुना
१०५	१०	भीषयति	भीषयसि
१०६	१३	रेस्यति	रेप्स्यति
११२	१०	चूणा	चूडा
१२०	६	शन्तं	शान्तं
१३०	३	श्रान्त	श्रान्तं
	४	मध्याह्निक	मध्याह्निकं
	११	व्रिजेतव्या	विजेतव्या
१३६	२	तेम	तेन
१४०	७	पूवज	पूर्वजै
१४२	१७	यमस्य	यमस्य
१४६	११	समायहि	समायाहि
१४८	५	सु: दुखिनः	सुदुःखितः
	६	धनुधरः	धनुर्धरः
१५०	४	राक्षसा	राक्षसा
१५४	९	पादयो	पादयो

प्रथमोऽङ्कः

प्रस्तावना

सिद्धिं बिभर्ति सहजप्रतिभाप्रगल्भां
यस्याः कृपापरिणतिः प्रणतस्य पुंसः ।
दिव्य-प्रभापरिगता शरदिन्दुकान्ता,
रङ्गं प्रसादयतु साद्य सरस्वती नः ॥१॥

शान्तस्याप्यार्यबन्धोः पुलिनपरिसरे दर्भशय्यास्थितस्य,
दर्पध्वस्तां समीक्ष्य प्रबलरिपुपुरीमार्गदानाभियाञ्चाम् ।
उद्यत्-कोदण्ड-चण्ड - प्रलयघनतडिद्व्योम - विभ्रत्-स्फुलिङ्गः,
पायादुद्दामताप-क्वथितजलनिधी रामनाराचवह्निः ॥२॥

इति नान्दी

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—अलमति प्रसङ्गेन । तदत्र वयं विदुषो बलदेवपौत्रस्य गोविन्दसूनोर्विचक्षण-कवेराचार्य-बलभद्रस्य गोस्वामिनोऽभिनवं नाटकम-

---

जिसकी कृपा का फल विनयशील पुरुष के लिए जन्मजात प्रतिभा से प्रौढ़ सिद्धि को प्रदान करता है, दिव्य-प्रभा से युक्त तथा शरद-चन्द्र के समान कान्त, वे सरस्वती आज हम लोगों के रंगस्थल को प्रसन्नता से परिपूर्ण कर दें ॥१॥

समुद्र के किनारे कुशासन पर शान्त बैठे हुए आर्य बन्धु राम की, प्रबल शत्रु रावण की पुरी में जाने के लिए मार्ग दान की याचना को गर्व से निरस्त समझ कर, उठाये हुए धनुष से प्रलय के बादलों की प्रचण्ड बिजलियों के समान, आकाश में स्फुलिङ्ग बिखेरती हुई, उद्दाम ताप से समुद्र को उबाल देने वाली राम के बाण की अग्नि हम सब की रक्षा करें ॥२॥

इति नान्दी

(नान्दी के पश्चात् सूत्रधार का प्रवेश)

सूत्रधार—विषय को अधिक बढ़ाने से क्या लाभ ? हम तो यहां पर श्री बलदेव के पौत्र तथा गोविन्द के पुत्र विद्वान् विचक्षण कवि आचार्य बलभद्र गोस्वामी के अभिनव नाटक का अभिनय करने के लिए उपस्थित हुए हैं । सहृदय दर्शक जनों

भिनेतुं प्रस्तुताः स्मः । सहृदयाभिरूपदर्शकवृन्द भूयिष्ठेयं परिषद् दृश्याभिनय-समीक्षा प्रवीणा वर्तते । तदतीव मे मनसः समानन्दनं समापद्यते यतः—

नाट्यकलासु धुरीणा अभिनयकुशला यदाभिनेतारः ।
सभ्या रस मर्मज्ञाः सफलं तन्नाटकं मन्ये ॥३॥

तदेषाद्य परिषद्—

अनघं रामचरित्रं, नूतनदृष्ट्या समीक्षितं कविना ।
पश्यतु प्रियमभिनीतं सरसं नाट्य-प्रबन्धेन ॥४॥

तदेतत् कृते गृहं गत्वा गृहिणीमाहूय संगीतकमनुतिष्ठामि । (परिक्रम्य दूरं विलोक्य) अहो ! मे स्नेहमयी यशस्विनी गृहिणी मोदकपात्रहस्तेयभित एवाभिवर्तते, तत्सफलमद्यतनमनुष्ठानम् ।

नटी—(प्रविश्य) जयत्वार्यपुत्रः ।

सूत्रधारः—प्रिये ! अपि नाम किञ्चिदद्य रसान्वितमनुष्ठानमनुष्ठितमथवा कश्चिन्मधुरोत्सवो वर्तते, यदिमे मधुराः प्रसादपरा मोदका मदर्थमानीताः ।

नटी—आर्यपुत्र ! शीतलमन्दसुगन्धसंप्लावितजनमानसान् सुखदानिमान् मधुमासदिवसान् कथं नाम विस्मरसि !

से सुशोभित यह परिषद्, दृश्याभिनय समीक्षा में प्रवीण है, अतः यह मेरे मन को अत्यन्त आनन्दित कर रही है, क्यों कि—

मैं तो उसी नाटक को सफल मानता हूँ, जिसमें अभिनेतागण नाट्य कला में निपुण तथा अभिनय कुशल हो और दर्शक सभासद् रस के मर्मज्ञ हों । ॥३॥

इसलिए यह परिषद् आज—

कवि द्वारा नूतन दृष्टि से समीक्षित और नाट्य प्रबन्ध से अभिनीत, सरस, अनघ रामचरित का दर्शन करें । ॥४॥

अतः इसके लिए मैं गृह जाकर, गृहिणी को बुलाकर संगीत का अनुष्ठान करता हूँ । (चलकर और दूर देखकर) अरे ! मेरी स्नेहमयी, यशस्विनी गृहिणी तो हाथ में मोदक-पात्र लिए इधर ही आ रही है । तब तो आज का अनुष्ठान सफल हो गया ।

नटी—(प्रवेश करके) आर्यपुत्र की जय हो !

सूत्रधार—प्रिये ! क्या आज कोई रसपूर्ण अनुष्ठान कर डाला है अथवा कोई मधुर उत्सव, जो मन प्रसन्न करने वाले यह मधुर मोदक मेरे लिए लायी हो ।

नटी—आर्यपुत्र ! क्या आप शीतल, मन्द सुगन्ध से जनमानस को आप्लावित करने वाले, इन सुखद मधुमास के दिनों को भूल गये हो—

पुष्पितललितपलाशं दिशि दिशि गुञ्जद्द्विरेफझङ्कारम् ।
कूजत्कोकिलवृन्दं, कन्नानन्दयति मधुमासम् ? ॥५॥

सूत्रधारः—तदयि मदनपालिके ! वसन्तेऽस्मिन् मधुमासे किमर्चितस्त्वया मदनपीडाप्रदायको भगवान् विषमशरः ?

नटी—आर्यपुत्र ! न खलु मया विषमशरोऽसौ मदनोऽभ्यर्चितः । मया तु—

दशकण्ठकठोर-कण्ठ-भेद-प्रभवोद्दाम-यशोभराभिरामः ।
समराभिमुखेऽरिसूदनोऽसौ विषमेषुर्हि समर्चितोऽद्य रामः ॥६॥

अपि नामाद्य रामनवमी विस्मृतार्यपुत्रेण ?,

सूत्रधारः—आम् ! ज्ञातं यदद्य पुरुषोत्तमस्य भगवतो राघवेन्द्रस्य जन्म-दिवसः । गुणाढ्ये ! कृतमेतत् शोभनं नाम तदत्र किं विप्रा अप्यामन्त्रिताः ?

नटी—कीदृशमामन्त्रणम् । कथञ्चित् महत्प्रयासेन स्वल्पोलब्धघृत शर्करादिमिश्रणेन निरन्ना इमे व्रतार्थं मोदका निष्पादिताः । यतो हि—

आपणेषु महार्घत्वं वस्तूनामिह विद्यते ।
तस्कराः कृत्रिमाभावे लुण्ठन्ति वणिजो जनान् ॥७॥

जिसमें ललित पलाश पुष्पित हो रहे हैं, दिशाओं में भ्रमर गुञ्जार कर रहे हैं और कोकिला - समूह अपनी मधुर तान सुना रहा है, ऐसा यह मधुमास किसे आनन्दित नहीं करता ? ॥५॥

सूत्रधार—अरे मदनपालिके ! तो क्या इस मधुमास वसन्त में तुमने मदन पीडा प्रदायक भगवान विषमशर कामदेव की पूजा कर डाली ।

नटी—नहीं आर्यपुत्र ! मैंने विषमशर कामदेव की पूजा नहीं की है—

मैंने तो आज दशकण्ठ के कठोर कण्ठों को काटने से उत्पन्न महान यश से शोभायमान, युद्ध में शत्रु को मारने में विषमशर वाले राम की अर्चना की है । ॥६॥

आज रामनवमी है । क्या आर्यपुत्र भूल गये ?

सूत्रधार—हाँ जानता हूँ, आज पुरुषोत्तम भगवान् राघवेन्द्र का जन्म दिन है, गुणाढ्ये ! यह तो बहुत अच्छा किया । तो क्या आज ब्राह्मण भी निमन्त्रित किये हैं ?

नटी—कैसा आमन्त्रण ? किसी प्रकार बड़े प्रयत्न से प्राप्त थोड़े से घी शक्कर आदि के मिश्रण से व्रत के लिए अन्न - रहित यह मोदक बनाये हैं, क्यों कि—

यहाँ दुकानों पर वस्तुओं की बहुत तेजी है । तस्कर व्यापारी कृत्रिम अभाव से लोगों को लूट रहे हैं । ॥७॥

तत्कथमस्मिन्नभावे महोदरपूरणक्षमा विप्रभोजन व्यवस्था सम्भाव्यते ।

सूत्रधारः—अहो ! सत्यम्—

शर्कराघृत तैलान्नभोज्याभावैश्च कृत्रिमैः ।
भोजनस्य व्यवस्था वै दानवैः कठिनीकृता ॥८॥

तथापि प्रिये प्रशासनमितो दत्तावधानं वर्तते । शीघ्रमेतेषां कृते कठोरदण्डव्यवस्था विधास्यते ।

नटी—आर्यपुत्र !

न केवलं शासनमेव दत्तावधानमत्रापि भवेत् समाजः ।
द्वयोर्व्यवस्था जनताभिशापं समूलमुन्मूलयितुं प्रशक्ता ॥९॥

तदत्र नागरा अपि स्व कर्त्तव्यानुष्ठाने दत्तावधाना भवन्तु ।

सूत्रधारः—चतुरिके ! सर्वत्र ते बुद्धि-चातुरी परिलक्ष्यते । सत्यं, यथा प्रशासनं तथा नाम सर्वे जना राष्ट्रव्यवस्थासम्पादनं प्रतिजानन्तु । भद्रे ! मया तु प्रतिज्ञातम् ।

नटी—आर्यपुत्र ! कीदृशं नाम प्रतिज्ञातम् ।

सूत्रधारः—प्रिये ! तदहम्—

भला इस अभाव में विशाल उदरों को भरने में समर्थ ब्राह्मण भोजन-व्यवस्था कैसे सम्भव है ?

सूत्रधार—अहो ! सच ही—

शक्कर, घी, तेल अन्य भोज्य पदार्थों के कृत्रिम अभाव से इन दानवों ने भोजन की व्यवस्था ही कठिन कर दी है ॥८॥

फिर भी प्रिये ! प्रशासन इधर ध्यान दे रहा है । शीघ्र ही इनके लिए कठोर दण्ड की व्यवस्था की जाएगी ।

नटी—आर्यपुत्र !

केवल शासन को ही नहीं समाज को भी इधर ध्यान देना चाहिए । दोनों की व्यवस्था इस जनता के अभिशाप को समूल नष्ट कर सकती है ॥९॥

अतः नागरिक भी अपने कर्त्तव्य-अनुष्ठान की ओर ध्यान दें ।

सूत्रधार—चतुरिके ! सभी विषयों में तुम्हारी बुद्धि की चतुराई दिखाई देती है ।

सत्य ही जिस प्रकार प्रशासन उसी प्रकार सभी लोग राष्ट्र की व्यवस्था करने की प्रतिज्ञा करें । भद्रे ! मैंने तो प्रतिज्ञा कर ली ।

नटी—आर्यपुत्र ! कैसी प्रतिज्ञा ?

सूत्रधार—प्रिये ! मैंने—

चौरान् लोकविनाशकर्मनिरतानेतांस्तथा लुब्धकान्,
क्षिप्रं ! नाशयितुं समाजसरितो नक्रान् प्रतिज्ञातवान्।
आलोक्याहत-तापसास्थि-निचयानुद्यद् - धनुर्दण्डके,
रामो दाशरथि र्यथैष विपिने रक्ताशनान् राक्षसान् ॥१०॥

(इति निष्क्रान्तौ)

(इति प्रस्तावना)

(ततः प्रविशति दण्डकवने रक्षोभिराहतमुनिजनदेहावशेषास्थिसमूहावलोकनोपजातसंतापतप्तो मुनिजनैः परिवृतः सीतया सह लक्ष्मणानुगतस्तापसो रामः)

मुनयः—(अस्थिसमूहं दर्शयन्तः) इत इतोऽप्यार्यमहाभागा पश्यन्तु नाम। कीदृशी खलु खलानामत्याचारसरणिः।

रामः—(निर्वर्ण्य) अहो ! महत् कष्टं वर्तते। ब्रह्मनिष्ठ-तपस्विजनानामीदृग् विहिंसनं सर्वथाऽसह्यमेव प्रजारक्षाव्रतानामिक्ष्वाकूणाम्। अहो !

रागद्वेषोपरत - चरितान् ब्रह्मलीन - स्वरूपान्,
हन्तुं दान्तान् क्षपितनिखिलस्वाभिमानान् निरीहान्।
शौर्यं हा धिक् ! प्रबलतपसाप्यर्जितं राक्षसानां,
क्षात्रं लोक-प्रथितमवने रक्षणे क्षत्रियाणाम् ॥११॥

लोक-विनाश कार्य में लगे हुए इन चोर, लुटेरों, इन समाजरूपी सरिता के घड़ियालों के शीघ्र विनाश करने की उसी प्रकार प्रतिज्ञा की है, जिस प्रकार दण्डक वन में मारे गये तपस्विजनों के अस्थि-समूह को देखकर यह दशरथ पुत्र राम रक्त पीने वाले राक्षसों को मारने की प्रतिज्ञा करते हैं ॥१०॥

(दोनों चले जाते हैं) (इति प्रस्तावना)

(दण्डक वन में राक्षसों द्वारा मारे गये मुनि जनों के अस्थि समूह को देखने से उत्पन्न संताप से तप्त, मुनि जनों से घिरे हुए, सीता के साथ, लक्ष्मण से अनुगत, तापस राम का प्रवेश)

मुनिगण—आर्य महाभाग ! इधर भी देखिए-दुष्टों का कैसा अत्याचार (अस्थि समूह को दिखाते हुए)

राम—(देखकर) ओ हो ! बहुत ही कष्टकर दृश्य है ब्रह्मनिष्ठ तपस्विजनों की ऐसी हत्यायें प्रजा की रक्षा के व्रती इक्ष्वाकु राजाओं के लिए सर्वथा असह्य है। अहो !

जिनके चरित्र में राग-द्वेष समाप्त हो गया है जिन्होंने अपने को ब्रह्म में लीन कर दिया है, जिन्होंने अपना समस्त अहंकार समाप्त कर दिया है, ऐसे निरीह त्यागी तपस्विजनों को मारने के लिए, तपस्या द्वारा अर्जित राक्षसों के शौर्य को और पृथ्वी की रक्षा में भुवन विख्यात क्षत्रियों के क्षात्र धर्म को भी धिक्कार है ॥११॥

(क्रोधाविष्टो धनुरुद्यम्य) शृण्वन्तु शृण्वन्तु नाम मुनयस्तपस्विनो दण्डकवासिनः । रामोऽयं प्रतिजानाति—

आर्यव्रतान् तपसि योग-समाधि-निष्ठान्
ये तापसानवधिषु विपिने निरीहान् ।
रामोऽयमद्य मुनिरक्तपिपासुकानां
तेषां विनाशन-कृते कुरुते प्रतिज्ञाम् ।।१२।।

कोदण्डचण्ड शरसंधान-संजनितशत्रुभयभूतिभास्वरे सद्धर्म-दीक्षितार्यजन जीवनरक्षाव्रतिनीहागते रामे भवतु नामापदां विरामः । आचरन्तु यज्ञेष्टपूजाविधानं सर्वत्र मुनिजनाः, विचरन्तु नाम निर्भीकाः कन्दमूलफलपुष्पावचयिनो भिक्षाशनास्तपस्विनः । न कुत्रापि दण्डकवने भीति र्भवतु भवताम् । (आकाशे पश्यन्) निरीहमुनिजन-रक्तपिपासुका रक्षः-संस्कृतिसमुद्धारका राक्षसाः !—

बोधयन्तु स्वनेतारमद्य मन्नामकीर्तनैः ।
यद् रामेण जनस्थाने घोषितं लोकरक्षणम् ।।१३।।

मुनयः—अनुगृहीता वयमार्यमहाभागानामाश्वासनेन दर्शनेन च ।

(क्रोधाविष्ट धनुष उठाकर) अरे ! दण्डक वासी तपस्वी मुनिजनों ! सुनो—सुनो—यह राम प्रतिज्ञा करता है—

वन में जिन्होंने, आर्य व्रत धारण करने वाले, तपस्या में योग-समाधिनिष्ठ, निरीह, तपस्विजनों की हत्याएं की है, आज यह राम, मुनियों के रक्त के प्यासे उन (राक्षसों) के विनाश की प्रतिज्ञा करता है ।।१२।।

कोदण्ड पर प्रचण्ड वाण के संधान से ही भयभीत करने वाले, ऐश्वर्य से भास्वर, सद्धर्म दीक्षित आर्यजनों की रक्षा का व्रत लेने वाले राम के इस वन में आ जाने पर, आपदाओं पर विराम लगना चाहिए । अब मुनि जन यज्ञ और इष्ट पूजा-विधान का आचरण करें, कन्दमूल, फल, पुष्प चुनने वाले भिक्षुक, तपस्वी निर्भीक होकर विचरण करें । अब आप लोगों को कहीं भी दण्डक वन में भय नहीं होना चाहिए ।

(आकाश की ओर देखते हुए) अरे ! निरीह मुनि जनों के रक्तपिपासुक, रक्ष-संस्कृति के समुद्धारक राक्षसों ! मेरा नाम लेकर आज अपने नेता को बता दे कि राम ने जन स्थान में लोक रक्षा की घोषणा कर दी है ।।१३।।

मुनिगण—आर्य महाभाग के दर्शन तथा आश्वासन से हम लोग अनुगृहीत

तदत्र प्रतीक्षते भगवानगस्त्यः श्रीमतामागमनं स्वाश्रमे। भवन्मार्ग-दर्शनायैव निर्दिष्टा वयमिहागताः स्मः। तदाज्ञापयन्तु देवाः।

रामः—वयमपि महर्षे र्दर्शनार्थमेवोत्सुका आगच्छामः। तन्मार्गमादेशयन्तु भवन्तः।

मुनयः—इत इतो देवः।

(इति निष्क्रान्ताः सर्वे)

(ततः प्रविशति मुनिमण्डलीभिरावृतः सहागस्त्येनासनं समुपविष्टः सपत्नीकः सानुजो रामः)

अगस्त्यः—आकर्णयन्तु नाम सर्वे मुनिजनाः। यदत्र भवतामार्यकौशलेन्द्र-महोदयानामिहागमनं जातं तेनाद्य कृतार्था खलु वयम्। यदत्र रक्षसामत्याचारेण—

रामः—(मध्य एव निषिध्य) किमत्राख्यानैर्नाम रक्षसामत्याचारसरणेः—यतो हि—

इहागतं हि मामेते मुनीनामस्थिसंचयाः।
जनस्थान-कथामद्य वदन्ति परितः स्वयम् ॥१४॥

तदत्र कृत्यमाख्येयम्!

हुए। भगवान अगस्त्य आपकी प्रतीक्षा कर रहे हैं। हम लोग आपको मार्ग दिखाने के लिए ही यहाँ आये हैं। अतः आप आज्ञा दीजिए।

राम—हम लोग भी महर्षि के दर्शन के लिए उत्सुक, आ रहे हैं अतः आप लोग निर्देश करें।

मुनि—इधर-इधर महोदय!

(सभी जाते हैं)

(मुनि मण्डली से घिरे हुए अगस्त्य के साथ सपत्नीक, भ्राता सहित आसन पर बैठे हुए राम का प्रवेश)

अगस्त्य—सभी मुनिजन सुने। यहाँ जो श्रीमान् आर्य कौशलेन्द्र महोदय का आगमन हुआ है, उससे आज हम सब कृतार्थ हो गये। यहाँ जो राक्षसों के अत्याचार से—

राम—(बीच में ही रोककर) राक्षसों के अत्याचार के सिलसिले को कहने से क्या? क्यों कि—

चारों ओर बिखरे हुए मुनियों के यह अस्थि-समूह, यहाँ आये हुए मुझसे आज स्वयं जनस्थान की कथा को कह रहे हैं ॥१४॥

इसलिए जो करना है, उसे कहिए।

अगस्त्यः—दक्षिणापथे, आर्यानार्यसंस्कृतिसमन्वयकृत्यं बहुकालाद् मयैवानुष्ठितमासीत् तदत्र महती बाधा समुपस्थिता ।

रामः—आम् ! ज्ञायते, रक्षः संस्कृते र्व्यपदेशेन हिंसाभिचारो रक्षसाम् ।

अगस्त्यः—विश्रवसः सुतेन पौलस्त्येन रावणेन रक्षः-प्रचारकैः स्वक्रूरशक्त्या बाधितं मेऽनुष्ठानम् । आर्यसंस्कृतेः प्रतिष्ठापका लोकपाला अनेन बन्दीकृताः । संस्कृतिसमन्वये मया यद्यदाचरित तत्सर्वं विपर्यस्तम् । यतः—

महतोऽप्यार्यधर्मस्य प्रतिष्ठायै महर्षयः ।
अहिंसाव्रतिनोऽरण्ये हिंसिताः क्रूरराक्षसैः ।।१५।।

मुनयः—न केवलं हिंसिताः भक्षिता अपि महोदरैः । भयभीताः प्रचारकाः प्राणान् परित्रातुमितस्ततः पलायिताः । शून्यानि जातान्युटजानि, अनग्नयो यज्ञवेदिकाः, अनर्चिता देवाः, विनष्टानीव नामाश्रमस्थानानि ।

रामः—किमत्राख्यानैः ? अतीव कष्टकरं भवतां वृत्तम् (अगस्त्यं प्रति) महर्षे ! किमनुष्ठितं रक्षसामवरोधाय ?

अगस्त्य—इधर जो दक्षिणापथ में आर्य-अनार्य संस्कृति के समन्वय का कार्य बहुत समय से मैंने ही अनुष्ठित किया था, उसमें बहुत बड़ी बाधा उत्पन्न हो गयी है ।

राम—हाँ ! ज्ञात है, रक्ष-संस्कृति के बहाने से राक्षसों का हिंसा अभिचार ?

अगस्त्य—विश्रवा के पुत्र पौलस्त्य रावण ने रक्ष-संस्कृति के प्रचारकों द्वारा अपनी क्रूर शक्ति से मेरे अनुष्ठान में बाधा डाल दी । आर्य-संस्कृति के प्रतिष्ठापक लोकपालों को उसने बन्दी बना लिया । संस्कृति के समन्वय में मैंने जो कुछ किया था उसने सब उलट दिया । यहाँ तक कि—

महान आर्य-धर्म की प्रतिष्ठा के लिए अहिंसा व्रती महर्षियों को क्रूर राक्षसों ने इस वन में मार डाला ।।१५।।

मुनिजन—केवल मार ही नहीं डाला, महोदरों ने खा भी लिया । भयभीत प्रचारक प्राण बचाने के लिए इधर-उधर भाग गये, झोपड़ियाँ शून्य हो गयी, यज्ञ-वेदिकाओं में अग्नि नहीं जलती है, देवताओं की पूजा नहीं हो पाती और समस्त आश्रम स्थान नष्ट हुए से हो गये हैं ।

राम—आप लोगों का समाचार अत्यन्त कष्टदायक हैं । (अगस्त्य के प्रति) राक्षसों के अवरोध के लिए महर्षि ने क्या किया ।

अगस्त्यः—धर्माचरणप्रसंगे बाधां विलोक्य कूटनीतिप्रसंगो विहित-आसीत् देवराजेन महेन्द्रेण। यथा श्रीमतां राज्याभिषेक भङ्गः तत्सर्वं जानन्त्येव महोदयाः।

रामः—जानीमस्तद् यथा कठोरेऽस्मिन् प्रसङ्गे मे मातुः कैकय्याः स्पृहणीयं त्यागमयं चरित्रम्।

अगस्त्यः—अहो! केकयकुल दुहिता महाराज्ञी कैकयी!

लब्धं नामायशो देव्या पुत्रेणापि तिरस्कृता।
विसोढान्यपमानानि राष्ट्रधर्महिते तया ॥१६॥

रामः—'बहुतरं मात्रा सोढमिति' ज्ञात्वापि पितुर्मत्स्नेहपरवशतां विज्ञाय न किञ्चिदुक्तं केनापि।

अगस्त्यः—सत्यं, नान्यथा पित्रा दशरथेन स्नेहातुरेण भवद्वनगमनाज्ञा साधनीयासीत्। तथापि वयमपराद्धा मातृ-वैधव्येनापमानेन च।

रामः—असहनीयमासीद् मातुर्दुःखम्। चित्रकूटपरिसरे मां विलोक्याधीरा जाता, कथमपि सान्त्वनया सम्भाविता मया। अद्यापि तां न विस्मरामि—सत्यमेव

अगस्त्य—धर्माचरण प्रसङ्ग में बाधा देखकर देवराज महेन्द्र ने कूटनीति की सहायता ली। जिस प्रकार आपका राज्याभिषेक भङ्ग हुआ, वह सब आप जानते ही हैं।

राम—जानता हूँ। इस कठोर प्रसङ्ग में मेरी माता कैकयी का त्यागमय चरित्र स्पृहणीय रहा है।

अगस्त्य—अरे! केकय कुल की पुत्री महारानी कैकयी!

उस देवी ने राष्ट्र-धर्म के हित में अपयश ग्रहण किया, पुत्र से भी तिरस्कृत हुई और अनेक अपमान भी सहन किये ॥१६॥

राम—माता ने बहुत सहन किया है। यह जानकर भी पिता जी की मेरे प्रति स्नेह परवशता समझकर किसी ने कुछ नहीं कहा।

अगस्त्य—सच ही अन्यथा स्नेहातुर पिता दशरथ से आपको वन जाने की आज्ञा नहीं मिल सकती थी। फिर भी माता के वैधव्य एवं अपनान से हम अपराधी हैं।

राम—माता का दुख असहनीय था। चित्रकूट परिसर में मुझे देखकर अधीर हो गयी। किसी प्रकार मैंने सान्त्वना देकर उन्हें शान्त किया। आज भी मैं उन्हें भूल नहीं पा रहा हूँ। सच ही—

वैधव्यहृत-सर्वस्वाप्यपमानव्यथाकुला ।
असह्य-दर्शनेवासीन्मल्लिका तडिदाहृता ॥१७॥

लक्ष्मणः—(साश्चर्यम्) आर्य ! किमिदं सर्वं वनयात्रानुष्ठान-मात्रमासीत् ।

सीता—आर्यपुत्र ! सर्वं ज्ञात्वैव वनवासः स्वीकृतः ?

रामः—आम् ! सर्वं ज्ञात्वैवैतदनुष्ठितम् । आर्यसंस्कृतिध्वंसकाना-मत्याचारज्वालायां प्रज्वलितेऽस्मिन् राष्ट्रे कीदृशो मे यौवराज्याभिषेक-प्रसङ्गः ?

अगस्त्यः—सुविचारितमार्यमहोदयैः ।

रामः—आर्यकौशिकयज्ञविध्वंसकान् निहत्यैव मया दृष्टं, समस्तार्या-वर्त्तमितस्ततो राक्षसाक्रमणेन संत्रस्तं वर्तते । तदैव मया निर्णीतं यदाक्रमण-त्रस्तेऽस्मिन् राष्ट्रे न मे राज्यारोहणम् । यतः—

हिंसकैराहते राष्ट्रे संत्रस्ते जनमानसे ।
राजदण्डं दधानेऽपि, राज्ञि राजन्वती न भूः ॥१८॥

अगस्त्यः—उचितमेव श्रीमतामार्यसंरक्षकाणाम् । इहार्य - प्रसार भीतेन लङ्केश्वरेण दक्षिणापथ-स्वामिना वालिना सहानाक्रमणसहयोगसन्धि-र्विहितः । आर्याणां समर्थकोऽपि बाली सन्धिमेनं स्वीचकार ।

वैधव्य से जिसका सब कुछ हरण हो गया था और अपमान की व्यथा से व्याकुल, वह तडित से आहत मल्लिका लता के समान देखी नहीं जा रही थी ॥१७॥

लक्ष्मण—(आश्चर्य के साथ) क्या यह सब बन-यात्रा का अनुष्ठान मात्र था।

सीता—आर्यपुत्र ! क्या सब कुछ जानकर ही वनवास स्वीकार किया ?

राम—हां ! सब कुछ जानकर ही किया है। आर्य-संस्कृति के ध्वंसकों के अत्याचार की ज्वाला में राष्ट्र के जलते रहते मेरा यौवराज्याभिषेक कैसा ?

अगस्त्य—आर्य महोदय ने ठीक ही सोचा।

राम—आर्य कौशिक के यज्ञ-विध्वसंको को मारकर ही मैंने देखा कि समस्त आर्यावर्त्त यत्र-तत्र राक्षसों के आक्रमण से संत्रस्त हो रहा है। उसी समय मैंने निर्णय किया था कि आक्रमणों से संत्रस्त इस राष्ट्र में मेरा राज्यारोहण नहीं होगा। क्यों कि—हिंसकों द्वारा राष्ट्र के आहत और जनमानस के संत्रस्त रहते राजा के राजदण्ड धारण कर लेने पर भी पृथ्वी राजन्वती नहीं होती है ॥१८॥

अगस्त्य—आर्य-रक्षक श्रीमान् के लिए यह उचित ही है आर्य-प्रसार विरोधी लङ्केश्वर ने दक्षिणापथ के स्वामी बालि के साथ अनाक्रमण सहयोग सन्धि कर ली। आर्यों के समर्थक होते हुए भी बालि ने यह सन्धि स्वीकार कर ली है।

रामः—सत्यं कूटनीति-कुशलोऽसौ लङ्केश्वरः । कीदृशः खलु प्रभावोऽस्य सन्धि-सन्निपातस्य ?

अगस्त्यः—सन्धिव्यपदेशेन रक्षाविधानव्यवस्थया लङ्केश्वरेण अत्र जनस्थाने चतुर्दश सहस्त्रसैनिकैः सेना परिसरो निर्मितः । उत्तरापथाद् वृथा शङ्किना वालिना सर्वमेतत् स्वीकृतम् ।

रामः—तदेष रावणस्य रक्षः-संस्कृति-संवर्धने दूरगामी प्रबन्धः प्रतीयते ।

अगस्त्यः—अनेन न केवलं जनस्थानं समस्तमार्यावर्तमिदानीं लङ्केश-गुप्तचरैः परिव्याप्तं वर्तते ।

रामः—एतदेव कारणं यत्क्वचिदपि विहितमार्यानुष्ठानमेतैराक्रान्तं जायते । सर्वत्र यज्ञधूमेन सहैवैतेषामुपस्थितिः संभाव्यते । तत् कथमेतैरिदानीं वर्तन्ते भवन्तः ?

अगस्त्यः—परिस्थितिं विज्ञायैव व्यवस्था विहिता । तद् यथा पश्यन्त्यार्यवराः—

ऐते केवलमार्य धर्मनिपुणा न श्वेतभिक्षुव्रताः,
विज्ञा कूटकलासु कौशलमिमे कर्तुं समर्था रणे ।

राम—सत्य ही यह लङ्केश्वर, कूटनीति में कुशल है । इस सन्धि का प्रभाव कैसा है ?

अगस्त्य—सन्धि के वहाने लङ्केश्वर ने रक्षा-व्यवस्था के अन्तर्गत इस जनस्थान में चौदह हजार सैनिकों का सैनिक परिसर निर्मित कर दिया है । उत्तरापथ से व्यर्थ शङ्कालु वालि ने यह सब कुछ स्वीकार कर लिया ।

राम—तब तो यह रक्ष-संस्कृति के सम्वर्धन में रावण का दूरगामी प्रवन्ध प्रतीत होता है ।

अगस्त्य—न केवल जनस्थान, समस्त आर्यावर्त्त इस समय इस सन्धि के कारण लङ्केश के गुप्तचरों से व्याप्त हो रहा है ।

राम—यही कारण है कि कहीं भी किया गया आर्यानुष्ठान इनसे आक्रान्त हो जाता है । सभी स्थानों पर यज्ञ धूम के साथ ही इनकी उपस्थिति की सम्भावना हो जाती है । आप लोग इस समय इनसे किस प्रकार निपट रहे हैं ।

अगस्त्य—परिस्थिति को समझकर ही व्यवस्था की गयी है । वह इस प्रकार है—

आर्य धर्म में निपुण यह लोग केवल श्वेत भिक्षुक ही नहीं है, कूटकला में विशेष योग्यता रखने वाले यह रण में कौशल दिखाने में समर्थ है, शास्त्र विशारद,

एते शास्त्रविशारदा गुरुकुले शस्त्रक्रियादीक्षिता ,
आर्यावर्तंजनाः समर्पणधिया धर्मं प्रसारे रताः ॥१६॥

रामः—विहितमार्येणोचितमेव। तदत्र कीदृशं तावत् किष्किन्धा वृत्तं वर्तते ?

अगस्त्यः—इतः किष्किन्धायां रावणेन सह सन्धिप्रकरणेऽसहमतो बालिभ्राता सुग्रीवो राज्याधिकारप्रस्तावे बालिना निष्कासितः स्व समर्थकैः सह ऋष्यमूकेऽवसरं प्रतीक्षते । रक्षसामत्याचारेण त्रस्त-प्रजापरिसरेषु सर्वत्रासन्तोषाग्निर्धूमायते ।

रामः—तदेतदनुकूलमेवास्मत् कार्यसन्धाने। कीदृशं नाम लङ्कावृत्तं वर्तते ?

अगस्त्यः—तत्रापि दशकण्ठानुजो विभीषणो रक्षसामत्याचारविरुद्धः समन्वयपक्षपाती शान्ति समर्थको वर्तते। प्रायो निरन्तरं युद्धरता लङ्का-नागरिका अपीदानीं युद्ध-विरोधिनो जाताः।

रामः—इति तु सर्वमनुकूलमेव । परन्तु जनस्थाने रक्षःसैन्योपस्थितिरार्यावर्तजनानां कृते नितरामशान्तिकारणं प्रतीयते । तदत्र किं विधीयते ?

गुरुकुल में शस्त्र-क्रिया में भी दीक्षित, यह आर्यावर्त्त के लोग समर्पण बुद्धि से धर्म के प्रसार में संलग्न हैं ॥१६॥

राम—आर्य ने उचित ही किया। किष्किन्धा का कैसा हाल है ?

अगस्त्य—इधर किष्किन्धा में रावण के साथ सन्धि के प्रकरण में असहमत राज्याधिकार प्रस्ताव पर वालि के द्वारा निष्कासित उसका भाई सुग्रीव अपने समर्थकों के साथ ऋष्यमूक पर अवसर की प्रतीक्षा कर रहा है । राक्षसों के अत्याचार से त्रस्त प्रजा में सर्वत्र असंतोष की आग धुंआ दे रही है।

राम—तव तो यह हमारी कार्य-सिद्धि में अनुकूल ही है। लङ्का का क्या समाचार है ?

अगस्त्य—वहाँ भी दशकण्ठभ्राता विभीषण राक्षसों के अत्याचार का विरोधी समन्वय पक्षपाती शान्ति का समर्थक है। प्रायः निरन्तर युद्धरत लङ्का के नागरिक भी इस समय युद्ध के विरोधी हो गये हैं।

राम—यह तो सव अनुकूल ही है। किन्तु जनस्थान में राक्षस सेना की उपस्थिति, आर्यावर्त्त वासियों के लिए अत्यन्त अशान्ति का कारण प्रतीत होती है। इस सम्बन्ध में क्या किया जा रहा है।

अगस्त्यः—यदत्र श्रीमतां पदार्पणं तत् किमकारणमेव एष एव सर्वथा बहुप्रतीक्षितः कालो दण्डकवासिनां रक्षसां शास्ति हेतोः। प्रवेशकाल एव श्रीमता यद् रक्षसां सीमाप्रहरी विराधो व्यापादितस्तेनैवार्यमहोदयानां दण्डकप्रवेशवृत्तं रक्षः कुले सहसा दावाग्निवत् प्रसृतमेव।

सीता—अहो नाथ! विराधस्य क्रौर्येणाद्यापि कम्पते मे हृदयम्।

अगस्त्यः—अलमलं वत्से! भयेन रामे सहाये कुतो भयकारणम्? यतः—

रामे धनुष्मत्यरिदर्पदोग्धि,
क्रौर्यं कुतस्तिष्ठतु राक्षसानाम्।
सहस्ररश्मावुदिते तमिस्रा-
ध्वान्तं समन्तात् सहसापयाति ॥२०॥

रामः—तद् यथा मया पूर्वमेव प्रतिज्ञातं यदत्र मय्यागते सर्वैरभयैर्भाव्यम्। अतः—

सर्वे सुव्रतमाचरन्तु मुनयः शान्ताः कुटीरस्थिताः,
धूमैः सम्प्रति पावयन्तु विपिने यज्ञाग्नयो दिङ्मुखान्।

अगस्त्य—यह जो आपका यहां पदार्पण हुआ है, वह क्या अकारण ही है। दण्डकवासी राक्षसों को दण्ड देने का यहीं बहुप्रतीक्षित सही समय आया है। प्रवेश करते ही श्रीमान् ने राक्षसों का सीमा-प्रहरी जिस विराध को मार दिया उसी से आपके दण्डक वन में प्रवेश करने का समाचार राक्षस कुल में दावाग्नि की भाँति फैल गया।

सीता—अरे नाथ! विराध की क्रूरता से मेरा हृदय आज भी कांप जाता है।

अगस्त्य—पुत्री! भय मत करो। राम के सहायक रहते भय का कारण कहाँ? क्यों कि—

शत्रु के गर्व का दोहन करने वाले राम के धनुष धारण करने पर राक्षसों की क्रूरता कहाँ ठहर सकती है। सहस्त्र रश्मि सूर्य के उदय होने पर रात्रि का अन्धकार एकाएक नष्ट हो जाता है ॥२०॥

राम—मैंने जैसी पूर्व ही प्रतिज्ञा की है, कि मेरे यहां आ जाने पर सबको निर्भय हो जाना है। इसलिए—

अब अपनी कुटीरों में स्थित सभी शान्त मुनिगण व्रतों का आचरण करें, वन में यज्ञ की अग्नि धूम से दिशाओं के मुखों को पवित्र करें, मन्त्र और शंख की ध्वनि

मन्त्रैः शंख-निनादनैश्च कुसुमैरर्चन्तु देवानिमे,
यद् रामेण धनुष्मता ननु जनस्थानेऽभयं घोषितम् ॥२१॥

अगस्त्यः—कृतार्थी भूता एते दण्डकचारिणो मुनिजनाः । अस्ति तात ! किञ्चिदन्यदपि ज्ञाप्यम् । यत् देवेन्द्रेण पुरन्दरेण साक्षयतूणीरमिदं कोदण्डं धनुः यथावसरं श्रीमते प्रदातुं मत्समीपे प्रेषितमासीत् । तदिदं गृह्यताम् । यतः समयेनैतद् धर्मध्वंसिनां विध्वंसने भवत्साहाय्यं सम्पादयिता । (इति ददाति)

रामः—(सादरमाददानः) अहो ! गरीयसीयमनुकम्पा मयि पुरन्दरस्य । तदहमनुगृहीतोऽस्मि साहाय्येनानेन ।

अगस्त्यः—अत्र मया गोदावरीपरिसरे श्रीमतामावासव्यवस्था विहिता । प्रकृतेर्मनोरमाङ्के स्थितमिदं पञ्चवटीस्थलं गोदावरी सलिलस्पर्श-शीतलसमीरसिञ्चितं पावयन्तु नाम पादार्पणेन श्रीमन्तः ।

रामः—यथा रोचते महर्षये ।

अगस्त्यः—न केवलमिदं मुनितपः-पूतमनोहरमपितु गिरिनदी विटपान्तरितमिदं सर्वथा श्रीमतामावासयोग्यमेव यतस्तत्र—

से तथा पुष्पों से ये लोग देवताओं की अर्चना करें । क्यों कि इस धनुषधारी राम ने जनस्थान में अभय की घोषणा कर दी है ॥२१॥

अगस्त्य—यह दन्डक चारी मुनिजन कृतार्थ हुए । तात !, कुछ और भी ज्ञापित करना है कि देवेन्द्र पुरन्दर ने यह अक्षय तूणीर के साथ कोदण्ड धनुष यथा समय आपको देने के लिए मेरे पास भेजा था इसे ग्रहण करें क्योंकि समय आने पर यह धनुष धर्मध्वंसियों को विध्वंस करने में आपकी सहायता करेगा ।

राम—(आदर के साथ लेते हुए) यह पुरन्दर की मेरे ऊपर महान कृपा है । मैं इस सहायता से अनुगृहीत हुआ ।

अगस्त्य—मैंने यहाँ गोदावरी परिसर में आपकी आवास व्यवस्था की है । प्रकृति की मनोहर गोद में स्थित गोदावरी सलिल स्पर्श से शीतल वायु से सिञ्चित इस पंचवटी स्थल को श्रीमान् पादार्पण से पवित्र करें ।

राम—जैसी महर्षि की इच्छा ।

अगस्त्य—केवल यह मुनिजनों के तप से पवित्र और मनोहर ही नहीं है गिरि, नदी तथा वृक्षों से घिरा हुआ यह स्थल सर्वथा आपके निवास योग्य ही है । क्यों कि वहाँ—

शीतस्पर्श - जलाभिषेकपुलिने क्रीडेदियं जानकी,
सद्यः सूतफलैः प्रफुल्लतरुभि र्नन्देदसौ लक्ष्मणः।
देवैरर्चितचन्द्रकान्तधवले तिष्ठंल्लतामण्डपे,
विभ्रंल्लोकहितं तनोतु समतासौजन्यसच्चन्द्रिकाम् ।।२२।।

रामः—आवासव्यवस्थया कृतार्थोऽस्मि । अनुजानीहि तात ! पञ्चवटीं प्रति प्रयाणाय।

अगस्त्यः—आर्य ! पञ्चवटीप्रवासव्यवस्था विहितैव वर्तते तथाप्येष भुवनभ्रमणप्रयास - श्रमावलम्बितो दिवस्करोऽस्ताचलाभिमुखो वर्तते । तदिहैवाश्रमपदे सांध्यकृत्यै मुनिजनोपनीतैः कन्दमूलफलातिथ्यैश्च रात्रिमिमां व्यतिगमययन्तु नाम भवन्तः।

रामः—यथा रोचते महाभागाय।

अगस्त्यः—तात ! पश्येदानीम् —

वत्सस्नेहोन्मुखीना विपिनपरिसराद् धेनवः संनिवृताः,
संध्यायज्ञाग्नि-धूमस्तरुशिखरगतः स्वागतार्थं निशायाः।
छायाभिर्लम्बमाना मुखरखगरवैः सांध्यगीतै र्मनोज्ञै-
रस्तप्रायं विपन्नं दिवसपतिमिमे शाखिनः संस्तुवन्ति ।।२३।।

शीत स्पर्श जल से स्नान के योग्य तट पर यह जानकी क्रीडा करेगी, ताजे प्रसूत फल वाले पुष्पित वृक्षों के साथ यह लक्ष्मण आनन्द लेगें ओर आप देवताओं से पूजित चन्द्रकान्त धवल लता-मण्डप में विराजते हुए लोक हित को शोभित करते हुए समता और सौजन्य की सच्चिन्द्रका का विस्तार करें ।।२२।।

राम—आवास-व्यवस्था से मैं कृतार्थ हुआ। अब तात ! पञ्चवटी जाने की आज्ञा दें।

अगस्त्य—आर्य ! पञ्चवटी प्रवास व्यवस्था तो पूर्ण ही हैं। फिर भी यह भुवन में भ्रमण के श्रम से ढल रहा सूर्य अस्ताचल की ओर जा रहा है। अतः आप यहां आश्रम में ही सान्ध्य कृत्यों तथा मुनिजनों से लाये हुए कन्दमूल फलों के आतिथ्य से यह रात्रि बिता लें।

राम—महाभाग की जैसी इच्छा।

अगस्त्य—तात ! देखिए इस समय—

वछड़ों के स्नेह से उन्मुख गायें वन से लौट रही है, सन्ध्या यज्ञ की अग्नि का धुंआ रात्रि के स्वागत के लिए वृक्षों के शिखर पर पहुंच गया है और छाया के कारण लम्बे लेटे हुए से ये वृक्ष मुखर पक्षियों के स्वर वाले मनोज्ञ सांध्य गीतों से, अस्त-प्राय, विपन्न, दिवसपति, सूर्य की स्तुति कर रहे हैं ।।२३।।

तद् वयमपि सांध्यसवनादि विनिवर्तयितुमिमां परिषदं विसर्जयामः।

सर्वे—यथाज्ञापयन्ति महोदयाः।

(इति निष्क्रान्ताः सर्वे)

पटाक्षेपः

समाप्तोऽयं प्रथमोऽङ्कः

अतः हम लोग भी सांध्य यज्ञादि कृत्यों को पूर्ण करने हेतु इस परिषद का विसर्जन करते हैं।

सब लोग—जैसी महोदय की आज्ञा।

(सब जाते हैं)

पटाक्षेप

प्रथम अङ्क समाप्त

द्वितीयोऽङ्कः

(अथ विष्कम्भकः)

(ततः प्रविशतः विल्वलदुर्मुखौ राक्षसौ)

दुर्मुखः—अहो ! विल्वल ! अपि नाम कुशलं ते ? कथमीदृशीयं विवर्णा वदनच्छाया दृश्यते ?

विल्वलः—मित्र दुर्मुख ! कीदृशं कुशलं नाम ? जनस्थाने महत् करुणं वर्तते । बुभुक्षितोऽहं नितरामिह कन्दमूलफलानि मार्गयामि, शृगालशशकमांसैश्च वर्तयामि ।

दुर्मुखः—सखे ! कथमीदृशं जातम् । अपि नाम तेऽनुजाभ्यां, कोऽपि तापसो नामन्त्रितः ।

विल्वलः—निमन्त्रित आसीत् । तदसौ महोदरोऽगस्त्य एवापतितः ।

दुर्मुखः—ततः किं भूतम् ।

विल्वलः—यथावद् मायया भ्राता वातापि र्भोजनेन तस्य महोदरस्योदरदरीं प्रविष्टः ।

(विष्कम्भक प्रारम्भ)

(विल्वल और दुर्मुख राक्षसों का प्रवेश)

दुर्मुख—अरे ! विल्वल ! तुम कुशल से तो हो तुम्हारा मुख विवर्ण क्यों दिखायी देता है ?

विल्वल—मित्र दुर्मुख ! कैसी कुशल ! जनस्थान में अत्यन्त करुण स्थिति है मैं तो भूख से अत्यन्त व्याकुल यहाँ कन्दमूल फल खोज रहा हूँ, शृगाल और शशकों के मांस से निर्वाह कर रहा हूँ ।

दुर्मुख—मित्र ! ऐसा कैसे हो गया ? क्या तुम्हारे बन्धुओं ने कोई तापस निमन्त्रित नही किया ?

विल्वल—निमन्त्रित किया था ! पर वह महोदर अगस्त्य आ पड़ा ।

दुर्मुख—तव क्या हो गया ?

विल्वल—पूर्व की भाँति माया से भाई वातापी भोजन के साथ उस महोदर की उदरदरी में प्रवेश कर गया ।

दुर्मुखः—तत् किं नामशेषोऽसावार्यधर्मधुरन्धरः ?

विल्वलः—(सकरुणम्) नासौ विपन्नः । वातापिरेव तस्य जठरानले भस्मीभूतः । यदा वन्धुनेल्वलेनाहूतम् 'वातापे ! तापस-जठराद् बहिरागच्छ' ततस्तेन जरठतापसेन डक्कारेण सह विहस्योक्तं "इल्वल ! क्वेदानीमसौ वातापिः, बुभुक्षितस्यास्य तापसवृद्धस्य जठरेऽसौ पचमानः पञ्चत्वं प्राप्तः, त्वां च रे ! दक्षिणारूपेण धरामि ।"

दुर्मुखः—(सभयम्) ततस्ततः ।

विल्वलः—ततस्तापसमांसरसास्वादमुखरोऽहं, यावदसौ भोजनासनादुत्थायेल्वलं हन्तुमारभेत, भयात् कथमपि ततः पलायितः ।

दुर्मुखः—अहो अति दारुणं सम्वृत्तम् ।

विल्वलः—ततो नितरां मुनिमांसास्वादव्याकुलोऽपि न कमपि निमन्त्रयामि, कथमपि कन्दमूलैरेव वर्तयामि इति नो वृत्तम् । सखे ! त्वमिदानीं कुतः समायासि ?

दुर्मुखः—मित्र ! अहमिदानीं लङ्केश्वरेण गुप्तचरप्रतिष्ठाने नियुक्तोऽत्र जनस्थानवृत्तेन स्वामिनं संदिशामि ।

दुर्मुख—तो क्या वह आर्य धर्म धुरन्धर नाम शेष हो गया ?

विल्वल—(सकरुण) वह तो नहीं मरा । वातापी ही उसको पेट की आग में जल मरा । जब भाई इल्वल ने पुकारा 'वातापी ! तापस के पेट से वाहर आ जाओ' तभी उस वूढ़े तापस ने डकार के साथ हँस कर कहा "इल्वल ! अब वह वातापी कहाँ है, भूखे इस वूढ़े तापस के पेट में पचकर वह पञ्चत्व को प्राप्त हो गया और रे ! तुझे दक्षिणा रूप में धरे ले रहा हूँ ।

दुर्मुख—(भयभीत होकर) फिर क्या हुआ ?

विल्वल—तभी तापस माँस रस के आस्वादन में मुखर मैं, जब तक वह भोजन के आसन से उठकर इल्वल को मारना शुरू करे, भय से किसी प्रकार वहां से भाग आया ।

दुर्मुख—अरे यह तो वहुत बुरा हो गया ।

विल्वल—तब से मुनि मांस आस्वाद के लिए अत्यन्त व्याकुल भी, मैं किसी को निमन्त्रित नहीं करता हूँ । किसी प्रकार कन्द मूलों से ही गुजर कर रहा हूँ । यह रहा हमारा हाल ! अब तुम कहो मित्र ! कहाँ से आ रहे हो ?

दुर्मुख—मित्र ! मैं आज कल लङ्केश्वर के गुप्तचर प्रतिष्ठान में नियुक्त हूँ । यहाँ जनस्थान के समाचार से स्वामी को सूचित करता रहता हूँ ।

विल्वलः—"जनस्थानमिदानीमार्यजनस्थानं सम्भूतम्" । किमिदं स्वामिना ज्ञातं न वा ?

दुर्मुखः—ज्ञातं वहुतरं ज्ञातम् । सीमाप्रहरिणो विराधस्य वधेनैव चिन्तितः स्वामी ।

विल्वलः—तदेतत् तापस-रामस्य दुष्कृत्यं स्वामिना ज्ञातम् । किं नाम तापसयोः पञ्चवटीवासेनापि परिचितो लङ्केश्वरः ? सखे ! तौ केवलं नाम्नैव तापसौ । निर्भीक-धन्विनावुभौ दुष्करकृत्यैरत्र जनस्थाने सर्वत्र मुनीनामभयमघोषयताम् ।

दुर्मुखः—एतदपि ज्ञातम् । तयो र्निर्देशन वनेऽत्र तापसा निर्भीका विचरन्ति । तैरनेके च राक्षसा व्यूहरचनया व्यापादिताः ।

विल्वलः—अधुना यज्ञधूमैरन्धीभूतमिदं वनम् । देवार्चनानुष्ठानैः शंखनादैर्वधिरीक्रियन्ते राक्षसानां कर्णाः । दण्डकारण्यमिदानीं तापस-धनुष्टंङ्कारेणाभयारण्यमार्यजनस्थानं जातम् । न कोऽपि राक्षसेभ्यो विभेति । यदि चेदीदृशी राक्षसानां दुर्गतिस्तदा मादृशां वुभुक्षापीडितानां पलायनमेव सद्गतिः सम्भाव्यते ।

विल्वल—'जनस्थान इस समय आर्यजनों का स्थान हो गया है' यह स्वामी को ज्ञात है या नहीं ?

दुर्मुख—ज्ञात है अच्छी तरह ज्ञात है । सीमा प्रहरी विराध के वध के समय से ही स्वामी चिन्तित हैं ।

विल्वल—तव तो तापस राम का यह दुष्कृत्य स्वामी को ज्ञात हो गया । क्या इन दोनों तापसो के पञ्चवटी निवास से भी लङ्केश्वर परिचित है ? मित्र ! वे दोनों नाम के ही तापस है इन दोनों निर्भीक धनुष धारियों ने अपने दुष्कर कार्यो से इस जनस्थान में सर्वत्र मनियों के लिये अभय दान की घोषणा कर दी है ।

दुर्मुख—यह भी ज्ञात है । उन दोनों के निर्देश से इस वन में तापस लोग निर्भय विचर रहे हैं । और उन लोगों ने व्यूह रचना से अनेक राक्षस भी मार डाले हैं ।

विल्वल—इन दिनों यज्ञ धूम से यह वन अन्धकार मय हो रहा है । देव पूजा अनुष्ठान और शङ्खनाद से राक्षसों के कान वधिर किये जा रहे है । दण्डकारण्य इस समय तापसो के धनुष्टङ्कार से अभयारण्य आर्यजनस्थान हो रहा है ।

कोई राक्षसों से डरता ही नही । यदि ऐसी ही राक्षसों की दुर्गति रही तो मेरे जैसे भूख से व्याकुलों का भाग जाना ही अच्छा रहेगा ।

दुर्मुखः—सखे विल्वल ! मा तादृशं चिन्तयित्वा । स्वामी न केवलं जनस्थानवृत्तेन चिन्ताकुलोवर्तते, विचारितमपि तेन कुटिलतापसानां विनाशनम् ।

विल्वलः—अहो ! सुविचारितं स्वामिना समयेन । तत् किं स्वामिना सेना समादिष्टा दुर्विनीतानां कृते ।

दुर्मुखः—सखे ! स्वामिना कूटनीति-प्रहारो निर्णीतः ।

विल्वलः—कीदृशो नामासौ ?

दुर्मुखः—स्वामिना भगिनी सूर्पणखा तापसौ वशीकर्तुं प्रेषिता ।

विल्वलः—कूटकलाकुशलस्य स्वामिनो विचारपद्धतिः सदा राक्षसानां कल्याणकृते भविता । तन्निश्चिन्ता वयमिदानीं जाताः ।

दुर्मुखः—(दूरं विलोक्य) पश्य विल्वल ! पश्येदानीं यज्ञादिपूजा परिचर्यां समाप्य स्वासनमधिष्ठितौ द्वावपि तापसौ परिदृश्येते । एष खल्वपरस्तु लघुरपि तीक्ष्णः क्रोधनो राक्षसानां काल एव प्रतीयते । (किञ्चिद् विचार्य) मन्ये स्वामिन्यागमनसमयोऽपि समीपे वर्तते । तदिदानीमत्रस्थितिर्नोचितावयोः ।

विल्वलः—सखे ! आयाहीदानीं शशकान् हत्वा मध्याह्नभोजनव्यवस्था क्रियते ।

दुर्मुख—मित्र विल्वल ! ऐसा मत सोचो । स्वामी जनस्थान के समाचार से केवल चिन्तित ही नही है, उसने कुटिल तापसों का विनाश भी सोच लिया है ।

विल्वल—स्वामी ने समय से ठीक ही सोचा ! तो क्या स्वामी ने दुर्विनीतो के लिए सेना को आदेश दे दिया ?

दुर्मुख—मित्र ! स्वामी ने कूटनीति प्रहार का निर्णय लिया है ।

विल्वल—वह कैसा ?

दुर्मुख—स्वामी ने तापसों को वश में करने के लिए वहन सूर्पणखा को भेजा है ।

विल्वल—कूटकला में कुशल स्वामी की विचार शैली सदा राक्षसों के कल्याण के लिए होगी । इस लिए हम लोग अब निश्चिन्त हो गए ।

दुर्मुख—(दूर देखकर) देखो विल्वल ! देखो यज्ञादि पूजा परिचर्या को समाप्त कर अपने आसन पर बैठे दोनों तापस दिखाई दे रहे है । निश्चय ही यह दूसरा छोटा होने पर भी तीक्ष्ण क्रोधी राक्षसो का काल ही प्रतीत होता है । (कुछ सोचकर) लगता है कि स्वामिनी के आने का समय भी समीप है तो अब हम लोगों का यहाँ ठहरना उचित नही ।

विल्वल—सखे ! आओ अब शशकों को मारकर दोपहर की भोजन व्यवस्था की जाए ।

दुर्मुख—अहो ! धिगिदानीमीदृशो मुनिमांसाभावो जातो यच्छशकै र्वतयावः ।

विल्वलः—सखे !

तापसौ रक्षितारौ चेद् दण्डकारण्यमीदृशम् ।
राक्षसा भक्षितारो वै शशकान् नात्र संशयः ॥१॥

(इति निष्क्रान्तौ)

(इति विष्कम्भकः)

(ततः प्रविशति पञ्चवटीपरिसरे सुखासीनो रामः, सीता, लक्ष्मणश्च यथा वर्णिताः)

रामः—प्रिये ! कीदृग् रमणीयमिदं दण्डकारण्यम् । गोदावरीनीर-सिञ्चितोऽसौ गन्धवहो ग्रीष्मातपतापमाहरन् परितः सलीलमुपसर्पति । गगनचुम्बिनो विशाला इमे विटपा वितानमिवातन्वाना वर्तन्ते । इमे सकल-कलं कूजन्तः पक्षिणस्तव यशोगाथामिव गायन्तः प्रतीयन्ते । तथापि प्रियजन स्मरणादेव मे मनः क्षणादेव विमनायते—

सरांस्युत्फुल्ल-कञ्जानि विटपा गगनस्पृशः ।
प्रवहन्तोऽनिला मन्दा अयोध्यां स्मारयन्ति माम् ॥२॥

दुर्मुख अरे धिक्कार है ! इस समय ऐसा मुनि मांस का अभाव हो गया कि शशकों से निर्वाह करना पड़ रहा है ।

विल्वल—सखे !

यदि तापस इस प्रकार दण्डकारण्य की रक्षा करेगें तो निश्चय ही राक्षस शशक ही खाएंगे इसमें संशय नहीं है ॥१॥

(दोनों जाते हैं)

विष्कम्भक समाप्त

(तभी यथा वर्णित पञ्चवटी परिसर में सुख से बैठे हुए राम सीता तथा लक्ष्मण का प्रवेश)

राम—प्रिये ! कितना रमणीय है यह दण्डकारण्य गोदावरी नीर से सिञ्चित यह सुगन्धित पवन ग्रीष्मातप को हरता हुआ चारों ओर स्वभावतः बह रहा है । गगन चुम्वी यह विशाल वृक्ष वितान सा ताने हैं । कलकल कूजन करते हुए यह पक्षी तुम्हारी यश गाथा गाते हुए प्रतीत होते हैं फिर भी प्रिय जनों के स्मरण से ही मेरा मन क्षण भर में खिन्न हो जाता है—

उत्फुल्ल कमल वाले यह सरोवर, आकाश को छूने वाले यह वृक्ष और मन्द प्रवाही पवन, मुझे अयोध्या की याद दिलाते हैं ॥२॥

सीता—आर्यपुत्र ! सुखदा इमे मधुमास दिवसाः । इत्थमेव द्वादश बर्षाधिकं समयो व्यतीतोऽयं वनवासस्य । किमिदानीं क्वचित् मे सेवा-स्खलतिर्यदयोध्या स्वामिनः स्मृतिपथमागता ?

रामः—प्रिये ! न खलु न खलु । प्रिये ! कथमीदृशो वाक्य-विन्यासः । त्वं तु मे जीवनं त्वां विना कथं रामस्यास्मिता सम्पद्यते । यतः—

तवस्निग्धकरस्पर्श-सुख सान्निध्यमर्जता ।
दीर्घप्रवास दुःखानि नानुभूतानि वै मया ।।३।।

सीता—आर्यपुत्र ! कथमीदृशी मोह-प्रसूतिः श्रीमतां हृदये मादृशां कृते । किं न खलु विस्मृतं यदार्यजनरक्षाकृते प्रतिज्ञातमार्येण ?

रामः—आम् ! स्मरामि प्रिये ! स्मरामि । नितरामार्यमुनिजन-पीडातङ्कितमिदं दण्डकमार्यजनरक्तरञ्जितमिदं गोदावरीसलिलं, क्रूराभि-चारकृत्यप्रवृत्तानां मत्तानां रक्षसामितस्ततो मदगर्जितं स्मारयन्ति मां, मे प्रतिज्ञाम् ।

कथमातङ्किते तिष्ठन् वनेऽस्मिन् क्रूरकर्मणाम् ।
विनाशाय कृतां भद्रे ! प्रतिज्ञां विस्मराम्यहम् ।।४।।

सीता—आर्यपुत्र ! यह मधुमास के दिवस सुखदायी है इसी प्रकार वनवास का वारह वर्षाधिक समय वीत गया है इस समय क्या मेरी सेवा में कोई कमी हो गयी जो स्वामी को अयोध्या की स्मृति आ गयी ?

राम—प्रिये ! नही, नही प्रिये ! ऐसा वाक्य कैसे कह दिया ! तुम तो मेरा जीवन हो तुम्हारे विना राम की अस्मिता कैसे हो सकती हैं । क्योंकि—

तुम्हारे स्नेहिल कर स्पर्श के सुख-सान्निध्य को प्राप्त करते हुए मुझको दीर्घ बनवास के दुख का अनुभव ही नही हुआ है ।।३।।

सीता—आर्यपुत्र ! मेरे जैसों के लिए श्रीमान् के हृदय में इतना मोह क्यों पैदा हो गया है ? क्या भूल गये हैं कि आर्यजनों की रक्षा के लिए आपने प्रतिक्षा की है ?

राम—हाँ स्मरण है प्रिये ! स्मरण है । आर्य मुनिजनों की पीडा से अत्यन्त आतङ्कित यह दण्डक वन, आर्य जनों के रक्त से रञ्जित यह गोदावरी का जल, क्रूर अभिचार कार्यो में प्रवृत्त मतवाले राक्षसों का इधर-उधर मद गर्जन, मुझे मेरी प्रतिज्ञा की याद दिला रहे हैं ।

भद्रे ! इस आतङ्कित वन में रहते हुए मैं क्रूर कर्मा (राक्षसों) के विनाश के लिए की हुई प्रतिज्ञा को कैसे भूल सकता हूँ ।।४।।

सीता—आर्यपुत्र ! चित्रकूटे व्यतीतान्येवमेव द्वादशवर्षाणि । अत्रापि दण्डके प्रकृतिपर्यवेक्षण सुखपरवशमार्यपुत्रमानसं, मदीयसान्निध्य मोहावर्त्त-पतितं प्रतीयते । ततो धिङ् मे रूपसौन्दर्यम्, यतः—

अगाधसान्निध्यमावाप्य नार्याः,
पतिः स्वकर्त्तव्यपथाच्च्युतश्चेत् ।
धिगस्तु तद् यौवनरूपरागो,
येनानुरागो ह्रियते जनानाम् ॥५॥

(इति रोषं नाटयति)

रामः—सीते ! नान्यथा चिन्तयित्वा । प्रिये ! समयं प्रतीक्षस्व । यथावसरमार्य-क्षत्रियस्य लोकोत्तरं पौरुषं ते दृष्टिपथं समागमिष्यति । शीघ्रमेव—

कोदण्डचण्डध्वनिधर्षितारी,
रामो निहन्ता ननु राक्षसानाम् ।
शौर्याभिषिक्ते हृदये च लग्ना-
मालिङ्गनैस्तोषयिता प्रिये ! त्वाम् ॥६॥

सीता—(सस्मितं सलज्जं) आर्यपुत्र ? शौर्येऽपि ते शृङ्गारपरवशता मामवशं विधत्ते ।

रामः—प्रिये ! ऐश्वर्यवञ्चितानामत्र वनेऽस्माकं वाङ्मनोरञ्जानादृते

सीता—आर्यपुत्र ! चित्रकूट में यों ही बारह वर्ष बीत गये । यहाँ दण्डक वन में भी आर्यपुत्र का मन प्रकृति-पर्यवेक्षण सुख में परवश तथा मेरे सामीप्य के मोहावर्त में पतित प्रतीत हो रहा है । तब तो मेरे रूप सौन्दर्य को ही धिक्कार है । क्योंकि—

नारी का अगाध सान्निध्य प्राप्त करके पति यदि अपने कर्तव्य पथ से ही च्युत हो जाए तो नारी के उस यौवन रूप और राग को धिक्कार है जो जनता के अनुराग को ही हरण कर ले (रोष प्रकट करती है) ॥५॥

राम—सीते ! ऐसा मत सोचो । प्रिये ! समय की प्रतीक्षा करो । यथावसर आर्य क्षत्रिय का लोकोत्तर पौरुष तुम्हें दिखाई देगा । शीघ्र ही—

कोदण्ड की चण्ड ध्वनि से शत्रुओं को धर्षित करने वाला राम, निश्चय ही राक्षसों का विनाशक बनेगा, और शौर्य से अभिषिक्त हृदय पर लिपटी हुई तुम्हे आलिङ्गनों से संतुष्ट करेगा ॥६॥

सीता—(लज्जा के साथ मुस्कराती हुई) आर्यपुत्र ! शौर्य में भी तुम्हारी शृङ्गार परवशता मुझे अवश कर देती है ।

राम—प्रिये ! ऐश्वर्य से वञ्चित हम लोगों का इस वन में वाक् मनोरञ्जन

क्मित्र विद्यते विनोदाय। (सम्मुखं विलोकयन्) पश्य प्रिये ! त्वां विमनायमानामालोक्य भगवतीयं वनदेवता समागता समयेन।

(ततः प्रविशति प्रगाढ़यौवनोन्माद-परवशा सूर्पणखा)

रामः—(सादरं) स्वागतं महाभागायाः। समायाहि गृहाणासनम्। चिरकालादेकाकिनी सीतेयं जानकी मदीया भार्या भवत्याः सान्निध्यमवाप्य सत्यमतिप्रसन्ना भविष्यति। देवि ! वनदेवतेव प्रतीयसे, अन्यथा राक्षसत्रासपरवशेऽस्मिन् वने नैकाकिनी नारी विचरितुं समर्था। सीते ! उपवेशय सादरमेनां भगवतीम्।

सूर्पणखा—(सीतां प्रति सरोषं सापमानं विलोक्य रामं प्रति) अयि भो ! तापस कुमार ! नाहं देवी, न वा वनदेवतास्मि! तत्सावधानं श्रूयतामहं सूर्पणखास्मि। विशालभुजदण्डबलमर्दितोद्दण्डार्यकुलस्य रक्षःसंस्कृतिसमुन्नायकस्य, भटनायकस्य दासीकृतसकलभुवनलोकपालस्य लङ्केश्वरदशग्रीवस्य भगिनी सूर्पणखा नाम राक्षसी।

रामः—(सहर्षम्) अहो ! राक्षसेन्द्र-रावणस्य भगिनी। ततोऽतीव प्रियतरमस्माकम्। स्वागतं राजभगिन्या। अपि नाम कुशली खलु लङ्केश्वरः।

के अतिरिक्त विनोद के लिए यहाँ और क्या है। (सामने देखते हुए) प्रिये ! देखो तुमको खिन्न देखकर समय से यह भगवती वन देवता आ गयी।

(तभी प्रगाढ़ यौवनोन्माद परवशा सूर्पणखा प्रवेश करती है।)

राम—(आदर के साथ उठकर) महाभागा का स्वागत है। आइये। आसन ग्रहण कीजिए। चिरकाल से अकेली यह मेरी भार्या जानकी सीता, आपका सान्निध्य पाकर सत्य ही अति प्रसन्न होगी। देवि ! वन-देवता सी प्रतीत हो रही हो, नही तो राक्षसों के भय से परवश इस वन में अकेली नारी विचरण करने में समर्थ नही है। सीते ! इन भगवती को आदर के साथ बिठाइये।

सूर्पणखा—(सीता की ओर सरोष और सापमान देखकर, राम के प्रति) अरे ओ तापस कुमार ! मैं कोई देवी या वनदेवता नहीं हूँ। इसलिए सावधान होकर सुनो, मैं सूर्पणखा हूँ। विशाल भुजदण्डबल से उद्दण्ड आर्य कुल का मर्दन करने वाले रक्ष-संस्कृति के उन्नायक भटनायक, सकल भुवन के लोकपालों को दास बनाने वाले लङ्केश्वर दशग्रीव की बहन सूर्पणखा नाम वाली राक्षसी हूँ।

राम—(सहर्ष) अरे राक्षसेन्द्र रावण की बहन ! तब तो मेरे लिए अत्यन्त प्रिय हुआ। राजभगिनी का स्वागत है, लङ्केश्वर कुशल से तो है ?

सूर्पणखा—को नाम लङ्केश्वरस्याकुशलं ब्रूयात् । सर्वथाऽसौ कुशली । तापस ! तदत्र दशग्रीवाज्ञां बिना न कोऽपि वस्तुं समर्थः । ये चात्र निवासिनस्तापसा दृश्यन्ते ते त्वस्माकं बलिपशवः । त्वया चात्र न केवलमाज्ञाभङ्गो विहितोऽस्माकं सीमाप्रहरी विरोधोऽपि छलान्निहतः । अतः सापराधाय ते कुपितोऽस्माकं स्वामी प्रेषिता चास्म्यहं स्वामिना त्वां दण्डयितुम् ।

रामः—भद्रे ! मा स्यात्तवोरसीदृशोभ्रमः, यतो वयं बनवासिनः । अस्माकं बनमेव शरणम् । यदसौविराधः, स तु सीतापहारकत्वान्निहतः । का गति, र्यदि चेदहम् तवापराद्धस्तवाग्रेऽस्मि ।

सूर्पणखा—परमिदानीमिदमतीव खेदकरमापद्यते यत् त्वं तापस कुमार ! रूपसौन्दर्येण मे मनोविनोदकरः प्रतीयसे । तदिदानीं ते वधो नोपयुज्यते । अतो मया निर्णीतं यत्त्वमिदानीं मे भोग्यो भवितासि भ्रातुराज्ञया च वरणीयोऽपि ।

रामः—भद्रे ! त्वं राक्षसेन्द्रभगिनी लङ्केश्वरी । अहं जटिलस्तापसो मदीया चेयं पत्नी सीतापि वर्तते । कथमिदानीं मया सह ते संयोगः सम्पद्यते ।

सूर्पणखा—कौन लङ्केश्वर की अकुशल कह सकता है वह सब प्रकार से कुशली है । तापस ! यहाँ तो दशग्रीव की आज्ञा के बिना कोई नही रह सकता । यह जो निवासी तापस दिखाई देते हैं वे तो हमारे बलि पशु हैं । और तुमने तो यहाँ आज्ञा भङ्ग ही नही की है सीमा प्रहरी विराध को भी छल से मार डाला । अतः अपराधी तुम पर हमारे स्वामी कुपित हो गए है और स्वामी ने तुम्हें दण्डित करने के लिए मुझे भेजा है ।

राम—भद्रे ! तुम्हारे हृदय में ऐसा भ्रम नही होना चाहिए । क्योंकि हम तो बनवासी हैं । हमारा वन ही शरण है । वह विराध तो सीता अपहरण करने के कारण मारा गया । मेरी क्या मजाल, यदि मैं तुम्हारा अपराधी हूँ तो तुम्हारे सामने हूँ ।

सूर्पणखा—लेकिन इस समय यह मेरे लिए अत्यन्त खेदकर है कि तापस कुमार तुम रूप सौन्दर्य से मेरे लिए मनोविनोदकार प्रतीत होते हो । इसलिए इस समय तुम्हारा वध उचित नही लगता । मैंने निर्णय किया है कि तुम अब मेरे भोग्य होगे और भ्राता की आज्ञा से वरणीय भी ।

राम—भद्रे ! तुम राक्षसेन्द्र की बहन लङ्केश्वरी हो मैं जटाधारी तापस और यह मेरी पत्नी सीता भी है । मेरे साथ तुम्हारा इस समय कैसे संयोग हो सकता है !

सूर्पणखा--(दूरस्थं लक्ष्मणमालोकयन्ती) (स्वगतम्) अहो द्वितीय-स्त्वेषोऽतीव सुन्दरो गौराङ्गो विद्यते (प्रकटम्) तापस ! क एष द्वितीयः ?

रामः—भद्रे ! ममानुजोऽसौ लक्ष्मणोऽतिरोषणः प्रकृत्या ।

सूर्पणखा—तदेनमपि पश्यामि (समुपसृत्य) अयि भो तापस कुमार ! कथमेकाकी वने शरीर-सौष्ठवं शोषयसि । त्वदीयोऽसौ भ्राता वनेऽपि सपत्नीकस्तपस्यति । त्वं चैकाकी नोत्कण्ठते कण्ठे भुजपाशमालिङ्गितुम् । पश्यैषा तवाग्रे लङ्केशभगिनी सौन्दर्य-परवशा त्वां साहचर्यं याचते । तदुत्तिष्ठागच्छ मया सह विहरास्मिन् रमणीय-मनोहरे दण्डकारण्ये—

गोदावरी निर्झरनीरशीते,
सुगन्धिते पुष्पलतानिकुञ्जे ।
सरोजशय्योपरि वर्तमाना
संवाहनैस्त्वां सुखमानयामि ॥७॥

(इति ग्रहीतुं हस्तौ प्रसारयति)

लक्ष्मणः—(सहसा सरोषं पश्यन्) राक्षसि ! दूरादेवालप्यताम् । अहो ! वशीकृत-लोकपालस्य भगिनीत्थं स्वैरिणी अदृष्टपूर्वमेतन्मया । न कोऽपि त्वत्कृते भर्ता समासादितस्तेन राक्षसेश्वरेण यस्ते पुंश्चलत्वम-वशामयेत् ।

सूर्पणखा—(दूरस्थ लक्ष्मण को देखती हुई), (स्वगत) अरे दूसरा तो यह अतीव सुन्दर गौराङ्ग है । (प्रकट) तापस ! यह दूसरा कौन है ।

राम—भद्रे ! यह मेरा छोटा भाई लक्ष्मण स्वभाव से अत्यन्त क्रोधी है ।

सूर्पणखा—तो इसे भी देखती हूँ (पास जाकर) अरे ओ तापस कुमार ! क्यों अकेले वन में शरीर सौन्दर्य को सुखा रहे हो । तुम्हारा यह भाई वन में भी सपत्नीक तपस्या करता है । तुम अकेले कण्ठ में भुज पाश को आलिङ्गन के लिए उत्कण्ठित नहीं होते हो । देखो यह तुम्हारे आगे लङ्केश की बहन सौन्दर्य से परवश तुम्हारा साहचर्य मांग रही है । तो उठो, आओ मेरे साथ, इस रमणीय मनोहर दण्डकारण्य में विहार करें ।

गोदावरी निर्झर नीर से शीतल, सुगन्धित पुष्प लता निकुञ्ज में सरोज शैया पर बैठी हुई मैं संवाहनों से तुम्हें सुख दूंगी ॥७॥

(पकड़ने के लिए हाथ फैलाती है)

लक्ष्मण—(सहसा सरोष देखते हुए) अरे राक्षसी ! दूर से ही बात कर । आश्चर्य है लोकपाल को वश में करने वाले (रावण) की बहन ऐसी स्वैरिणी ऐसा मैंने कभी नही देखा । उस राक्षसेश्वर ने कोई तुम्हारे लिए पति नही पाया जो तुम्हारा पुंश्चलत्व शान्त करता ।

सूर्पणखा—किमुक्तं रे 'स्वैरिणी' राक्षसेषु नारी स्वातन्त्र्ये तवेयमीदृशी प्रतिक्रिया, विशेषतो राजभगिन्या ईदृशमपमानम् ।

मदीये शासने तिष्ठन् मामहो ! उद्धतं वचः ।
शशकेन वनप्रान्ते केशरिण्याः प्रताडनम् ॥८॥

लक्ष्मणः—कथं 'केशरिण्याः' सर्पिण्याः ब्रूहि । अयि धृष्टे ! कौशलेन्द्रस्य सम्मुख एव तवेयमीदृशी धृष्टता । राक्षसी त्वं दण्डनीयासि ।

सूर्पणखा—आम् ! 'अहं दण्डनीयास्मि' वराकस्य ते तापसस्येदृशं दुःसाहसोक्तं रक्षःप्रतापत ेऽस्मिन् जनस्थानेऽपि ।

लक्ष्मणः—धनुर्विभङ्गोदितकीर्तिचन्द्रस्य रामचन्द्रस्य वीर्येण सुपरिचितो नाम ते दशाननः । विराधवधेनापि त्वया न ज्ञातं, यदत्र वनेऽधूना, रामराज्यं वर्तते । तत् तावत् पलायस्वेदानीमितो यावदहं ते पुंश्चल्या नासिकोच्छेदनं न करोमि ।

सूर्पणखा—(स्वगतम्) अहो कष्टं, दुर्वचनविदग्धोऽसौ तापसो मां केवलमबलामेवावगच्छति न च जानीते मे मायाबलम् । (प्रकटम्) रे तापस वाचाल ? देव-दानव-राक्षसेष्वपि न कश्चिद् मद्वचनविमुखः स्थातुं समर्थः,

---

सूर्पणखा—क्या कहा रे ! स्वैरिणी' राक्षसों में नारी स्वाधीनता के प्रति तुम्हारी ऐसी प्रतिक्रिया विशेष रूप से राजभगिनी के प्रति ऐसा अपमान ।

मेरे ही राज्य में रहते हुए मेरे लिए ही उद्धत वचनों का प्रयोग । वन के अन्दर शशक द्वारा केशरिणी का प्रताडन ! ॥८॥

लक्ष्मण—'केशरिणी' कैसे 'सर्पिणी' कहो । अरे धृष्टे ! कौशलेन्द्र के सामने ही तुम्हारी ऐसी धृष्टता । राक्षसी, तुम दण्डनीय हो ।

सूर्पणखा—हाँ ! मैं दण्डनीय हूँ ! राक्षसों के प्रताप से तप रहे इस जनस्थान में तुझ जैसे वराक तापस का ऐसा दुःसाहस पूर्ण वाक्य ।

लक्ष्मण—धनुष भङ्ग कर यश रूपी चन्द्रमा का उदय करने वाले रामचन्द्र के वीर्य से तुम्हारा दशानन सुपरिचित है । विराध के वध से भी तुम्हें नहीं ज्ञात हुआ कि अब इस वन में रामराज्य हैं । इस लिए तब तक यहाँ से भाग जा जब तक तुझ पुंश्चली की मैं नाक नही काट लेता ।

सूर्पणखा—(स्वगत) अति कष्ट कर है । यह दुर्वचन विदग्ध तापस मुझे केवल अबला ही समझ रहा है । यह मेरा माया बल नही जानता । (प्रकट) रे वाचाल तापस ! देव दानव राक्षसों में भी कोई मेरे वचनों से विमुख होकर नही ठहर सकता तुझ जैसे वराक मनुष्य की क्या गणना । अतः मेरी आज्ञा विरोध के अपराध से

का ते गणना वराकस्य मानुषस्य। अतो मदाज्ञाविरोधापराधाद् द्वावपि मद्भोजनं भवितारौ, वराकी चेयं नारी भ्रातुर्मनोविनोदनं भविता। अथवा मद्भोगबाधामिमां सपत्नीमेव निहन्मि।

(इति सीतां हन्तुमिच्छति)

लक्ष्मणः—आः दुष्टे ! दुर्विनीते ! मयि जीवत्येव धनुर्धरे दासे, स्वामिन्याः कृते तवेदृशो वाग्वज्रप्रहारः। स्वैरिण्या गलच्छेद एवोचितस्तथापि नारीह्यबलासि, अरे ! मदनपरवशे ! विकृतिरेवोचिता ते दुरन्तसौन्दर्यस्य यतो नान्यानुद्वेजयेदेतत्। (इति क्रोधाविष्टो नासिका-कर्णच्छेदं कुरुते)

आर्योन्मूलनबद्धवचनस्य त्वत् स्वामिनः कृते कौशलेन्द्रस्यायं संदेशः—

गच्छ ब्रूहि दशास्यमनार्ये ! विकृतेन दुर्मुखेणैतत्।
उद्दण्डान् दण्डयितुं दण्डकमातिष्ठते रामः ॥८॥

सूर्पणखा—(हा हा कारेण वनं कम्पयन्ती) आः रे ! उद्दण्डतापस ! एष ते साहसः। सूर्पणखानासिकाच्छेदेन त्वयार्याणां विनाश एवावाहितः। तिष्ठतु नाम लङ्केश्वरो, भ्राता खरोऽत्र जनस्थानमध्यास्ते। स एवालं तापसानां विनाशाय। (परावृत्य) तच्छ्रूयतां दुर्विनीत ! धृष्ट !—

दोनों मेरे भोजन बनोगे और यह बेचारी नारी भाई का मनोविनोदन। अथवा मेरी भोगबाधा इस सौत को ही मार डालती हूँ (इस प्रकार सीता को मारना चाहती है)

लक्ष्मण—अरी दुष्टे ! दुर्विनीते ! मुझ धनुर्धर दास के जीते ही स्वामिनी के प्रति तेरा ऐसा वाग् वज्र प्रहार। स्वैरिणी का गलच्छेद ही उचित है फिर भी तू नारी अबला है। अरी मदन-परवशे ! तेरे दुरन्त सौन्दर्य की विकृति ही उचित है, जिससे यह अन्य किसी को व्याकुल न कर सके। (क्रोधाविष्ट होकर नासिका और कान काट देता है) आर्यों का उन्मूलन करने की प्रतिज्ञा करने वाले तुम्हारे स्वामी के लिए कौशलेन्द्र का यह सन्देश है—

अरी अनार्ये ? जा, और अपने इस विकृत दुर्मुख से दशानन से कह दे कि उद्दण्डों को दण्डित करने के लिए राम, दण्डक वन में निवास कर रहे हैं ॥९॥

सूर्पणखा—(हाहाकार से दण्डक वन को कंपाती हुई। हाय रे उद्दण्ड तापस ! तेरा यह साहस ! सूर्पणखा के नासिकाच्छेद से तूने आर्यों के विनाश का ही आवाहन कर दिया है। लङ्केश्वर को छोड़िये, भाई खर यहाँ जनस्थान में ही रह रहा है, वही तापसों के विनाश के लिए पर्याप्त है। (लौटकर) अरे दुर्विनीत ! सुन ले, धृष्ट !

मामको नासिकोच्छेदो दण्डके शृणु तापस !
आर्यावर्तस्य भविता नासिकोच्छेदकारणम् ॥१०॥

(इति निष्क्रान्ता)

रामः—(ससाध्वसम्) लक्ष्मण ! वत्स ! किमेतदनुष्ठितम् ?

लक्ष्मणः—तात ! युद्धार्थमामन्त्रितो रक्षसांपति लंङ्केश्वरः ।

रामः—वत्स ! कथमेतदनवसरं सहसा सम्भाव्यते । रावणस्य युद्ध-साधनोपलब्धिमविज्ञायैवात्र वने कथं युद्धारम्भः ।

लक्ष्मणः—समयं प्रतीक्षमाणैरस्माभिर्मन्थरगति - प्रयासविन्यासेन रावणाय शक्तिसमुच्चयावसरः प्रदत्तः । लङ्केश्वरोऽधुना सुखेन लङ्कामध्यास्ते । अत्र जनस्थाने तस्य विकटवाहिनी न केवलं विरोधावरोधाय नितरामार्या-वर्तस्य कृते विपद्वाहिनी चापि वर्तते ।

सीता—कीदृशी नामार्यस्य समय-प्रतीक्षा ? वत्सलक्ष्मणः सत्यमेव भाषते । अनेन दीर्घकालेन रावणेन नितरां शक्तिरेवार्जिता । न खलु तापसत्वं क्षत्रियाणां विक्रमे बाधकत्वम् स्यात् ।

रामः—वैदेहि ! न मे खलु कुत्रापि विक्रमे परवशता तथापि युद्धकार्ये

अरे तापस ! सुन ले ! दण्डक वन में मेरा नासिकाच्छेद आर्यावर्त की नाक कटने का कारण बन जाएगा ॥१०॥

(निकल गयी)

राम—वत्स लक्ष्मण ! यह क्या कर डाला ?

लक्ष्मण—तात ! युद्ध के लिए राक्षसों के स्वामी लङ्केश्वर को आमन्त्रित कर दिया है ।

राम—वत्स ! यह बिना अवसर एकाएक कैसे सम्भव है । रावण की युद्ध साधन उपलब्धियों को बिना जाने यहाँ वन में कैसे युद्ध आरम्भ हो सकेगा ।

लक्ष्मण—समय की प्रतीक्षा करते हुए हम लोगों ने मन्थर गति से प्रयत्न करने के कारण रावण के लिए शक्ति एकत्र करने का अवसर प्रदान कर दिया है । लङ्केश्वर इन दिनों सुख से लङ्का में रहता है । यहाँ जनस्थान में उसकी विकट वाहिनी न केवल विरोध के अवरोध के लिए है बल्कि आर्यावर्त के लिए हर समय विपत्ति वाहिनी बनी हुई है ।

सीता—जाने कैसी है आपकी समय प्रतीक्षा । वत्स लक्ष्मण ठीक ही कहते हैं । इस लम्बे समय में रावण ने निरन्तर शक्ति ही अर्जित की है । फिर क्षत्रिय का तापस होना उसके विक्रम में बाधक तो नही है ।

राम—वैदेही ! मेरे विक्रम में कही पर भी परवशता नही है फिर भी युद्ध

नितरां सावधानतापेक्षणीया, युद्धावसरं प्रतीक्षमाणा एव साफल्य-शिखर-मधिरोहन्ति विज्ञाः ।

लक्ष्मण—अवसरोऽवसरो नाम तात ! द्वादश वर्षाणि व्यतीतान्यावयोरेवमेवावसरप्रतीक्षमाणयोः किन्तु नावसरः समायातः । कूटनीतिनिष्णातोऽसौ रावणोऽस्माकं गतिविधिज्ञानपण्डितो जातः । सर्वत्र विचरन्ति तस्य छद्मवेशिनो गुप्तचराः, इत्यपि जानीहि तात ! रक्षःप्रचारकोऽसौ विनाशबन्धुर कदापि युद्धं नापेक्षते न चासौ भवतां कदापि शरसम्मुखीनो भविता । तदार्येण विहिता प्रतिज्ञा कदा पूरणीया ?

सीता—आर्यपुत्र ! किमत्रार्यप्रतिज्ञाबन्धेऽहं बाधास्मि किमत्रार्यस्य पौरुषशैथिल्येऽहमेव कारणम् । तन्नाथ ! नान्यथा चिन्तयित्वा । आर्यनारी, जीवने मरणेऽप्यसौ स्वामिनः पन्थानमेवानुसरति ।

रामः—अहो सीते ! त्वमिदानीमीदृशी संशयिनी जाता । वत्स लक्ष्मण ! किं त्वयापि मदवचनेषु शौर्यशैथिल्यमनुमीयते । मा मा त्वयेत्थं चिन्तयित्वा केवलं कालगलच्छेदिनो रामस्य कृतेऽबलापमानमतीव कष्टकरं, स्यादियं नाम शत्रोर्भगिनी ।

लक्ष्मणः—क्षमस्वार्य ! स्वामिनोऽपमानिनो गलच्छेद एव सेवकस्य

कार्य में निरन्तर सावधानी तो देखनी पड़ती है युद्ध के अवसर की प्रतीक्षा करने वाले ही विज्ञ सफलता के शिखर पर आरोहण करते हैं ।

लक्ष्मण—अवसर, अवसर ! तात ! बारह वर्ष बीत गये हम लोगों को अवसर की प्रतीक्षा करते हुए किन्तु अवसर नही आया । कूटनीति में निष्णात वह रावण हमारी गतिविधि की जानकारी का पण्डित हो गया उसके छद्मवेशी गुप्तचर सर्वत्र घूम रहे हैं । और तात ! यह भी समझ लें कि वह रक्षधर्म का प्रचारक है अतः वह कभी विनाशकारी युद्ध नही चाहेगा और न ही वह आप के बाणों का सामना ही करेगा । तब आर्य द्वारा की हुई प्रतिज्ञा कब पूरी की जाएगी ?

सीता—आर्यपुत्र ! क्या यहाँ आर्य की प्रतिज्ञा में मैं बाधा हूँ ? क्या आर्य के पौरुष शैथिल्य में मैं कारण हूँ । तो स्वामी अन्यथा न सोचे । आर्य नारी, जीवन और मरण में भी वह स्वामी के मार्ग का ही अनुसरण करती है ।

राम—अरे सीता तुम इस समय इस प्रकार का संशय कर रही हो । वत्स लक्ष्मण ! क्या तुम भी मेरे वचनों में शौर्यशैथिल्य का अनुमान लगा रहे हो । तुम्हें ऐसा नही सोचना चाहिए । काल के गलच्छेदी राम के लिए केवल अबला का अपमान अत्यन्त कष्टकर लगा चाहे वह शत्रु की ही बहन हो ।

लक्ष्मण—आर्य ! क्षमा करें । स्वामी के अपमान कर्ता का गलच्छेद ही

धर्मः । एषा तु स्वामिनोऽपमानेन सहैव सीतां मातरं हन्तुमुद्यताभूत् । तत्सेवकेन स्वधर्मोऽनुसृतः ।

सीता—भवतु नामानेन कृत्येन रावणस्य मोहनिद्रा भङ्गः । किमयं ऽनुतिष्ठत्यसौ धैर्येण प्रतीक्षणीयः, यथोक्तं वत्सेनायं युद्ध-संदेश एव लङ्केश्वराय ।

रामः—तत् प्रिये ! तवाप्यग्निपरीक्षाकालः समायातः ।

सीता—आर्यपुत्र ! सीताया अग्निपरीक्षा तु वनगमन-कालादेव प्रारब्धा । आर्यनारी कदाप्यग्निपरीक्षातो न बिभेति । मामचिन्तयन्नार्यपुत्र ! यथानुकूलं विधेहि स्वकृत्यानि । सीताजीवनमेवाग्निपरीक्षा ।

(नेपथ्ये कोलाहलः)

रामः—यथा रोचते युवाभ्यां, मन्ये युद्धकालः समायतः । पञ्चवटी-परिसरं सूर्पणखाविलापाकुलः खरः समायाति । वत्स लक्ष्मण ! त्वं सीतया सह गिरि-कन्दरे मां प्रतीक्षस्व यावदहं खरशरप्रहार-जर्जरं खरं साधयामि ।

लक्ष्मणः—यथाज्ञापयति देवः । तदहं समीपस्थकोटरे तिष्ठन् देव्या सुरक्षया सहैवार्यस्य पार्ष्णित्वं सम्पादयामि ।

सेवक का धर्म है । वह तो स्वामी के अपमान के साथ ही सीता की हत्या के लिए उद्यत हो गयी थी अतः सेवक ने अपने धर्म का अनुसरण किया है ।

सीता—इस कृत्य से रावण की मोहनिद्रा भङ्ग होने दो । आगे वह क्या करता है, धैर्य से प्रतीक्षा करो । जैसा वत्स लक्ष्मण ने कहा है, यह लङ्केश के लिए युद्ध संदेश ही है ।

राम—तब तो प्रिये ! तुम्हारा भी अग्नि परीक्षा का समय आ गया है ।

सीता—आर्यपुत्र ! सीता की अग्नि परीक्षा तो वनगमनकाल से ही प्रारम्भ हो गयी है । आर्यनारी कभी अग्नि परीक्षा से नहीं डरती है, मेरी चिन्ता न करते हुए आर्यपुत्र यथानुकूल अपना कर्तव्य निभायें । सीता का जीवन ही अग्नि परीक्षा है ।

(नेपथ्य में कोलाहल)

राम—जैसा तुम दोनों चाहते हो, लगता है युद्ध काल आ गया । सूर्पणखा के विलाप से व्याकुल खर, पञ्चवटी परिसर की ओर आ रहा है । वत्स लक्ष्मण ! तुम पर्वत कन्दरा में सीता के साथ मेरी प्रतीक्षा करो जब तक मैं तीक्ष्ण बाणों के प्रहार से जर्जर खर को सही करता हूँ ।

लक्ष्मण—देव जैसी आज्ञा करते हैं, मैं समीपस्थ कोटर में बैठा हुआ देवी की सुरक्षा के साथ ही आपकी बगल की रक्षा व्यवस्था भी रखूँगा ।

(इति सीतया सह निष्क्रान्तः)

(पुनर्नेपथ्ये) कुतस्तौ खलु तापसकुमारौ ? भगिनि ! दर्शय मां तवापकारिणौ । आः ! प्रतीक्षते मदीयमिदानीं भुजदण्डं तापसान् मर्दयितुम् ।

रे रे तापसनालकौ ! क्व नु पुनर्यातौ विपद्वाहका-
वेतौ सूर्पणखां विधाय भगिनीं दुर्णासिकामुद्धतौ ।
एष क्रोधितकालदर्पदलनश्चण्डाशु-चण्डः खरः,
क्रुद्धो द्वावपि हन्तुमेति भुवने त्राता विधातापि न ।।११।।

रामः—(अकर्ण्य) अहो समागत एव वहुप्रतीक्षितः कालः । तद् भवतु नामार्यशक्तिपरीक्षा । अनुभवन्तु नामैते मुनिरक्तपायिनो राक्षसा मदीयान् निशितशिलीमुखान् ।

आस्तां कौशलवाहिनी बलमपि क्षोणीभृतामाहवे,
मित्राणां रथवाजिवाहनमहद्युद्धास्त्र - शस्त्राण्यपि ।
एकाकी विपिने यदा धृतजटाजूटोऽप्यसौ तापसो,
रामोऽरातिवलप्रमाथिविशिखैः सज्यं विधत्ते धनुः ।।१२।।

(पुनर्नेपथ्ये कोलाहलमाकर्णयन्) अहो ! वर्धत एव कोलाहलस्तदग्रतो भूत्वा पश्यामि दुर्दान्तानिमान् गतायुषान् ।

(इति निष्क्रान्तः)

समाप्तोऽयं द्वितीयोऽङ्कः

(सीता के साथ चले गए)

(पुन नेपथ्य में)

कहाँ है वे तापस कुमार ! वहन ! दिखाओ मुझे तुम अपने अपकारियों को । ओह ! मेरे भुजदण्ड इस समय तापसों के मर्दन की प्रतीक्षा कर रहे हैं ।

अपनी विपत्ति को वुलाने वाले अरे उद्धत तापस वालकों ! मेरी वहन सूर्पणखा की नाक काट कर कहाँ चले गये हो । क्रोधित काल के भी दर्प का दलन करने वाला चण्डांशु (सूर्य) के समान चण्ड क्रुद्ध यह खर दोनों को मारने आ रहा है । अव विधाता भी नही वचा सकता ।।११।।

राम—(सुनकर) अरे वहुप्रतीक्षित समय आ ही गया । मुनि रक्त पीने वाले यह राक्षस मेरे निशित वाणों का अनुभव तो करें ।

रणस्थल पर कौशल वाहिनी तथा राजाओं की सेना, मित्रों के रथ घोड़े वाहन और महान युद्धास्त्र शस्त्र की भी आवश्यकता नही है जव वन में अकेला जटाजूट धारी तापस राम, शत्रु - वलमथन करने वाले वाणों को अपने धनुष की प्रत्यञ्चा पर चढ़ाता है ।।१२।।

(पुनः नेपथ्य में कोलाहल सुनते हुए) अहो कोलाहल वढ़ ही रहा है तो आगे वढ़कर दुर्दान्त इन गतायुषों को देखता हूँ ।

(निकल जाता हैं)

द्वितीय अङ्क समाप्त

* ॐ *

तृतीयोऽङ्कः

(अथ विष्कम्भकः)

(ततः प्रविशति कञ्चुकी)

कञ्चुकी—नित्यं राजकुलं यदर्थमभजं तद् यौवनं निर्गतम्,
क्षीणा शक्तिरभूत् सदैव सुलभः स्वामिप्रसादो यया ।
मन्दैर्जर्जर एष इन्द्रियगणैरङ्गैरशक्तोप्यहो,
तृष्णा-तीव्रकषाहतोऽहमनिशं भ्राम्यन् भजे न श्रमम ।।१।।

तत् का गतिर्यथाऽऽज्ञापितः स्वामिना लङ्केश्वरेण तत्सकलं साधितम् । सूचिताः सर्वे राजप्रधानपुरुषाः, विज्ञापिताः सकलाः पौराः, समाश्वासिताः कलापुरुषाः । तत एव शून्या जाता रथ्याः, निर्जनीभूता उद्यानसौधगृहाः स्वामिभयाद् विलुप्तानीव पुष्पाणि वाटिकासु, अवरुद्धः काकलीस्वरः कोकिलानाम् । सत्यं मधुमासमदनोत्सव-प्रतिषेधेन विलुप्तसौभगेव जातेयं लङ्का । (दूरादवलोक्य) इमे केऽवाञ्छित-बेला-विन्यास-रमणीयाः समागच्छन्ति ।

(विष्कम्भक प्रारम्भ)

(कञ्चुकी प्रवेश करता है)

कञ्चुकी—जिसके लिए मैंने प्रतिदिन राजकुल की सेवा की वह यौवन चला गया जिसके द्वारा स्वामी की प्रसन्नता सदैव सुलभ रही वह शक्ति भी क्षीण हो गयी । फिर भी आश्चर्य है कि निर्बल इन्द्रियों से जर्जर, अङ्गों से अशक्त मैं तृष्णा के तीव्र कोड़े से मारा जाता हुआ निरन्तर इधर-उधर भागता हुआ भी श्रम का अनुभव नही करता हूँ ।।१।।

तब क्या गति है स्वामी लङ्केश्वर ने जैसी आज्ञा दी वह सब पूरी कर दी । सभी राजप्रधान पुरुषों को सूचित कर दिया, सभी पुरवासियों को विज्ञापित कर दिया, कलापुरुषों को आश्वासन दे दिया । तभी से मार्ग शून्य हो गये उद्यानों के भवन निर्जन हो गए, स्वामी के भय से मानो वाटिकाओं में पुष्प विलुप्त हो गए, कोयलों का काकली स्वर अवरुद्ध हो गया । सचमुच मधुमास के मदनोत्सव निषेध से इस लङ्का का सौन्दर्य लप्त सा हो गया (दूर देखकर) यह कौन अनचाहे समय की सजावट से रमणीय चले आ रहे हैं ।

(ततः प्रविशति स्वपरिजनैः परिवृत्ता मदगन्धा)

मदगन्धा—महाशय ! कीदृशोऽयमवाञ्छित बेला-विन्यासः ? किं न जानासि यदहं स्वामिनः प्रिया मदगन्धा नाम नर्तकी स्वामिनः प्रसादपरवशा मदनोत्सवाराधने समागतास्मि ।

कञ्चुकी—भद्रे ! क्वेदानीं मदनोत्सवः ? किं न जानासि स्वामिना निरस्तेयं पञ्चशर-समर्चना । किं न पश्यसि भृङ्गासङ्गरहिता इमा नव-कुसुमिताः पुष्पलता मुकुलिता इव जायन्ते । सौधशिखरासीना इमे मयूरा विस्मृत नर्तना मौनीभूतास्तिष्ठन्ति । कुङ्कुमाङ्गरागरञ्जिता अपीदानीं युवतयो व्यतिकर-व्याकुला मदनोत्सवं विहाय सदनमातिष्ठन्ते । लङ्कायां रमणीयता सहसा सर्वत्र सुप्तेव परिलक्ष्यते ।

मदगन्धा—भद्र महोदयाः ! तदावेदयन्तु नाम मां किमिति वृत्तं जातम्, यतो बहिरागतया मया न ज्ञायते । स्वस्त्यस्तु स्वामिने ।

कञ्चुकी—अपि नाम ज्ञातं भवत्या, यत्तत्र जनस्थानेऽति दारुणं सम्वृत्तम् ।

मदगन्धा—कीदृशं नाम ? अपि नाम कुशलं खलु तत्रगतानां खरदूषण-त्रिशिरसां भ्रातृणाम् ।

(तभी अपने परिजनों से घिरी मदगन्धा प्रवेश करती है)

मदगन्धा—महाशय ! अनचाहे समय की सजावट की रमणीयता कैसी । क्या नही जानते हो कि मैं स्वामी की प्रिय मदगन्धा नाम की नर्तकी स्वामी को प्रसन्न करने के लिए मदनोत्सव की आराधना में आई हूँ ।

कञ्चुकी—भद्रे ! अब कहाँ है मदनोत्सव । क्या नही जानती हो कि स्वामी ने पञ्चशर पूजा रद्द कर दी है । क्या नही देख रही हो यह भौरे के आलिङ्गन से रहित नवकुसुमितपुष्पलता मुरझा सी रही है । सौध के शिखरों पर बैठे हुए यह मयूर नाचना बन्द कर मौन बैठे हैं । कुंकुम अंगराज से रञ्जित भी युवतियां बाधा से व्याकुल अब मदनोत्सव छोड़कर घरों में बैठी हैं । लंका की रमणीयता सहसा सर्वत्र सुप्तसी लक्षित हो रही है ।

मदगन्धा—अरे भद्र महोदय ! तो मुझे बताइये क्या बात हो गयी है क्योंकि बाहर से आने वाली मुझे कुछ मालूम नही है । स्वामी का कल्याण हो ।

कञ्चुकी—क्या आपको पता है कि वहाँ जनस्थान में दारूण काण्ड हो गया है ।

मदगन्धा—कैसा काण्ड ! वहाँ रहने वाले भाई खर दूषण त्रिशिरा कुशल से है ?

कञ्चुकी—कीदृशं कुशलं, तत्रागतेन केनाप्यार्यतापसेन सूर्पणखा विरुपिता नासिकाच्छेदेन।

मदगन्धा—अहो ! भगिन्याः सूर्पणखाया-नासिकाच्छेदः । दारुणं सम्वृत्तम् । शासत्येव राक्षसेश्वरे तापसस्येदृशो दुःसाहसः ।

कञ्चुकी—न केवलं नासिकाच्छेदः ।

मदगन्धा—किमन्यदत्याचरितं तेन यमोदरस्थेन तापसबालिशेन ?

कञ्चुकी—अथ किम् ! सर्वे ते त्रयः खरदूषणत्रिशरसः चतुर्दशसहस्त्र-सैनिकाश्च तेनैकेन व्यापादिताः ।

मदगन्धा—अहो ! तेनैकेनैव ! ततः सत्यं-महद्दारुणं सम्वृत्तम् । उचितमेव यत् स्वामिना मदनमहोत्सवायोजनं निषिद्धम् ।

कञ्चुकी—भद्रे ! लङ्केदानीं सैन्य-शिविरे परिणता । राज्ये सर्वत्रा-पातस्थितिघोषिता वर्तते । समाहूतो जनस्थानात् सेनापतिरकम्पनः, समुप-स्थितां परिस्थितिं समाधातुम् तत् स्वामिनः समागमनसमयो वर्तते ।

(नेपथ्ये)—रे रे तापस बालिशौ............

कञ्चुकी—कैसी कुशल, वहाँ पर आए हुए किसी आर्यतापस ने नाक काट सूर्पणखा को विरूपित कर दिया ।

मदगन्धा—अरे बहन सूर्पणखा का नासिक च्छेद ! दारूण हो गया । राक्षस-राज के शासन में तापस का ऐसा दुःसाहस !

कञ्चुकी—केवल नासिकाच्छेद ही नहीं ।

मदगन्धा—क्या यम के उदर में बैठे उस मूर्ख तापस ने कुछ और भी अत्या-चार कर दिया ।

कञ्चुकी—और क्या । उस अकेले ने ही वे सभी तीनों खर दूपण त्रिशिरा तथा चौदह सहस्त्र सेना मार डालें ।

मदगन्धा—अरे ! उस अकेले ने ही । तब तो सच ही महान दारूण काण्ड हो गया । ठीक ही किया जो स्वामी ने मदन महोत्सव का आयोजन बन्द कर दिया ।

कञ्चुकी—भद्रे ! लङ्का इस समय सैन्य शिविर में परिणत हो गयी है । राज्य भर में आपात स्थिति घोपित हो गयी हैं । उपस्थिति परिस्थिति के समाधान के लिए सेनापति अकम्पन को जनस्थान से बुलाया गया है । स्वामी के आने का समय हो रहा है ।

(नेपथ्य में) अरे रे मूर्ख तापसो..............

कञ्चुकी—मदगन्धे ! सम्भाव्यते सम्प्राप्त एव स्वामी । तदपेहि दूरादेव, यतो भवत्याऽनवसर-प्रवेशेन कुप्येन्नाम वा लङ्केश्वरः ?

मदगन्धा—सुष्टु भणितं भद्र ! सत्यं मेऽनवसर-प्रवेश एवेदानीमतः स्वामिनो दृष्टिपथादेवापसरामि ।

(इति ससहाया निष्क्रान्ता मदगन्धा कञ्चुकी च)

(नेपथ्ये)—रक्ताधरे ! सभाभवनस्य मार्गमादेशय............इत इतो महाराजः ।

(ततः प्रविशति माल्यवता सह प्रतीहार्यानुगम्यमानः व्यथाकुलः कोपाविष्टो लङ्केश्वरः)

रावणः—(क्रोधं नाटयन्)

रे रे तापस बालिशौ ! ननु जनस्थाने ममाज्ञां बिना,
स्थित्वा विप्रसहं यदप्यकुरुतां रक्षोऽपमानं महत् ।
तद् विच्छिन्न-महेन्द्रविक्रमलसत्-कीर्ति-प्रभा-मण्डलं,
भूयो दण्डयितुं समुद्धतमरिं दोर्दण्डमुज्जृम्भते ।।२।।

सन्तु नाम मे प्रणामाञ्जलयस्तेभ्यो भ्रातृ-जनेभ्यः-
भगिन्या अपमानं येऽसहमाना रणस्थले ।
धन्या वीरगतिं याताः त्रिशिराः खरदूषणौ ।।३।।

कञ्चुकी—मदगन्धे ! लगता है स्वामी आ ही गए हैं। तो दूर रहते ही तुम चली जाओ क्योंकि हो सकता है आप के अनवसर प्रवेश से लङ्केश्वर कुपित हो जाएँ ।

मदगन्धा—भद्र ! सही कह रहे हो । सच ही मेरा इस समय अनवसर प्रवेश ही है इसलिए स्वामी के दृष्टिपथ से ही दूर जा रही हूँ (सहायकों के साथ चली गयी कञ्चुकी भी)

(नेपथ्य में)—रक्ताधरे ! सभाभवन का मार्ग दिखाओ । इधर आइए महाराज ।

(तभी माल्यवान के साथ प्रतीहारी से अनुगम्यमान व्यथाकुल कुपित रावण प्रवश करता है)

रावण—(क्रोध प्रकट करते हुए)

अरे रे मूर्ख तापसो ! मेरी आज्ञा के विना जनस्थान में रहकर राक्षसो का जो महान असह्य अपमान किया है, उसके लिए इन्द्र के विक्रम को काटकर कीर्ति प्रभा मण्डल को शोभित करने वाले मेरे भुजदण्ड पुनः उद्धत शत्रु को दण्डित करने के लिए व्यग्र हो रहे है ।।२।।

उन भाइयों के लिए मेरी प्रणामाञ्जलि हो । वे-धन्य है जो बहन के अपमान को न सहते हुए रणस्थल में तीनों खर दूषण और त्रिशिरा वीर गति को प्राप्त हो गए ।।३।।

माल्यवन्—समाश्वसन्तु नाम महाभागाः, अपराधिनः कृते दण्ड-व्यवस्था विचारणीया । तदत्र सिंहासनमारोहन्तु नाम श्रीमन्तः ।

रावणः—(अश्रृण्वन् इव) आ उत्तरतु नाम तापस !

अवलाया वनोपान्ते विचरन्त्या अकारणम् ।
किं नासाछेदनं नार्या आर्यधर्मस्य लक्षणम् ।।४।।

(सिंहासनमास्थाय) मन्त्रिवर माल्यवन् ! ब्रूहि कीदृशः प्रतिशोधोपायो विचारितः तेषामबलापमानोद्धतानां तापसानां कृते ?

(प्रतीहारी सहसोपसृत्य) विजयतां महाभट्टारकः तत्रभवान् जन-स्थानादागतो दण्डकाञ्चल-सेनाध्यक्षोऽकम्पन-महाभागः श्रीमद्-दर्शनोत्सुको द्वारमध्यास्ते । प्रतीक्षते च श्रीमतामादेशम् ।

रावणः—आम् ! सेनापतिरकम्पनः प्राप्तः तत्त्वरितं प्रवेश्यताम् ।

प्रतीहारी—यथाज्ञापयति महाराजः ।

(ततः प्रविशति सेनापतिवेश-विन्यास-वन्धुरोऽकम्पनः)

अकम्पनः—विजयतां महाराजः ।

रावणः—सेनापते ! इदमासनमास्यताम् ।

माल्यवान्—महाभाग आश्वस्त रहे । अपराधी के लिए दण्ड व्यवस्था का विचार करना है । यहाँ सिंहासन पर श्रीमान् विराजें ।

रावण—(न सुनता हुआ सा) अरे तापस ! उत्तर दो

वन में विचरती हुई अवला की अकारण नाक काट लेना क्या आर्यधर्म का लक्षण है ? ।।४।।

(सिंहासन पर वैठकर) मन्त्रिवर माल्यवान् ! कहिये कैसा प्रतिशोध का उपाय सोचा है उन अबला के अपमान से उद्धत तापसों के लिए ।

(प्रतीहारी सहसा प्रवेश करके)

महाभट्टारक की जय हो । जनस्थान से आए हुए दण्डकाँ चल सेनाध्यक्ष श्रीमान् अकम्पन महाभाग श्रीमान् के दर्शनों के लिए उत्सुक द्वार पर खड़े हैं । श्रीमान् के आदेश की प्रतीक्षा कर रहे हैं ।

रावण—अच्छा सेनापति अकम्पन आ गए । उन्हें शीघ्र भेजो ।

प्रतीहारी—जैसी आज्ञा महाराज ।

(तभी सेनापति के वेश में अकम्पन का प्रवेश)

अकम्पन—महाराज की जय हो ।

रावण—सेनापति इस आसन पर बैठ जाइये ।

अकम्पनः—महाराज राक्षसेश्वर ! जनस्थानगतैस्तापस कुमारैर्यदा चारितम्..............

रावणः—(मध्य एव निषिध्य) तन्मया सर्वं ज्ञातमेव । भगिन्या पूर्वमेवोक्तं तद् दुराचरणं दुर्विनीतयोः । भूयस्तद् वाक्य-विन्यासो पुनर्व्यथयति मदीयं व्यथाकुलं मानसम् ।

भगिन्या नासिकोच्छेदः खरादीनां विनाशनम् ।
विस्फोटयति वक्षो मे जीवत्यद्यापि रावणः ॥५॥

रावणो यदद्यापि जीवति तत्तु प्रतिशोधार्थम् ।

माल्यवान्—आश्वसतु नाम स्वामी । रक्षसां सेना सज्जीकृता वर्तते । समुद्रमार्गेण भारतस्य दक्षिणे पुलिनेऽवतरणव्यवस्था साधिता । केवलं स्वामिनः समादेशमेव प्रतीक्षते ।

रावणः—अहो ! देवलोक-विजयवाहिनी पुनरिमान् मर्त्यान् विजेतुं सन्नद्धेति श्रुत्वा विजृम्भन्ते मे भुजदण्डानि । आर्यावर्त्त-विमर्दनाय स्वयं कालो निमन्त्रितस्तापसेन । स्यान्नाम पुनरुत्तरापथे शिवाराधनम् । अस्तु नाम रक्ष संस्कृते दिग्विजययात्रा ।

अकम्पन —(शिरः कम्पयन्) स्वामिन् ! अत्र किञ्चित् प्रवेशमुख एव बाधा सम्भाव्यते ।

अकम्पन—महाराज राक्षसेश्वर ! जनस्थान में स्थित तापस कुमारो ने जो आचरण किया है............

रावण—(बीच में ही रोककर) यह मैंने सब जान ही लिया है । उन दुर्विनीत तापसों का दुराचरण बहन ने पहले ही कह दिया है । पुनः उन वाक्यों का दुहराना मेरे व्यथाकुल हृदय को फिर व्यथित करेगा ।

भगिनी का नाक काटना और खरादि का विनाश मेरे हृदय को फोड़ दे रहा है, रावण फिर भी अभी जी रहा है । ५॥

रावण जो आज भी जीवित है, वह प्रतिशोध के लिए ।

माल्यवान्—स्वामी धैर्य रखे । राक्षसों की सेना सज गयी है, समुद्र मार्ग मे भारत के दक्षिण तट पर उतरने की व्यवस्था कर ली गयी है । केवल स्वामी के समादेश की प्रतीक्षा है ।

रावण—अहो देवलोक विजय वाहिनी पुन इन मनुष्यों को जीतने के लिए तैयार हो गयी, यह सुनकर मेरे भुजदण्ड अँगड़ाई ले रहे हैं । तापस ने आर्यावर्त को मर्दन करने के लिए स्वयं काल को निमन्त्रित कर लिया है । पुनः उत्तरापथ में शिवाराधन होना चाहिए । रक्षसंस्कृति की दिग विजय यात्रा होने दो ।

अकम्पन—(शिर कंपाते हुए) स्वामिन् ! यहाँ प्रवेश मुख पर ही कुछ बाधा सम्भव है ।

रावणः—अकम्पन ! कीदृशी बाधा नाम रावणस्य दिग्-विजय-संधाने ।

अकम्पनः—अस्ति किष्किन्धानगरे बाली नाम वानरेन्द्रः, श्रीमतां पूर्वपरिचितोऽप्यसौ न विश्वसनीयः । वानराणां शक्तिसम्वर्धने सावधानोऽसौ जनस्थानेऽस्माकं शक्ति-विध्वंसात् कदाचित् पूर्वसन्धिविरोधं कुर्यात् । अपरोऽसौ भल्लूकराजो जाम्बवान् चिरकालादार्यभक्तो दक्षिणापथे रक्षसां मार्गावरोधकः सम्भाव्यते ।

रावणः—भवेदेवं चेत् ततः ।

अकम्पनः—राजन् ! दक्षिणापथे विरोधेनास्माकं विजयाभियानं कठिनतरं भविता । यतः सागरोऽसौ लङ्का संरक्षकोऽपि वहिर्याने बाधको भविष्यति । वायुमार्गेण सैन्याभियानं दुष्करं सम्भाव्यते । बालिना विरोधे तु स्थितिर्विस्फोटका भविष्यति । यतः—

वालिना सह युद्धे चेत् सैन्यशक्तिक्षयो भवेत् ।
आर्यावर्त-जयस्यैवं लक्ष्यं किमधिगम्यते ? ॥६॥

रावणः—अमात्यवर ! अपि नाम श्रुतमकम्पनोक्तम् ? किमत्र विचारितम् तात ! यतः—

रावण—अकम्पन ! रावण के दिग्विजय करने में कैसी बाधा ।

अकम्पन—किष्किन्धा नगर में वाली नामक वानरेन्द्र हैं जो आप का पूर्व परिचित होते हुए भी विश्वसनीय नहीं है । वानरों की शक्तिवर्धन में सावधान वह जनस्थान में हम लोगों की शक्ति नष्ट हो जाने से कदाचित् पूर्वसन्धि का विरोध कर दें और दूसरा वह भल्लूकराज जाम्बवान् चिरकाल से आर्यों का भक्त, दक्षिणापथ में राक्षसों का मार्ग अवरोधक हो सकता है ।

रावण—यदि ऐसा हो तब ?

अकम्पन—राजन् दक्षिणापथ में विरोध से हमारा विजय अभियान कठिनतर हो जाएगा क्योंकि यह समुद्र लङ्का का संरक्षक भी बाहर जाने में बाधक होगा । वायुमार्ग से सैन्य अभियान में कठिनाई की सम्भावना हैं । बालि के विरोध से तो स्थिति विस्फोटक हो जाएगी क्योंकि—

वालि के साथ युद्ध में यदि सैन्यशक्ति का विनाश हो जाए तो इस प्रकार आर्यावर्त जय का लक्ष्य कैसे प्राप्त किया जा सकेगा ॥६॥

रावण—अमात्यवर ! क्या आपने अकम्पन की बात सुनी है ? आपने क्या विचार किया । क्योंकि—

अनाहूतगतं गेहेऽप्यपृष्टं बहुभाषितम् ।
अविचार्य कृतं कर्म, पश्चात् तपति मानसम् ।।७।।

माल्यवान्—विषयेऽस्मिन् सन्धिपक्षे बालि निंवेदयितव्यो यतस्तत् साहाय्यमतीवापेक्षितम् ।

अकम्पनः—अस्ति तात ! तत्रापि सन्देहविषयः । यदि वाली रामपक्षं समर्थयेत् ततोऽतिदुष्करमेतद् भविताभियानम् । अतो नैतत् रुचिकरं प्रतीयते । अनेन कार्यविलम्बोऽपि सम्भाव्यते । यत —

सद्यः प्रकुरुते विद्वानागतस्य प्रतिक्रियाम् ।
विलम्बितस्य कार्यस्य कालः संहरति श्रियम् ।।८।।

रावणः—सेनापते ! तत् किमत्र काचिदन्या रणनीतिर्विचारिता । तदाख्याहि शीघ्रम् यतः—

निकृन्ततीव मर्माणि, छिनत्तीवान्तरं मम ।
धैर्यबन्धं भिनत्तीव, भगिन्या अवमानना ।।९।।

अकम्पनः—अस्ति महाराज ! कूटनीति-प्रक्रिया रिपोरनायासं विनाशाय ।

रावणः—कीदृशीयमाख्याहि सेनापते !

विना बुलाये घर में जाना, विना पूछे वहुत वोलना, विना विचारे कार्य करना, बाद में मन को दुख देते हैं ।।७।।

माल्यवान्—इस विषय पर सन्धि के लिए वालि से निवेदन करना चाहिए क्योंकि इसमें उसकी सहायता की वहुत आवश्यकता है ।

अकम्पन—तात ! वहाँ पर भी संदेह का विषय हैं यदि वालि राम के पक्ष का समर्थन कर देगा तो यह अभियान अति कठिन हो जाएगा । इसलिए यह बात बहुत ठीक नही है । उससे कार्य में विलम्व की भी सम्भावना है । क्योंकि—

विद्वान् पुरुष आगत की तत्काल प्रतिक्रिया करता है और विलम्ब से किए गए कार्य का महत्व समय नष्ट कर देता है ।।८।।

रावण—सेनापति ! तो क्या यहाँ कोई अन्य रणनीति सोची है उसे शीघ्र वताये । क्योंकि—

वहन की अपमानना मर्म को काट सी रही है, हृदय को चीर सी रही है मानो मेरे धैर्य के वाँध को तोड़ दे रही है ।।९।।

अकम्पन—है, महाराज ! कूटनीति की प्रक्रिया, शत्रु के अनायास विनाश के लिए ।

रावण—कैसी है यह, बताइये, सेनापति ।

अकम्पनः—तदेषा, तापसज्यायसोऽस्ति प्राणेभ्योऽप्यधिकप्रियाभार्या सीता नाम । निर्वासितोऽपि वने तामसौ सहैवानयत् ।

रावणः—आम् ! जानीमस्तां सीतां जनकतनयां यामसौ धनुर्भङ्क्त्वोदवहत् ।

अकम्पनः—इयमेव सीता भगिन्या अपमानस्य चास्या आपदो मूलकारणमत्र दण्डके वर्तते । अस्या अपहरणं तापसविनाशस्यापि मूलकारणं भविता ।

राज्यान्निर्वासितो रामस्तापसोऽसौ सलक्ष्मणः ।
सीता-वियोग-संतप्तः प्राणान् संत्यक्ष्यति ध्रुवम् ।।१०।।

रावणः—सा च वराकी सीता, नीता दूरं तपस्विसान्निध्यात् ।

अकम्पनः—सुखमेधिता सहर्षं भविता भवतोऽङ्कशायिनी सौधे ।।११।।

माल्यवान्—शान्तं पापम् । कथमेतल्लङ्केश्वरेण सम्भाव्यते ?

रावणः—सम्भाव्यते, अमात्यवर ! अपरिचितोऽसि रूपसौन्दर्येण सीतायास्तत एवं भाषसे ।

माल्यवान्—सर्वथैतद् राजन् ! श्रीमतां धवलयशोऽभिरामचरितानां विपरीताचरणं परदारापहरणम् । कथमेतत् सम्भाव्यते राक्षसेश्वरेण ?

अकम्पन—वह यह है, बड़े तापस की प्राणों से भी प्रिय सीता नामक पत्नी है निर्वासित होते हुए भी वह उसको साथ ही लाया है ।

रावण—हाँ जानता हूँ उस जनकपुत्री सीता को जिससे उसने धनुष तोड़कर विवाह किया ।

अकम्पन—यही सीता भगिनी के अपमान तथा इस आपत्ति का मूल कारण इस दण्डक वन में वर्तमान है । उसका अपहरण तापसो के विनाश का भी मूल कारण हो जाएगा ।

राज्य से निर्वासित यह तापस राम सीता के वियोग से दुखी लक्ष्मण सहित निश्चय ही प्राण छोड़ देगा ।।१०।।

रावण—तपस्वियों के सामीप्य से दूर की हुई और वह बेचारी सीता ?

अकम्पन—सुख से सहर्ष पलेगी और महलों में आपकी अङ्कशायिनी होगी ।।११।।

माल्यवान्—शान्त हो पाप ! लङ्केश्वर से यह कैसे सम्भव है ?

रावण—मन्त्रिवर ! सम्भव है तुम सीता के रूप सौन्दर्य से अपरिचित हो इसीलिए ऐसा कह रहे हो ।

माल्यवान्—राजन् ! परनारी का अपहरण श्रीमान् के उज्ज्वल यश से अभिराम चरित्र के सर्वथा विपरीत आचरण है । राक्षसराज से यह कैसे सम्भव है ।

अकम्पनः—भगिन्या नासिकाच्छेदनं किमार्याचरणानुकूलं किमनेन दाशरथेः श्रीवृद्धिः सम्भाव्यते । तदेतत् स्वामिनः "शठे शाठ्यं समाचरणं" कथञ्चित् नाम राजनीतेर्नैव विपरीतं नाप्यशोभनं भविता ।

माल्यवान्—अकम्पन ! किं नाम लङ्केश्वरं······(इत्यर्धोक्ते)

रावणः—विरम्यतां माल्यवन् ! भगिन्या अपमानव्याकुलस्य रावणस्य कृतेऽस्मिन् काले सर्वं सम्भाव्यते । रामरहितस्यार्यावर्तस्य विजयोऽपि सरलीभविता । तदत्र कूटनीतिलाभोऽपि दृश्यते ।

माल्यवान्—यथा रोचते श्रीमते । परमत्र प्रस्तावे मद् विरोधत्वपरिवर्तनीयो वर्तते ।

रावणः—अमात्य ! तदत्र गम्भीरेऽस्मिन् विचारणीये प्रस्तावे तवेदृशं बालिशत्वं न मे रुचिकरं सम्पद्यते ।

माल्यवान्—यदि चेदीदृशी स्वामिने विवेकशून्या-कार्य-पद्धती रोचते तदा मदीयोपस्थिति निरर्थकं प्रतीयते । तथापि राक्षसेन्द्र ! श्रूयताम्—

विकृतनिजविवेका यत्र भूपा मदान्धा,
विगलितमतिमन्दा मन्त्रिणश्चाटुकाराः ।
अनुभवति विषादं वन्दिनी लोकवाणी,
पतनपथगतं तद् ध्वंसते राज्यमाशु ।।१२।।

अकम्पन—भगिनी का नासिकाछेदन क्या आर्यों के आचरण के अनुकूल है। क्या इससे दशरथकुमार की श्री वृद्धि सम्भव है। तब यह स्वामी का "शठ के साथ शठ का आचरण" किसी प्रकार न तो राजनीति के विपरीत और न ही अशोभन होगा।

माल्यवान्—अकम्पन ! क्या लङ्केश्वर को······(आधा ही कहने पर)

रावण—माल्यवान् ! रुक जाओ। भगिनी के अपमान से व्याकुल रावण के लिए इस समय सब कुछ सम्भव है। राम रहित आर्यावर्त की विजय भी सरल हो जाएगी। तो इसमें कूटनीतिक लाभ भी दिखाई देता है।

माल्यवान्—जैसी श्रीमान् की इच्छा, पर इस प्रस्ताव में मेरा विरोध तो अपरिवर्तनीय है।

रावण—अमात्य ! इस गम्भीर विचारणीय प्रस्ताव पर तुम्हारी ऐसी मूर्खता मुझे पसन्द नही है।

माल्यवान्—यदि स्वामी को इस प्रकार की विवेक शून्य कार्य-पद्धति पसन्द है तो मेरी उपस्थिति निरर्थक प्रतीत होती है। फिर भी राक्षसेन्द्र ! सुन लें—

जहाँ मदान्ध राजा अपना विवेक विकृत कर लेते हैं, जहाँ विगलित मति से मूर्ख मन्त्री चाटुकार हो जाते हैं, जहाँ लोक वाणी बन्दिनी होकर विषाद का अनुभव करती है, पतनपथ पर जाता हुआ वह राज्य शीघ्र नष्ट हो जाता है ।।१२।।

रावणः—(क्रोधेन) आः ! वृद्धत्वं तेऽनुस्मरामि। अपेहि मद् दृष्टि-पथात् दूरम्—

माल्यवान्—राजन् ! अहमेष गच्छामि (इति निष्क्रान्तः)

रावणः—दूरीभूतोऽसौ मिथ्यादम्भदलितो मलिनो माल्यवान्। ब्रूहि सेनापते ! कीदृशी तदपहरणव्यवस्था व्यवसिता भवता ?

अकम्पनः—अस्त्यस्माकं मातुलो मारीचो नाम राक्षसः मायारूपकला कुशलः, असौ कौशिकयज्ञविध्वंसेन प्रताडितो रामेण बद्धवैरोऽपि वर्तते।

रावणः—अस्त्यसौ, चिराद्दृष्टोऽपि मयि स्निह्यति। तद् ब्रूहि नः, कथमेष मे सहायको भवेत्।

अकम्पनः—तदेषा रहस्यमयी मन्त्रणा षट्कर्णपतिता भिद्यते अतः कर्णे कथनीया (कर्णे-लग्नो निवेदयन्) एवमसौ साधयितास्माकं मनोरथान् मारीचः।

रावणः—(कर्णे कृतवार्ताप्रभावमभिनयन्) साधु सेनापते ! साधु अकम्पन ! कूटकला-प्रवीण इव लक्ष्यसे।

अकम्पनः—स्वामिचरणप्रसादेन यद् ज्ञातं तच्छ्रीमतो निवेदितम्। अग्रे श्रीचरणाः प्रमाणम्।

रावण—(क्रोध से) अरे तेरे बुढ़ापे का ध्यान आता है। मेरे दृष्टि पथ से दूर चला जा।

माल्यवान्—राजन् ! मैं यह जा रहा हूँ (निकल गया)

रावण—दूर हो गया, यह मिथ्यादम्भ से दलित मलिन माल्यवान्। अब बताओ सेनापति। उसके अपहरण की आपने कैसी व्यवस्था की है।

अकम्पन—हम लोगों का मामा मारीच नाम का राक्षस माया रूपकला में कुशल है। कौशिक यज्ञ के विध्वंस में चोट खाया हुआ वह राम से वैर भी रखता है।

रावण—है वह, बहुत समय से नहीं देखा है फिर भी मुझसे स्नेह करता है। मुझे बताइए वह मेरा कैसे सहायक होगा।

अकम्पन—यह रहस्यमयी मन्त्रणा छः कानों में पड़ने से फैल सकती है। इसलिए कान में कहना है। (कान में कहता हुआ) इस प्रकार वह मारीच हम लोगों के मनोरथ को पूरा कर देगा।

रावण—(कान में कही बात के प्रभाव का अभिनय करता हुआ) धन्य हो सेनापति ! धन्य हो अकम्पन ! कूटकलाप्रवीण से प्रतीत होते हो।

अकम्पन—स्वामी के चरण प्रसाद से जो जाना है वह श्रीमान् से निवेदन कर दिया। आगे आप ही प्रमाण हैं।

रावणः—अकम्पन् ! तदियं योजना सफलीभवेत् तदर्थं मारीचमनुसराम्यहं त्वयापि जनस्थानस्थितिज्ञानाय तत्रैव गन्तव्यम् ।

अकम्पनः—यथाज्ञापयति राक्षसेन्द्रः (इति निष्क्रान्तः)

रावणः—आः तापस ! अनायासमेव विजितोऽसि कूटनीतिप्रहार एव पर्याप्तं लक्ष्यते त्वद् विनाशाय ।

उद्दण्डमुद्दण्डयितुं रणेऽप्यसौ
शक्तोऽपि दोर्दण्डबलेन वैरिणम् ।
मारीचकूटैरपहृत्य जानकीं,
बिना श्रमं शोधयिता दशाननः ॥१३॥

अरे रे ! तापस ! पश्यैषोऽहमागच्छामि ।

इति निष्क्रान्तः

(ततः प्रविशति वैष्णववेशधरो मारीचः)

मारीचः—दुष्टासक्तिर्मलिनमकरोन्मानसं मामकीनम्,
पापाचारैरधमचरितै यौवनं मे व्यतीतम् ।
रामज्योतिः प्रखरविशिखोत्खातमोहान्धकारं,
प्राप्योद्बुद्धो जरठ-वयसीत्यप्यहो ! सामयीनम् ॥१४॥

रावण—अकम्पन ! तुम्हारी यह योजना सफल हो इसके लिए मैं मारीच का अनुसरण करता हूँ । तुम्हें भी जनस्थान की जानकारी के लिए वहीं जाना चाहिए ।

अकम्पन—जैसा राक्षसेन्द्र आदेश देते हैं (चला गया)

रावण—अरे तापस ! अनायास ही जीत लिया, कूटनीति का प्रहार ही पर्याप्त है तुम्हारे विनाश के लिये—

रण में भी भुजाओं के वल से उद्दण्ड को दण्डित करने के लिए शक्ति रखता हुआ भी, यह रावण मारीच के कपट से सीता का हरण करके बिना श्रम ही शत्रु को नष्ट कर देगा ॥१३॥

अरे रे तापस ! देख यह मैं आ रहा हूँ ।

(निकल गया)

(वैष्णव वेशधारी मारीच का प्रवेश)

मारीच—दुष्ट की आसक्ति ने मेरा जीवन मलिन कर दिया । पापाचार और अधम चरित्र से मेरा यौवन बीत गया । अरे ! प्रखर वाण से मोह के अन्धकार को मिटाने वाली राम की ज्योति को पाकर मैं बुढ़ापे में भी जग गया हूँ तो यह भी अभी समय से है ॥१४॥

(दूरं विलोकयन्) कथमेष दशग्रीव इत एव समायाति ननु नाम दैवेन किं चेष्टितम् ।

(ततः प्रविशति दशग्रीवः)

रावणः—अहो मातुल ! राक्षसेन्द्रोऽसौ प्रणामपुरःसरमञ्जलिं समर्पयति ।

मारीचः—अहो ! भागिनेयः सम्प्राप्तः । पौलस्त्य ! अपि नाम सर्वं कुशलं वर्तते ?

रावणः—मातुल ! जनस्थान-काण्डमाकर्ण्य कीदृशं कुशलं नाम ।

मारीचः—आकर्णितं मयातीव हृदय-विदारकं दुर्वृत्तम् ।

रावणः—इत्यपकृतेऽपि राक्षसेन्द्रोऽद्यापि जीवति, मातुल ! किमेतन्नाश्चर्यकरम् ?

मारीचः—दैवदुर्विपाकोऽयमिति किमुच्यते ? दुष्कृतेऽस्मिन् मूलकारणं सूर्पणखैवासीत् ।

रावणः—मातुल ! कथमेतत् सम्पद्यते । अबलोपरि शस्त्र-प्रहार-क्रिया किमत्र न धिक्करणीया ।

मारीचः—करणीया, किन्तु सीताघात-प्रयासेऽपराधी वध्यएवासीत् तथापि रामानुजेनाबलात्वात् सूर्पणखा केवलं विकृता न व्यापादिता ।

(दूर देखते हुए) यह दशग्रीव इधर ही कैसे आ रहा है जाने दैव की क्या चेष्टा है ।

(तभी दशग्रीव प्रवेश करता है)

रावण—अरे मामा ! यह राक्षसेन्द्र प्रणाम पुरस्सर अञ्जलि समर्पित करता है ।

मारीच—अरे ! भागिनेय आ गये । पौलस्त्य सब कुशल तो है ?

रावण—जनस्थान के काण्ड को सुनकर कैसी कुशल ।

मारीच—सुना तो है मैंने, अत्यन्त हृदय विदारक बुरा समाचार है ।

रावण—इस अपकार के होने पर भी राक्षसेन्द्र आज भी जीवित है मातुल ! क्या यह आश्चर्य कर नही है ?

मारीच—दैव का दुष्परिणाम है अतः क्या कहा जाए । इस दुष्कार्य का मूलकारण सूर्पणखा ही थी ।

रावण—मामा ! यह कैसे हो सकता है अबला के ऊपर शस्त्र प्रहार करना क्या धिक्कार योग्य नही है ।

मारीच—करने योग्य है किन्तु सीता की हत्या के प्रयास में अपराधी वध्य ही था फिर भी राम के अनुज ने नारी के कारण सूर्पणखा को विकृत कर दिया मारा नही ।

रावणः—भवेदेवं मातुल ! तथापि जनस्थाने तापसकुमाराणामीदृशं दुःसाहसाचरणं कथं सह्यते दशग्रीवेण ?

मारीचः—मर्षणीयौ नाम तापसकुमारौ राजन् ! यतस्तौ साधन-विहीनौ बनवासिनौ भार्यापमानकृतापराधावपि राक्षसेन्द्रेण मर्षणीयौ महाभागेन ।

रावणः—मातुल ! सत्यमेव जरठः सम्वृतोऽसि यतः—

दुष्कृतेऽप्यपमानेऽपि तापसेन बनौकसा ।
मर्षणीयं मया सत्यं रावणेन महौजसा ॥१५॥

तत्तात ! श्रूयताम्—

प्रतिशोधाग्नि-संदाहे भस्मीकर्तुं तपस्विनौ ।
इन्धनत्वेन साहाय्यं कर्त्तुमर्हसि मातुल ! ॥१६॥

मारीचः—कीदृशः प्रतिशोधः राक्षसेन्द्र !

रावणः—सीतापहरणरूपः, सूर्पणखापमानप्रतिशोधः । यतस्तद् वियोगेन रामो जीवनधारणेऽक्षमो भविता । रामे मृते तस्यानुजस्यापि गतिस्तादृगो भवितैव । पश्य मातुल—

रावण—हुआ करे—मामा ! फिर भी जनस्थान में तापस कुमारो का ऐसा दुःसाहस पूर्ण आचरण रावण कैसे सह सकता है ?

मारीच—राजन् ! तापस कुमारो पर दया कर दो । क्योंकि वे साधन हीन वनवासी है, पत्नी के अपमान से अपराध करने वाले भी आप राक्षसेन्द्र द्वारा दया योग्य है ।

रावण—मातुल ! सचमुच ही बूढ़े हो गए हो ।

वनवासी तापस द्वारा दुष्कृत अपमान करने पर भी महाशक्ति शाली रावण द्वारा सच ही क्षमा कर देना चाहिए ॥१५॥

तो तात ! सुन लीजिए—

प्रतिशोध की अग्नि की लपटो में दोनों तापसों को भस्म करने के लिए, मातुल ! तुम ईधन के रूप में सहायता करने के योग्य हो ॥१६॥

मारीच—राक्षसेन्द्र ! कैसा प्रतिशोध !

रावण—सीता अपहरण रूपी, सूर्पणखा के अपमान का प्रतिशोध । क्योंकि उसके वियोग में राम जीवन धारण में असमर्थ हो जाएगा । राम के मरने पर उसके अनुज की भी वही गति होगी । देखो मातुल !

विना युद्धं विना शक्तिक्षयं शत्रुविनाशनम् ।
दण्डहानिमकृत्वैव चतुरो हन्ति पन्नगम् ।।१७।।

मारीचः—शान्तं पापम् । रक्षःसंस्कृतेः संरक्षकस्येदृशी चौर्यप्रवृत्तिः । अबलापमान-प्रतिशोधोऽबलापमानेन ? किमिदं विश्वविजयिनो रावणस्य कृते नायशः कारणं भविता ?

कीदृशी पुरुषस्येह प्रवृत्तिः पतनोन्मुखी ।
ययाप्युभयथा नारी पुरुषेणावमन्यते ।।१८।।

पुरुषेण कृतापमानलीलाप्रतिशोधे यदि दण्डयन्ति नारीम् ।
पुरुषा निजपौरुषप्रमत्ता भुवने ते तु कलङ्कयन्ति शौर्यम् ।।१९।।

तदियं मे प्रार्थना, यदार्यललनापमानाद् विरमन्तु महाभागाः ।

रावणः—मातुल ! न मेऽबलापमान-प्रवृत्तिस्तथापि कूटनीतिकारणादेवं विधीयते । यतः—

साध्य-प्रकरणे विज्ञाः कार्यसाफल्यसाधकाः ।
साधनेषु प्रवृत्तेषु न किञ्चिद् दोष-दर्शिनः ।।२०।।

मारीचः—किमनेन प्रतिशोधेनार्यरक्षसां विरोधविरहो भविता किमत्र-महाद्वीपे वैरेण विकासः सम्भाव्यते ? किमत्र धर्मजातिसंस्कृतिव्यवहार-परम्परा मानवताविकासाय ? विनाशाय वा जायते ।

विना युद्ध, विना शक्ति क्षय के शत्रु विनाश । दण्ड की हानि विना किए ही चतुर लोग साँप को मार लेते है ।।१७।।

मारीच—पाप शान्त हो । रक्षसंस्कृति के संरक्षक की ऐसी चोरी में प्रवृत्ति । अबला के अपमान का बदला अबला के अपमान से । क्या यह विश्वविजयी रावण के लिए अपयश का कारण नही होगा ।

यह पुरुष की कैसी पतनोन्मुखी प्रवृत्ति है जिससे नारी दोनों ओर से पुरुष द्वारा अपमानित की जाती है ।।१८।।

पुरुष के द्वारा अपमान के प्रतिशोध में पुरुष यदि नारी को दण्डित करते हैं तो अपने पौरुष में प्रमत्त वे तो अपने शौर्य को ही कलंकित करते हैं ।।१९।।

तो मेरी यह प्रार्थना है कि आर्यनारी के अपमान से आप विरत हो जाए ।

रावण—मातुल ! मेरी अबला के अपमान की प्रवृत्ति नही है फिर भी कूटनीति के कारण ही ऐसा करना पड़ रहा है । क्योंकि—

कार्य की सफलता की साधना करने वाले पुरुष साध्य प्रकरण में प्रयोग किए जाने वाले साधनों में कुछ भी दोष नही देखते हैं ।।२०।।

मारीच—क्या इस प्रतिशोध से आर्य और राक्षसों में विरोध समाप्त हो जाएगा । क्या इस महाद्वीप में वैर से विकास सम्भव है । क्या यहाँ धर्म जाति संस्कृति की व्यवहार परम्परा मानवता के विकास के लिए हैं अथवा विनाश के लिए ?

रावणः—मातुल ! किमेतद् विस्मृतं यदार्यैरस्मत्प्राचीनसंस्कृते विनाशो विहितः । तदुद्धर्तुमेवकृतप्रतिज्ञा वयम् ।

मारीचः—कीदृशोऽसौ जाति-धर्म-संस्कृति-परिवेशो यः स्वरक्षार्थमन्यान् वाधते । यत्कृते नगराणि उच्छिद्यन्ते ग्रामा अग्निसाद् भवन्ति, वालवृद्धावलाः पशुमारं मार्यन्तो । अहो पुरुष एव पुरुषरक्तपिपासुकः सम्पद्यते । तच्छ्रूयतां लङ्केश्वर !

बद्धवैरो यदा धर्मो जाति र्वा संस्कृति र्भवेत् ।
विहितस्वार्थसम्बन्धा विनाशायैव केवलम् ॥२१॥

रावणः—अस्तु नामैतत् तथापि कूटनीतिजयेनानेनास्माकं विजयवाहिनी निर्बाधं सागरमुत्तीर्य विन्ध्यं लङ्घयन्ती,आर्यावर्तमनायासमेव जेस्यति ।

मारीचः—स्वर्गो विजितस्त्वया । यक्षकिन्नरनागान् पराजित्यापि रक्षःसंस्कृति-प्रसारो नोपचितः । न क्वापि त्वद्-धर्मोद्धारका उत्पन्नाः । अतः परं पश्य, त्वद्-भ्राता विभीषणः स्वयमार्यधर्मस्य पोषकः । स्वयं राजन् ! त्वमप्यार्यरक्तेन पोषितोऽसि, वेदानां पण्डितोऽसि । तत्कथमार्यधर्मविनाशेन स्वधर्मोत्थानं सम्पद्यते ।

रावण—मातुल ! क्या यह भूल गए हो कि आर्यो ने हमारी प्राचीन संस्कृति का विनाश कर दिया था हम उसी के उद्धार के लिए कृतप्रतिज्ञ है ।

मारीच—यह कैसा जाति-धर्म-संस्कृति का परिवेश हैं जो अपनी रक्षा के लिए दूसरों का विरोध करता है । जिसके लिए नगर उजड़ जाते हैं, ग्राम जला दिए जाते हैं, वाल वृद्ध और अवला पशु की भांति मारे जाते हैं । आश्चर्य है कि पुरुष ही पुरुष के रक्त का प्यासा हो जाता है । तो सुन लो लङ्केश्वर !

जब धर्म जाति या संस्कृति दूसरों से शत्रुता पूर्ण व्यवहार करते है तब वह स्वार्थ से सम्बद्ध केवल विनाश के लिए ही होते है ॥२१॥

रावण—हुआ करे यह, फिर भी इस कूटनीतिक विजय से हमारी विजयवाहिनी निर्वाध सागर को पार कर विन्ध्य को लांघती हुई आर्यावर्त की अनायास ही विजय कर लेगी ।

मारीच—तुमने स्वर्ग पर विजय प्राप्त की । यक्ष किन्नर नागों को पराजित करके भी रक्ष संस्कृति का प्रसार नही हुआ । कही भी तुम्हारे धर्म का उद्धारक पैदा नही हुआ । इसके आगे देखो तुम्हारा भ्राता विभीषण स्वयं आर्य धर्म का पोषक है । स्वयं राजन् ! तुम भी आर्य रक्त से ही पोषित हो, वेदों के पण्डित हो । तो किस प्रकार आर्य धर्म के विनाश से अपने धर्म का उत्थान हो सकता है ।

रावणः—मातुल ! स्वयं रामस्य वनयात्रा रक्षसां विनाशायार्यधर्म-प्रसारायैव विहिता ।

मारीचः—राजन् ! सैन्य-शक्ति बिना, बलात् कथं धर्मपरिवर्तनं सम्भाव्यते । रामस्तु पदातिस्तापस एव । तत् किमेतदभियानं धर्मविजयाभि-यानं सैन्यशक्तिबलेन, अथवा हृदयपरिवर्तनाभियानं मानवताप्रसारेण ?

रावणः—एतेनाप्यस्माकं संस्कृतेर्विनाशोऽवश्यम्भावी प्रतीयते ।

मारीचः—नान्यथा चिन्तयित्वा । संस्कृतेरेकस्मिन् पुष्पस्तवके गुम्फि-तानि विविधानि धर्मपुष्पाणि बहुतरं शोभन्ते । पश्य तात ! अस्माकं धर्मे विहिता मूर्तिपूजा, मातृदेवताश्वत्थार्चना, आर्यैः प्रागेव स्वीकृता । अस्माक-मादिदेवः शिवोऽप्यार्यधर्मे महादेवत्वं प्राप्तः । लिङ्गार्चनाऽपि प्रचारिता तैः । अधुनार्यसंस्कृतेः स्वरुपोऽस्मत्संस्कृतिं बिनाऽपूर्ण एव । अतस्तात ! तथा विधेयं येन सर्वधर्मविकासे कापि बाधा नोत्पद्येत इयमेव मज्जीवनस्य चरमानुभूतिः ।

रावणः—परं मातुल ! कथं सूर्पणखापमानप्रतीकारो विधीयते ।

मारीचः—किमत्र प्रतीकारोऽपरिहार्य एव ? पश्य—

रावण—मातुल ! स्वयं राम की बन यात्रा राक्षसों के विनाश और आर्य धर्म के प्रसार के लिए ही हुई है ।

मारीच—राजन् ! सैन्य शक्ति के विना वलात् किस प्रकार धर्म परिवर्तन सम्भव है । राम तो पदाति तापस मात्र हैं । तो क्या यह अभियान सैन्य शक्ति वल से धर्मविजयाभियान है अथवा मानवता प्रसार के द्वारा हृदय परिवर्तन का अभियान ?

रावण—इससे भी हमारी संस्कृति का विनाश अवश्यम्भावी प्रतीत होता हैं ।

मारीच—आप अन्यथा न सोचे । संस्कृति के एक पुष्पस्तवक में गूँथे हुए अनेक धर्म पुष्प अधिक शोभित होते हैं ।

देखो तात ! हमारे धर्म में प्रचलित मूर्ति पूजा मातृ देवता अश्वत्थ अर्चना आर्यों ने प्रथम ही स्वीकृत कर ली है । हमारे आदि देव शिव को आर्य धर्म में महा-देवत्व प्राप्त है । उन्होंने लिङ्गार्चना का भी प्रचार किवा है । अव तो आर्य संस्कृति का स्वरूप हमारी संस्कृति के विना अपूर्ण ही है । अतः तात ! ऐसा करें जिससे सर्व धर्म विकास में कोई वाधा न उत्पन्न हो यही है मेरे जीवन की चरम अनुभूति ।

रावण—परन्तु मातुल ! सूर्पणखा के अपमान का प्रतीकार कैसे किया जाए ?

मारीच—क्या यहाँ प्रतीकार अपरिहार्य ही है ? देखो—तात ! प्रतिकार की

न क्वचिच्छाम्यते तात ! प्रतिकार-प्रतिक्रिया ।
परिणामो भवेत् तस्याः समग्रं लोकनाशनम् ॥२२॥

रावणः—भवेन्नाम यद् भव्यम् । अत्र त्वया मे सहायता सम्पादनीया ।

मारीचः—कीदृशी नाम सहायता मया जरठेन विधीयते !

रावणः—शृणु तात !

मायामृगरूपधरो रामं दूरं तथा नयस्व त्वम् ।
भिक्षुकरूपधरोऽहं सीतां हर्यां यथा कुटीरान्तात् ॥२३॥

मारीचः—राक्षसेन्द्र ! विनष्टं मे जीवनमेतद् दुराचारेण कथमप्यधुना परलोकसाधने लग्नस्य मे लोक द्वयविनाशने कथं ते दुर्मतिः संलग्ना । क्षमस्व, मां विहाय जरठं, कमप्यन्यं साहाय्यं विधेहि । नैतत् सम्भाव्यते मया । एतदपि जानीहि—

सीतापहरणमेतद् रक्षोवंशं कलङ्कयेदेव ।
शङ्कितचित्ता नारी दास्यति भिक्षां न साधुभ्यः ॥२४॥

रावणः—(स्वगतम्) असौ दुरात्मा तु सत्यं विरोधे स्थितः, गोप्य-रहस्यमपि ज्ञातं 'षट्कर्णोभिद्यते मन्त्रः' यथा प्रागेवाकम्पनेनोक्तं तदेवमसौ

प्रतिक्रिया कहीं शान्त नही होती है और उसका परिणाम होता है, समग्र लोक विनाश ॥२२॥

रावण—हो जो होना है, यहाँ तुम्हे मेरी सहायता करनी है ।

मारीच—यह वृद्ध कैसी सहायता कर सकता है ।

रावण—सुनो तात !

माया मृग रूपधारी तुम इस प्रकार राम को दूर ले जाना जिस से भिक्षुक रूपधारी मैं कुटी से सीता का हरण कर सकूँ ॥२३॥

मारीच—राक्षसेन्द्र ! मेरा यह जीवन दुराचार से नष्ट हो चुका है । अब किसी प्रकार परलोक साधन में लगे हुए मेरे दोनों लोको के विनाश में तुम्हारी दुर्मति क्यों लगी हुई है । क्षमा करें, मुझ वृद्ध को छोड़कर किसी अन्य को सहायक बना लें । यह मुझसे नही होगा । यह भी जान लो—

सीता का यह अपहरण राक्षस वंश को तो कलंकित कर ही देगा । शंकित मन वाली अब कोई नारी साधुओं को भिक्षा नही देगी ॥२४॥

रावण—(स्वगत) यह दुरात्मा तो सत्य ही विरोध में स्थित हो गया, 'षट्कर्णेभिद्यते मन्त्रः' जैसा पूर्व ही अकम्पन ने कहा था, इसने गोप्य रहस्य भी ज्ञात

मार्गमानेतुं न शक्यते। (प्रकटं, क्रोधमभिनयन्) मारीच ! त्वं केवलं मातुलोऽसि। नास्यवध्यो नाम। तदेतत् सीतापहरणरहस्यं ज्ञात्वापि नकारेण जीवितुमिच्छसि अतो रहस्यभेदिनस्ते यावच्छिरश्छेदो न विधीयते तावन्निर्णयेन मां त्वरितं विज्ञापय (इति खड्गमाददाति)

मारीचः—अहो मृत्युभयात् मामुद्वेजयति । तथापि दुरात्मन् ! त्वद्धस्तमरणाद् रामशरतीर्थ एव प्राणार्पणं वरम्। तथापि श्रूयताम्—

वृद्धवाक्यं च सन्नीतिर्यत्रादत्ते बिडम्बनाम्।
विनाशलक्षणं तत्र प्रवदन्ति मनीषिणः ॥२५॥

रावणः—साधु भो मातुल साधु ! समुपकृतोऽहं त्वया सफलो मेऽधुना मनोरथः (आकाशे) रे तापस ! एषोऽहमागच्छामि त्वद् वंशधूमकेतुरार्यावर्त-विनाशहेतुरेषोऽहमागच्छामि।

(इति निष्क्रान्तः)

मारीचः—

रक्षाविधान-परिकल्पनया स्वजातेः,
संघर्षमुद्धतजनै र्म्रियते यदैव।

कर लिया। तो इस प्रकार यह मार्ग पर नही लाया जा सकता (प्रकट, क्रोध करते हुए) तुम केवल मातुल हो, अवध्य नही हो, तो यह सीता हरण का रहस्य जानकर भी नकार से जीवित रहना चाहते हो तो रहस्य भेदी तेरा जव तक शिर काट दूँ तव तक अपने निर्णय से मुझे शीघ्र ही सूचित कर (खड्ग उठाता है)

मारीच—अरे ! मृत्यु भय से मुझे उद्‌विग्न करता है फिर भी दुरात्मन् ! तेरे हाथ से मरने की अपेक्षा राम के शर तीर्थ में ही प्राण अर्पण अच्छा है।

तथापि सुन ले—

वृद्धों के वाक्य और सन्नीति जहाँ विडम्बना प्राप्त करते हैं वहाँ मनीपी विनाश के लक्षण कहते हैं ॥२५॥

रावण—धन्य हो मातुल धन्य मैं तुम्हारा उपकृत हुआ तुमने अब मेरा मनोरथ सफल कर दिया। (आकाश में) रे तापस ! यह मैं आ रहा हूँ तुम्हारे वंश का धूम केतु, आर्यावर्त का विनाश हेतु, यह मैं आ रहा हूँ।

(निकल गया)

मारीच—अपनी जाति की रक्षा विधि की परिकल्पना में उद्धत लोगों ने जब

हिंसा-विनाशबलपद्‌दलिता तदैव
रक्ताश्रुभि र्जगति मानवता रुरोद ॥२६॥

को नाम मृत्युभयतो न पलायतेऽसौ
भूयो भ्रमन् पतति तस्य मुखेऽवशोऽपि ।
सौभाग्यमस्य धनुरुद्यतबाणविद्धो,
रामस्य पादपतितो वृणुते स्वमुक्तिम् ॥२७॥

इति निष्क्रान्तः

समाप्तोऽसौ तृतीयोऽङ्कः

भी संघर्ष का वरण किया है तभी संसार में हिंसा और विनाश बल से पद दलित मानवता खून के आँसुओं से रोई है ॥२६॥

यह कौन है जो मृत्यु के भय से नही भागता, फिर भी घूमता हुआ विवश उसके मुख में गिर जाता है। सौभाग्य उसका है जो धनुष से उद्यत बाण से विद्ध राम के पैरों में पड़ा हुआ अपनी मुक्ति का वरण करता है।

(चला जाता है)

तीसरा अङ्क समाप्त

✻ ॐ ✻

चतुर्थोऽङ्कः

(अथ विष्कम्भकः)

(ततः प्रविशतः पुष्पावचयं नाटयन्तौ तापसकुमारौ)

प्रियव्रतः—यथाज्ञपितोऽस्मि गुरुणा 'वत्स यदद्य भगवतो रामस्य खर-वधप्रशमितराक्षसातङ्कस्य पुष्पाभिषेकेण मुनिभिराशीर्वचनसमारोहो विधेय इत्यतः शीघ्रं पुष्पावचयं विधाय निवर्तस्व' तद् यथा शीघ्रं पुष्पाण्यवचिनोमि।

सत्यव्रतः—भद्र ! इति कृत्वैवोपाध्यानेन शालायामवकाशो घोषितः। अहमपि तथैवादिष्टो गुरुणा यदद्यैवार्यरामस्य जन्मदिवसोऽपि वर्तते तद् बहुतरं विधेयो महोत्सवः।

प्रियव्रतः—खरादिबधेनाद्य प्रशान्तं जनस्थानम्। राक्षसातङ्कशून्योऽसौ प्रथम एवेदृशः समारोहो भविता।

सत्यव्रतः—कथं राक्षसानां, वद रक्षोधर्मप्रचारकाणाम्।

प्रियव्रतः—कीदृशोऽयं धर्मो यमधिकृत्यास्य प्रसारका न केवल-मार्यानुष्ठानानि विध्वंसयन्ति निरीहान् बालवृद्धान् निघ्नन्त्यपि मुनिमांस-भक्षणेऽनुरक्ता इमे रक्तपानेन प्रसीदन्ति।

(विष्कम्भक प्रारम्भ)

(पुष्प चुनते हुए दो तापस कुमारों का प्रवेश)

प्रियव्रत—जैसी गुरु जी ने आज्ञा दी है कि "वत्स ! खर के वध से राक्षसों का आतङ्क शान्त करने वाले राम का मुनियों के द्वारा आशीर्वचन समारोह किया जाना है" अतः शीघ्र ही पुष्प चुनकर लौट आओ, अतः यथा शीघ्र पुष्प चुन रहा हूँ।

सत्यव्रत—भद्र ! इसी कारण उपाध्याय ने पाठशाला में अवकाश घोषित कर दिया हैं। मुझे भी गुरु जी ने वैसा ही आदेश दिया है कि आज ही आर्य राम का जन्म दिवस भी है अतः बहुत अच्छे ढंग से महोत्सव मनाना है।

प्रियव्रत—खरादि के बध से आज जनस्थान पूर्णतया शान्त है। राक्षसों के आतंक से शून्य यह इस प्रकार का पहला समारोह होगा।

सत्यव्रत—राक्षसों के कैसे, कहिए रक्ष धर्म प्रचारकों के।

प्रियव्रत—कैसा यह धर्म है जिसके लिए इसके प्रसारक न केवल आर्यों के अनुष्ठान नष्ट करते है निरीह बाल वृद्धों को मार भी डालते हैं, मुनि मांस भक्षण में अनुरक्त यह रक्त पान से प्रसन्न होते हैं।

सत्यव्रतः—एतदेव कारणं यद् रक्षोधर्मप्रचारकानिमान् राक्षसानार्यावर्तजना दन्तुरान् लम्बकर्ण-विषाणान् वीभत्समुखानवगच्छन्ति ।

प्रियव्रतः—अहो ! एतेषां बर्बरता । एषां कृते पूजा-यज्ञ-दानक्रिया निन्दनीया । अबला-बाल-वृद्धजना निरपराधा अपि आर्यत्वान्मारणीयाः । इमे हिंसयैव जीवन्ति स्वैराचारेण धर्मोद्धारं कुर्वन्ति ।

सत्यव्रतः—नेमे धर्मोद्धारकास्तद्व्यजेन स्वैरजीविन इमे सर्वधर्मविनाशका एव सन्ति ।

प्रियव्रतः—कृतश्रमोऽसि त्वमत्र धर्मसंस्कृत्यनुसंधाने किमार्येतरधर्मस्येदृशमेव दर्शनं, यथेमे राक्षसाः प्रदर्शयन्ति ?

सत्यव्रतः—भद्र ! नहि नहीदृशं नाम । अनार्यधर्मस्य विश्वे महती व्यवस्थासीत् । नदीपरिसरेषु विस्तृतेयं महती सभ्यता न केवलं कलाप्रवीणाऽपितु जीवनस्य विभिन्नपक्षेषु विस्तृतेयं संसारे समुन्नता संस्कृतिरासीत् ।

प्रियव्रतः—अहो ! कथमीदृशीयमधुना विलुप्तप्राया दृश्यते । किमत्रार्यजना एव कारणम् ।

सत्यव्रतः—वस्तुतः संसारप्रक्रिया निरन्तरं परिवर्तनशीलेयं दृश्यते । यदद्य समुन्नतं स्व एव तस्य पतनमपि सम्भाव्यते । अनार्यसभ्यता शान्त-

---

सत्यव्रत—यही कारण है कि आर्यावर्त के लोग इन रक्ष धर्म प्रचारकों को वड़े दांत लम्वे कान और सीग वाले तमा भयङ्कर मुख वाले समझते हैं ।

प्रियव्रत—ओह इन की वर्वरता । इनके लिए पूजा यज्ञ दान की क्रिया निन्दनीय है । अवला वाल और वृद्ध जनों को निरपराध होने पर भी आर्य होने के कारण मारना है । यह हिंसा से ही जीते हैं स्वैराचार से धर्मोद्धार करते हैं ।

सत्यव्रत—यह धर्मोद्धारक नही है उसके वहाने स्वच्छन्द जीवी यह लोग सर्व धर्म विनाशक ही हैं ।

प्रियव्रत—आपने तो धर्म संस्कृति के अनुसंधान पर श्रम किया है क्या आर्येतर धर्म का ऐसा ही दर्शन है जैसा यह राक्षस प्रदर्शन कर रहे हैं ।

सत्यव्रत—भद्र ! नही ऐसा नही । अनार्य धर्म की विश्व में महान् व्यवस्था थी । नदी परिसरो में विस्तृत यह महान सभ्यता न केवल कला प्रवीण थी अपितु जीवन के विभिन्न पक्षों में विस्तृत यह संसार में समुन्नत संस्कृति थी ।

प्रियव्रत—आश्चर्य है ऐसी होते हुए भी यह आजकल विलुप्त प्राय दिखाई देती है । क्या इसमें आर्यजन ही कारण है ।

सत्यव्रत—वस्तुतः यह संसार की प्रक्रिया निरन्तर परिवर्तनशील दिखाई देती है जो आज उन्नत है कल ही उसका पतन भी सम्भव है । अनार्य सभ्यता शान्त जीवन

जीवनदर्शनत्वादार्यैः सह युद्धमाना पराजितप्राया जाता। शनैःशनैरस्मिन् राष्ट्रे संस्कृतिद्वयस्य मिश्रणं जातम्। प्रायेणाधुनार्यसंस्कृतेरनेकाः समुन्नत-प्रक्रिया अनार्यसंस्कृतिप्रदत्ताः सन्ति।

प्रियव्रतः—तदेवं ब्रूहि यदियमार्यसंस्कृतिरधुनात्र वर्तते तदार्यानार्य-संस्कृतिसम्मिश्रणमेव।

सत्यव्रतः—एवमेव जानीहि भद्र!

प्रियव्रतः—तदेतत्तु प्रियतरमेव जातम्। युगानुकूलमेव धर्मरचना युगधर्म-समत्व-प्रतिपादने शक्ता। अनेन समन्वयेनैवास्मिन् द्वीपे श्रेयः सम्पत्स्यते।

सत्यव्रतः एवमेव स्यात्। भवतु नाम विश्वे सर्वधर्मसमन्वयेन मानव-धर्मस्योत्थानम्। अहो! विलम्बतेऽभिषेकवेला तदवचितानि पुष्पाणि, समायाहि भद्र! आवां गच्छावः।

(इति निष्क्रान्तौ)

(इति विष्कम्भकः)

(ततः प्रविशति मुनिमण्डलीभिरावृत्तः पुष्पाभिषेकसमर्चितः सीतया सह सानुजो रामः)

दर्शन के कारण आर्यों के साथ युद्ध करती हुई पराजित हो गयी। शनैः शनैः इस राष्ट्र में दो संस्कृतियों का मिश्रण हो गया। प्रायः आज कल आर्य-संस्कृति की अनेक समुन्नत प्रक्रिया अनार्य संस्कृति की दी हुई हैं।

प्रियव्रत—तो ऐसा कहो कि यह आजकल जो आर्य-संस्कृति विद्यमान है वह आर्य अनार्य संस्कृतियों का मिश्रण ही है।

सत्यव्रत—भद्र! ऐसा ही समझो।

प्रियव्रत—तब तो यह बहुत अच्छा हुआ क्योंकि युग के अनुकूल ही धर्म रचना युग धर्म की समता प्रतिपादन में समर्थ होती है। इस समन्वय से ही इस द्वीप में कल्याण होगा।

सत्यव्रत—ऐसा ही होवे। सर्व धर्म समन्वय से संसार में मानव धर्म का उत्थान होना चाहिए। अरे! अभिषेक के समय में विलम्ब हो रहा है पुष्प तो चुन गए। भद्र! आओ हम दोनों चलें।

(दोनों निकल गए)

(विष्कम्भक समाप्त)

(मुनि मण्डली से घिरे पुष्पाभिषेक से अर्चित सीता और अनुज के साथ राम प्रवेश करते हैं)

मुनयः—प्रहरीविश्वधर्मस्य चार्यधर्मस्य रक्षिता ।
दुष्टानां दण्डकृद् रामो विरामो विपदां जयेत् ।।१।।
जयति खरादिनिहन्ता, भ्रात्रा सार्धं धनुर्धरो रामः ।
शक्तिरिव प्रतिबुद्धा, सततं यस्यानुगामिनी सीता ।।२।।

रामः—कृतार्था वयमनुगृहीताः स्मोऽनेन शुभाशीर्वचनेन आर्यमहोदयानां कल्याणकामनयैव सम्वृत्तमेतद् महद्दुर्धर्षकार्यम् । सत्यमेव—

धर्मद्विषः खलु खरप्रमुखा मदान्धा,
उग्राश्चतुर्दशसहस्त्रबलैरूपेताः ।
एकेन दाशरथिना निहता यदाजा-,
वाशीर्वचःफलमिदं महतां मुनीनाम् ।।३।।

मुनयः—आर्यमहानुभावेऽत्र समागते विलुप्ता नाम सकला मुनीनां विपत्तयः । खर-त्रासबाधाविरहितेऽस्मिन् तपोवने किमास्तेऽस्माकं समीपभृते पुष्पाञ्जलीन्, तानेतान् श्रीमद्भ्यः समर्पयामः ।

रामः—क्षतात् त्राणं नरेशस्य, धर्मः क्षत्रियजन्मनः ।
सत्यं प्राणपणेनापि, धर्मं रक्षन्ति राघवाः ।।४।।

मुनयः—न केवलं वयमद्य श्रीमतां विजयाभिषेकेण, जन्मदिवसोल्लासेनापि कृतार्थीभूताः । तद् यथा वयं श्रीमतां श्रेयसे मध्याह्नकृत्यानि सम्पादयेम तथाज्ञापयन्तु नामार्यमहोदयाः ।

मुनिलोग—विश्वधर्म के प्रहरी और आर्य धर्म के रक्षक दुष्टों को दण्ड देने वाले तथा विपत्तियों को रोकने वाले राम की जय हो ।।१।।

खरादि के विनाशक भ्राता के साथ धनुधर राम की जय हो, प्रति बुद्ध शक्ति के समान सीता जिनकी निरन्तर अनुगामिनी है ।।२।।

राम—हम कृतार्थ हुए, इस शुभाशीर्वचन से अनुगृहीत हुए। आर्य महोदयों की कल्याण कामना से ही यह अति कठिन कार्य सम्पन्न हुआ है सत्य ही—धर्म द्वेषी मदान्ध उग्र खर प्रमुख राक्षस चौदह सहस्त्र सैनिकों से युक्त युद्ध में यदि एक राम ने मार डाले तो निश्चय ही यह महा-मुनियों के आशीर्वाद का ही फल है ।।३।।

मुनिगण—आर्य महानुभाव के आ जाने पर मुनियों की सभी विपत्तियाँ लुप्त हो गयीं । खर से भय की बाधा रहित इस तपोवन में हमारे पास इन पुष्पांजलियों के सिवा और क्या है, उन्हें आपके लिए समर्पित कर रहे हैं ।

राम—भय से रक्षा करना, क्षत्रिय जन्म धारी नरेश का धर्म है सत्य ही रघुवंशी प्राण पण से भी धर्म की रक्षा करते हैं ।।४।।

मुनिगण—न केवल हम आज आपके विजयाभिषेक से, जन्म दिन के उल्लास से भी कृतार्थ हो गए । तो अब हम लोग आपके कल्याण के लिए मध्यान्ह कृत्यों का सम्पादन करें अतः आज्ञा प्रदान करें आर्य महोदय !

रामः—यत्राचार्यवरा ईहन्ते । अप्यायिता वयमनेन कृपानन्द-सन्दोहेन । गम्यतां पुनर्दर्शनाय ।

मुनयः—मङ्गलानि प्रवर्धन्तां जायन्तां मित्रसंगमाः ।
शत्रवः क्षयमायान्तु दीर्घायुष्यमवाप्नुयुः ॥५॥

रामः—भूयः कृतार्था वयमाशीर्वचनेन ।

(आशीर्वाचयन्तो निष्क्रान्ताः सर्वे मुनयः)

रामः—(सीतां प्रति) प्रिये ! अद्य मुनि-मण्डली स्नेहसत्कार-सम्मान-भावनयानन्दप्लुतं मन्मानसं समुत्कण्ठिते । एते खलु स्मारयन्ति मे जन्मभूमिम् ।

सीता—अनुदिनमुल्लासरसाप्लुतै र्वनवासिभिः सहाज्ञातमिव त्रयोदशाधिकं वर्षाणां व्यतीतम् । स्मरामि खलु बनवास पूर्ववृत्तमार्यपुत्रजन्म-दिवसस्य, पितृवैभवरमणीयतां चायोध्यायाः, परितः समुपसर्पन्तीमुल्लाराशि, नागराणाम् ।

लक्ष्मणः—अस्तु नाम, पश्यन्तु, नामात्र श्रीमन्तो बनस्य रमणीयताम् । भवज्जन्म दिवसोपलक्ष्य एव फलभारावनता इमे वृक्षाः, पुष्पसम्भार पुष्पिता इमा लता भवत्स्वागतममाकुर्वाणाः प्रतीयन्ते । नृत्यमग्ना इमे मयूराः,

---

राम—आचार्यवर जैसा चाहते हैं । हम लोग इस कृपा के आनन्द संदोह से तृप्त हो गए । जाएँ आप पुनः दर्शन देने के लिए ।

मुनिगण—मंगलो की वृद्धि हो, मित्र समागम होवे । शत्रुओं का विनाश हो और आप दीर्घ आयु प्राप्त करें ।

राम—हम पुनः आशीर्वचन से कृतार्थ हुए ।

(आशीर्वाद देते हुए मुनि लोगों का प्रस्थान)

राम—(सीता से) प्रिये ! आज मुनि मण्डली के स्नेहसत्कार सम्मान की भावना से आनन्दपूर्ण मेरा मन उत्कण्ठित हो रहा है । यह सब निश्चय ही मुझे जन्मभूमि की याद दिलाते हैं ।

सीता—प्रतिदिन उल्लास रस पूर्ण बनवासियों के साथ अनजाने ही तेरह वर्ष बीत गए । बनवास से पूर्व आर्यपुत्र के जन्मदिवस का वृत्त अयोध्या में पिता जी के वैभव की रमणीयता और नागरिकों का चारों ओर उमड़ता हुआ उल्लास मुझे स्मरण है ।

लक्ष्मण—हुआ करे ! यहाँ तो श्रीमान् बन की रमणीयता देखें ! लगता है आपके जन्मदिवस के उपलक्ष्या में ही यह फल भार से अवनत वृक्ष, पुष्प भार से पुष्पित लताए आप का स्वागत कर रहे हैं, नृत्य मग्न यह मयूर, कलरव गान स्वर से

कलरवगान स्वरमुखरा: पक्षिण:, सुगन्ध सम्वाहसंभृतोऽसौ पवनो निर्मल-नीर वाहिनीयं गोदावरी-भवज्जन्मदिवसहर्षोत्सव-स्वागतं कुर्वाणा इव प्रतीयन्ते ।

सीता—अहो ! क्व तद् राजनीतिबन्दीभूतं राज्यप्रशसने बद्धं राज-जीवनं क्व च मुक्तप्रकृतिहास्येन सह प्रफुल्लमिदं वन्य-जीवनम् । अहो महती रमणीयतास्य मुक्तजीवनस्य । प्रियं मेऽतितराम् ।

(तत: प्रविशति स्वर्णमृग:)

सीता—(साश्चर्यं पश्यन्ती) पश्यार्य पुत्र ! पश्य वनदेवतोपहारी कृतोऽसौ श्रीमज्जन्मदिवसे स्वर्णमृग इत एवाभिवर्तते ।

राम:—(साश्चर्यं) अहो ! स्वर्णमृगोऽसौ कथमीदृशो नाम ? वत्स लक्ष्मण ! दृष्टस्त्वया ?

लक्ष्मण:—दृष्ट्या तु स्वर्णमृग एव प्रतीयते ।

सीता—अरे आर्यपुत्र ! वनदेव्योपहारीकृतोऽसौ स्वीकार्य एवार्येण । जीवितोऽसौ हस्ते गच्छेत् तथा करणीय: । कालान्तरेऽयोध्यावासिनां कृतेऽसावतीवाश्चर्यकरो भविता ।

लक्ष्मण:—जीवने प्रथममेव दृष्ट: स्वर्णमृग: । अत्रापि निवसतो मे दृष्टिपथं नागत: । कदाचित् कापि राक्षसी माया स्यात् ।

मुखर पक्षी, सुगन्ध से परिपूर्ण यह पवन, निर्मल नीर वाहिनी यह गोदावरी आपके जन्म दिवस के हर्षोत्सव का स्वागत करते हुए से प्रतीत हो रहे हैं ।

सीता—अरे कहाँ वह राजनीति में वन्दी राज्य प्रशासन मे बँधा हुआ राजाओं का जीवन और कहाँ यह मुक्त प्रकृति के हास्य के साथ प्रफुल्ल वन्य जीवन । इस मुक्त जीवन की महान रमणीयता है ! मुझे यह अत्यन्त प्रिय है ।

(स्वर्ण मृग का प्रवेश)

सीता—(आश्चर्य के साथ देखती हुई) देखो आर्यपुत्र ! देखो आपके ज म-दिन पर वनदेवता द्वारा दिया हुआ उपहार, यह स्वर्णमृग इधर ही आ रहा है ।

राम—(आश्चर्य के साथ) अरे यह तो स्वर्णमृग है, भला ऐसा कैसे ! वत्स लक्ष्मण ! तुमने देखा ?

लक्ष्मण—देखने से तो स्वर्णमृग ही प्रतीत होता है ।

सीता—वनदेवता ने उपहार दिया है । आर्य को स्वीकार ही करना है । जीवित ही हाथ आ जाए, वैसा करे । कुछ समय बाद अयोध्यावासियों के लिए अत्यन्त आश्चर्यकारी होगा ।

लक्ष्मण—जीवन में पहली बार ही स्वर्णमृग देखा है, यहाँ रहते हुए भी दिखाई नहीं दिया । कहीं कोई राक्षसीमाया न हो ?

सीता—अहो ! पश्यार्यपुत्र ! मृगस्य रमणीयताम् ।

स्वर्णश्रृङ्गेण कण्डूयन् स्वर्णचर्मावृत्तां तनुम् ।
रत्नदीपदृशा पश्यन् मनो मे हरतीव सः ।।६।।

स्वामिन् ! जन्मोत्सवरमणीयेऽद्यकाले मह्यमुपहारीक्रियतामेष स्वर्ण-मृगः स्मृतिरुपेण र्यपुत्रेण ।

रामः—(स्वगतम्) कथमेष प्राणिविज्ञानविपरीतोऽपि संजायते । यतः—

स्वर्णमृगो न पृथिव्यां स्वर्गे लोके न दर्शितः शास्त्रे ।
तत् किमियं मृगरूपा, मायैवं दृश्यते पुरतः ।।७।।
अप्राकृता यदीयं हैमी जाति र्हरेन्मनो देव्याः ।
रामश्चेन्मृगमाया, कुशलस्तस्या विनाशाय ।।८।।

(प्रकटम्) प्रिये ! यथा तेऽभिरोचते तदानयाम्येनम् । (लक्ष्मणं प्रति) वत्स लक्ष्मण ! प्रतीक्षस्व मामिहैव सीतया सह यतो हि—

जनस्थानमिदं भ्रात दुष्ट-जन्तु-समाकुलम् ।
सीतेयं माकुलीभूयात् तथा कार्यं त्वयानघ ।।९।।

लक्ष्मणः—यथाज्ञापयति देवः ।

सीता—अरे आर्यपुत्र ! मृग की रमणीयता को देखिए ।

स्वर्णश्रृङ्ग से खुजलाता यह स्वर्णचर्म से आवृत तन को ।
रत्नदीप जैसे नयनों से देख रहा, हरता मम मन को ।।६।।

स्वामिन् ! जन्मोत्सव से रमणीय आज के दिन स्मृति रूप में यह स्वर्णमृग आप मुझे उपहार में दे दीजिए ।

राम—(मन में) प्राणि विज्ञान के विपरीत यह कैसे हो रहा है ।

क्योंकि—

पृथिवी स्वर्गलोक या शास्त्र में कहीं स्वर्णमृग नहीं दिखाई पड़ा है, तो क्या यह मृगरूपधारिणी माया ही सामने दिखाई दे रही है ।।७।।

यदि यह कोई अप्राकृत स्वर्णिमहिरणों की जाति है तो देवी सीता का मन आनन्दित करें और यदि कोई मृगरूपी माया है तो राम उसके विनाश में कुशल है ।।८।।

(प्रकट) प्रिये ! जैसा तुम्हें प्रिय है, मैं इसे ला रहा हूँ । (लक्ष्मण की ओर) वत्स लक्ष्मण ! सीता के साथ तुम मेरी यहीं प्रतीक्षा करना क्योंकि—

भाई ! यह जनस्थान दुष्ट जीवों से भरा पड़ा है अतः हे अनघ ! तुम वैसा उपाय करना जिससे यह व्याकुल न हो ।।९।।

लक्ष्मण—आप जैसी आज्ञा देते हैं ।

राम:—(मृगं पश्यन्) यद् भवतु तद् भवतु नाम दण्डकारण्यमनोहारिणी ते रमणीयता मामाकर्षतीव । एषोऽहमागच्छामि त्वामुद्धर्तुम् ।

(इति धावन्तं मृगमनुधावन्निष्क्रान्तः)

सीता—वत्स लक्ष्मण ! अर्धवर्षावशेषवत्यपेऽयं बनवासः । तद् दक्षिणापथवर्त्तीनि वस्तूनि संग्राह्याणि । यथा प्रति निवृत्तैरस्माभिरयोध्यावासिनां कृते दर्शनीयानि भविष्यन्ति ।

लक्ष्मण:—सर्वाधिकाश्चर्यंकरोऽयं भविता स्वर्णमृगः ।

सीता—अथ किम् । दीर्घबनवासावधेः सर्वाधिकेयं महनीयोपलब्धिः स्वर्णमृग एव (दक्षिणनेत्रस्फुरणं सूचयन्ती) दक्षिणनेत्रं स्फुरति वत्स ! किमिदं विधास्यति । आर्यपुत्रस्य राज्याभिषेकसमये स्फुरितमासीन्मे दक्षिणनेत्रम् । दैवेन सिंहासनस्थाने बनवासः प्रदत्तः । पुनः किमनेनानुष्ठितं दुर्दैवेन—

राजत्यागं दैव ! श्वसुरविनाशं, बनप्रवासं च ।
दत्वा पुनरपि किञ्चिन् नेत्रस्फुरणेन चेष्टितं भवता ॥१०॥

लक्ष्मण:—बनवासावधिः समाप्तप्रायो नेत्रस्फुरणेनाधुनाऽयोध्यागमनं संसूच्यते ।

राम—(मृग को देखते हुए) जो हो, सो हो, दण्डकारण्य के मन को हरने वाली तुम्हारी रमणीयता मुझे आकर्षित कर रही है । यह मैं तुम्हारे उद्धार के लिए आ रहा हूँ ।

(इस प्रकार भागते हुए मृग के पीछे भागते हुए जाते हैं)

सीता—वत्स लक्ष्मण ! अब बनवास का लगभग आधा वर्ष ही शेष रह गया है । इसलिए दक्षिणापथ में प्राप्त होने वाली वस्तुओं को एकत्र करना चाहिए । जिससे हम लोगों के लौटने पर अयोध्यावासियों के लिए (वे वस्तुएँ) दर्शनीय होंगी ।

लक्ष्मण—सबसे अधिक आश्चर्यंकर तो यह स्वर्णमृग होगा ।

सीता—और क्या ! दीर्घ बनवास अवधि की सर्वाधिक महनीय उपलब्धि यह स्वर्णमृग ही है । (दाहिनी आँख का फड़कना सूचित करते हुए) वत्स ! दाहिना नेत्र फड़क रहा है । यह क्या करेगा । आर्यपुत्र के राज्याभिषेक के समय मेरा दाहिना नेत्र स्फुरित हुआ था । दैव ने राज्याभिषेक के स्थान पर बनवास दे दिया । पुनः दुर्दैव ने क्या सोचा है ।

है दैव ! राज्य त्याग, श्वसुर की मृत्यु, और बनवास देकर भी क्या पुनः नेत्र स्फुरण के द्वारा आपने कुछ और चेष्टा की है ॥१०॥

लक्ष्मण—बनवास की अवधि समाप्त प्राय है नेत्र-स्फुरण से अब अयोध्यागमन की सूचना मिल रही है ।

सीता—सर्वथा देवाः कल्याणं विदधतु नामार्यपुत्रस्य। (नेपथ्ये) हा हा सी······ते ! हा लक्ष्मण ! त्रायस्व मां हा हतोऽस्मि हा ! सीते !!

सीता—(ससम्भ्रमम् सहसाकुलतां नाटयन्ती) वत्स लक्ष्मण ! श्रुतं नामार्ताह्वानं, वत्स ! आर्यपुत्रस्यैव करूणस्वरोऽयम्। आपद्गतः स्वामी, परित्राणाय समाह्वयति।

लक्ष्मणः—स्वरेण तु भ्रातरमेव सम्वदति। परं मातर ! त्वां परित्यज्य किमुचितं मेऽनुयानम् ? यतोऽहं भ्रात्रा त्वद् रक्षार्थमेवात्र नियुक्तोऽस्मि। यद्यत्र शून्ये कुटीरे त्वज्जीवने संशयो भवेत् तदा मे का गतिर्भविता भ्रातुः सन्मुखे।

सीता—वत्स ! स्वामी विपद्गतस्त्वामाह्वयति तदविचार्य मद्गतिं त्वरितमेवानुगच्छ यतो बिनार्यपुत्रं कस्यापि नात्र जीवनस्याशा। यतः—

विपद्गतश्चेद् रघुवीरपुङ्गवो
बने विनष्टो ननु राक्षसाधमैः।
क्व जीवनं मे भविता त्वमप्यहो कथम्
बिनाग्रजं धारयितास्यसून् ॥११॥

सीता—देवता आर्यपुत्र का सर्वथा कल्याण करें। (नेपथ्य में) हा सी···ते ! हा लक्ष्मण ! मुझे बचाओ हा ! मैं मरा, हा सीते !

सीता—(घबराहट के साथ सहसा व्याकुलता का अभिनय करती हुई) वत्स लक्ष्मण ! तुमने यह करूण पुकार सुनी। वत्स ! आर्यपुत्र का ही यह करूण स्वर है। आपत्ति में पड़े हुए स्वामी रक्षा के लिए पुकार रहे हैं।

लक्ष्मण—स्वर तो भाई का ही लगता है परन्तु माता तुम्हें छोड़कर पीछा करना क्या मेरे लिए उचित है। क्योंकि मैं भ्राता के द्वारा तुम्हारी रक्षा के लिए नियुक्त हूँ। यदि यहाँ शून्य कुटीर में तुम्हारे जीवन को संशय हो जाए तो मेरी भ्राता के सन्मुख क्या गति होगी।

सीता—वत्स ! स्वामी विपत्ति में है, तुम्हें पुकार रहे हैं तो मेरी दशा का विचार न करके शीघ्र पीछा करो, विना आर्यपुत्र के यहाँ किसी के भी जीवन की आशा नही है। क्योंकि—

विपत्तिग्रस्त रघुवीर पुंगव यदि वन में अधम राक्षसों द्वारा विनष्ट हो गए तो मेरा जीवन कहाँ होगा और तुम बड़े भाई के विनाश से प्राण धारण कर सकोगे ॥११॥

लक्ष्मण:—हा दैव ! धर्मसंकटे पतितोऽस्मि, किं करोमि, तत्र विपद्गतो भ्राता नन्वत्रैकाकिनी विपद्गता सीता। मनो विश्वसिति 'रामो न केनापि पराभूयते' तथापि करूणाह्वानं पादान् मेऽस्थिरी करोति।

त्राणाह्वानं विपदि करुणं कर्षतीव प्रसह्य ,
भ्रातुः शौर्यं भुवनविदितं धैर्यबन्धं करोति।
शून्येऽरण्ये श्वपदबहुले किं परित्यज्य सीतां ,
गच्छेयं वा स्वरमनुसरन् दैव ! किम्वा करोमि ।।१२।।

सीता--स्थिरीभूय लक्ष्मण ! भ्रातु-स्वरमेवानुसरन् गच्छ यदि मां जीवन्तीं द्दष्टुमिच्छसि। यतो वत्स ! रामं बिना, किमयोध्यां मया सह गन्तुं शक्नोसि। अयोध्याबासिनां वाग्वज्राणि वा सोढुं शक्तोऽसि 'राक्षसैर्व्यापादितो रामोऽथवा लक्ष्मणेन' किमुत्तरं दास्यसि ? अतः—

बनवासान्निवृत्तापि सीता रामं विना वद् ।
अयोध्यानगरीं शक्ता प्रवेष्टुं जीविता कथम् ।।१३।।

लक्ष्मण:—मातः ! अत्र शून्ये त्वां त्यक्त्वा कथं गच्छामि। स्यान्नाम काचिन्माया चेदतो न मे साहसस्त्वामेकाकिनीं त्यक्तुं यतो भ्रातुरादेश एवेद्दश आसीत्।

लक्ष्मण—हा दैव ! धर्मसंकट में पड़ गया हूँ क्या करूँ, वहाँ विपत्ति में भाई पड़े हैं और यहाँ अकेली सीता विपत्ति में है। मन विश्वास करता है राम किसी से भी पराजित नही होंगे फिर भी करूण पुकार मेरे पैरों को अस्थिर कर देती है।

विपत्ति में रक्षा के लिए करूण पुकार हठात् मुझे खींच सी रही है, भ्राता का भुवन-विदित शौर्य धैर्य बांध देता है। वन्य जन्तुओं से भरे हुए इस शून्य वन में क्या सीता को छोड़कर स्वर का पीछा करता हुआ चला जाऊँ ? अथवा हे दैव ! क्या करूँ ।।१२।।

सीता—लक्ष्मण ! स्थिर हो जाओ यदि मुझे जीवित देखना चाहते हो तो भाई के स्वर का पीछा करते हुए चले जाओ। क्योंकि वत्स ! राम के विना क्या तुम मेरे साथ अयोध्या लौट सकते हो क्या अयोध्यावासियों के वाग्वज्र सह सकते हो 'राक्षसों ने मार डाला राम को या लक्ष्मण ने' क्या उत्तर दोगे।

इसलिए. वताओ, राम के विना वनवास से लौटकर भी सीता जीवित रहती हुई अयोध्या में कैसे प्रवेश कर सकती है ? ।।१३।।

लक्ष्मण—माता ! इस शून्य में तुमको छोड़कर कैसे जाऊँ क्या जाने कोई माया ही हो इसलिए तुम्हें अकेले छोड़कर जाने का मुझ में साहस नही है क्योंकि भाई का आदेश ही ऐसा है।

(नेपथ्ये) परित्रायस्व लक्ष्मण ! मामापद्गतं म्रियमाणम् !

सीता—श्रुतं लक्ष्मण ! आर्यपुत्रस्यैवार्तस्वरमनुकरोति । विलम्बते कालः । लक्ष्मण ! त्वमस्थिरोऽसि । अहमेवानुसरामि । आर्यनार्यास्तु पत्युरनुसरण मेव शरणम् । (इति गन्तुमुपक्रमते)

लक्ष्मणः—मातर ! स्थिरा भव, गच्छाम्यहं पश्याम्याततायिनं तं येनापदां विरामः स्वयं रामः विपद् गतः प्रतीयते । (इति धनुरुद्यम्य गन्तुमुद्यतः, वामनेत्रस्फुरणं सूचयित्वा) अहो ! स्फुरितं मे वामनेत्रम् । भगवति ! वनदेवते ! सीतामिमां रामप्रियामसहायां त्यक्त्वा गच्छामि । सम्पादनीयमस्याः कल्याणम् ! का मे गतिः (सीतां प्रति) गृह्यतां मे प्रणामाञ्जलि र्मातः (नेपथ्ये) परित्रायस्व मां लक्ष्मण ! हा…………

लक्ष्मणः—(क्रोधं नाटयन्) आः दुष्ट ! रघुपुङ्गवापमानिन् ! भ्रात र्मा भैषीः । एष ते दासः सत्वरं समायाति—

उद्यद्धनुःस्फुरितचण्डशरप्रहारै

दृप्तारिदर्पदलने प्रथित-प्रभावः ।

क्षीणायुषां क्षयकरो भुवि राक्षसाना-

मागच्छति क्षितियते ! ननुलक्षमणोऽयम् ।।१४।।

(नेपथ्य में) लक्ष्मण ! आपत्ति में पड़े मर रहे मुझे बचालो !

सीता—लक्ष्मण ! सुना । आर्यपुत्र के ही स्वर के अनुसार है। विलम्ब हो रहा है । लक्ष्मण तुम अस्थिर हो । मैं ही पीछा करती हूँ । आर्यनारी का पति का अनुसरण ही शरण है (जाना चाहती है)

लक्ष्मण—माता स्थिर हो । मैं जा रहा हूँ । देखता हूँ उस आततायी को जिसने आपदाओं के विराम राम को विपत्ति में डाल दिया हैं । (धनुष लेकर जाने को उद्यत, वाम नेत्र स्फुरण सूचित करके) अरे ! मेरा वाम नेत्र फड़क रहा है । हे भगवती वनदेवता इस राम-प्रिया सीता को असहाय छोड़ कर जा रहा हूँ इसका कल्याण करना । मेरी क्या गति है (सीता के प्रति) माता ! मेरी प्रणामाञ्जलि ग्रहण करो (नेपथ्य में) लक्ष्मण ! मुझे बचाओ हा…………

लक्ष्मण—(क्रोध का अभिनय करते हुए) अरे दुष्ट ! रघुपुंगव का अपमान करने वाले ! मत डरना भाई । यह तुम्हारा दास तेजी से आ रहा है ।

हे पृथिवी नाथ ! उद्यत धनुष से स्फुरित चण्ड शरों के प्रहार से गर्वित शत्रु का दर्प दलन करने में प्रसिद्ध प्रभाव वाला, और क्षीणायु राक्षसों का पृथ्वी पर नाश करने वाला यह लक्ष्मण आ रहा है ।।१४।।

धरोत्सादन सामर्थ्ये शेषे भ्रातरि लक्ष्मणे ।
मयि जीवत्यसौ बध्यः को रामं धर्षयत्यहो ! ॥१५॥

अथवा—भुवनख्यातवीर्यस्य राघवस्य महौजसः ।
धर्षणं क्व च रामस्य बालिशत्वं धिगस्तु मे ॥१६॥

तथापि मातुर्वचांसि पालनीयान्येव (परावृत्य) गृह्यतामस्य दासस्य प्रणामाञ्जलि र्मातः ।

सीता—गच्छ तात ! विजयतां सहार्यपुत्रेण ।

लक्ष्मणः—एष गच्छामि (इति निष्क्रान्तः)

सीता—गतो लक्ष्मणः । तदहं कुटीरमाविश्य द्वयोः कल्याणकामनया देवान् प्रसादयामि ।

(इति निष्क्रान्ता)

समाप्तोऽयं चतुर्थोऽङ्कः

पृथिवी को उलटने की शक्ति रखने वाले शेष नाग जैसे मुझ भाई लक्ष्मण के जीवित रहते, बध के योग्य अरे यह कौन, राम को अपमानित कर रहा है ॥१५॥

अथवा—संसार प्रसिद्ध शौर्य वाले महान् ओजस्वी रघुवंशी राम का कहाँ अपमान ! मेरी मूर्खता को धिक्कार है ॥१६॥

फिर भी माता के वचन पालना ही है। (घूमकर) माता ! इस दास की प्रणामाञ्जलि ग्रहण कीजिए ।

सीता—तात ! जाओ ! आर्यपुत्र के साथ विजयी हो ।

लक्ष्मण—यह जा रहा हूँ । (चला गया)

सीता—लक्ष्मण तो गए । मैं कुटीर में बैठकर दोनों की कल्याण कामना से देवताओं को प्रसन्न करती हूँ ।

(निकल गयी)

चतुर्थ अङ्क समाप्त

❋ ॐ ❋

पञ्चमोऽङ्कः

(अथ विष्कम्भकः)

(ततः प्रविशति दूराध्वश्रममभिनयन् पान्थः)

पान्थः—अहो ! ललाटन्तपः शिरसि वर्तते । मन्ये संजातो मध्याह्नः । दूराध्वागमनश्रान्तोऽस्मि तत्क्वचिच्छीतल सुखच्छायामाश्रित्य श्रमापनोदं करोमि (परितो विलोक्य) अहो ! गोदावरीपुलिनं प्राप्तोऽस्मि । तत्पार्श्वं एव पञ्चवटीपरिसरो लक्ष्यते । तदतिमनोहरमाश्रमपदं गत्वा रामदर्शनेन, मातुः सीतायाश्चातिथ्येनात्मानं कृतार्थी करोमि । (परिक्रम्य) प्राप्तमिदं कुटीरम् । (परिनिरीक्ष्य) शून्यमिव लक्ष्यते पर्णकुटीरम् तदाह्वयामि,—"को नु खल्वत्र वर्तते" (कर्णं दत्वा) न कापि प्रतिक्रिया ममाह्वानस्य (पुनः सूक्ष्मं निरीक्ष्य)

अहो ! जलसेकाभावम्लाना इमे पुष्पपादपाः, खिन्ना लताः, मलिनानि इतस्ततो विकीर्णानि कुसुमानि । अहो ! तरुच्छायानिषादिनस्त्यक्तनर्तना अवनतग्रीवा इमे मयूराः, मौनाः कूजनविरहा इमे पक्षिणः (कर्कश रवमाकर्ण्य) अहो ! काकोऽयमीदृशं कर्कशं रोदिति । तत् किमप्यघटितघटना संसूचकानी-

---

(अथ विष्कम्भकः)

(लम्बे मार्ग से आने के श्रम का अभिनय करते हुए पथिक का प्रवेश)

पथिक—अरे ! सूर्य सिर पर आ गया है । लगता है दोपहर हो गया, दूर से आने के कारण थक गया हूँ, तो कहीं शीतल सुखकर छाया का आश्रय लेकर श्रम दूर कर लूँ । (चारों ओर देखकर) अरे गोदावरी तट पर पहुँच गया । इसके समीप ही पञ्चवटी परिसर दिखाई देता है, तो अति मनोहर आश्रम में जाकर राम के दर्शन और माता सीता के आतिथ्य से आत्मा को कृतार्थ कर लूँ । (चलकर) लो यह कुटी आ गयी । (चारों ओर देखकर) यह पर्णकुटी तो शून्य सी लगती है । तो पुकारता हूँ "अरे यहाँ कौन है" (कान लगाकर) मेरे पुकारने की कोई प्रतिक्रिया नहीं ! (पुनः सूक्ष्म निरीक्षण करके)

अरे ! जल सिञ्चन के अभाव से म्लान यह पुष्प पादप, खिन्न लताएँ, मुर्झाए हुए इधर-उधर बिखरे यह कुसुम । अरे वृक्षों की छाया में बैठे हुए नृत्य विहीन गर्दन झुकाये हुए यह मयूर, मौन कूजन रहित यह पक्षी ! (कर्कशरव सुनकर) अरे यह कौआ इस प्रकार कर्कश स्वर में रो रहा है । तो क्या यह सब किसी अघटित

मानि, यदत्र प्रसन्नमहोत्सवेऽस्मिन् पर्णकुटीरे श्मशानशून्यता संजाता। हा हतोऽस्मि न कोऽप्यत्र वर्तते रामभद्रकुशलाशंसी क्व यामि कं पृच्छामि। कोऽत्र वर्तते (पुनराह्वयति) कोऽत्र भो वर्तते।

(ततः प्रविशति खिन्नमुखस्तापसः)

तापसः—अरे पान्थ ! श्रान्तोऽसि, मन्ये दूरादागतोऽसि।

पान्थः—दूरादागतोऽस्मि, अपरिचितोऽस्मि अतः पृच्छामि यदत्र पर्ण-कुटीरे सर्वत्र शून्यता वर्तते। क्व गता रामभद्रः, सीता देवी, लक्ष्मणश्च क्वाधुना तेषां दर्शनं भविष्यति।

तापसः—कुतो रामदर्शनम्। परितः शून्यतां पश्यन्नपि न जानासि, यतो दूरादागतोऽसि।

पान्थः—किं भूतं रामस्य, चित्रकूटादागतोऽस्मि। बहुकालाद दृष्टत्वाद् दर्शनार्थं प्रचलितोऽस्मि। तदत्र किं वृत्तम्।

तापसः—पान्थ ! अति दारूणं सम्वृत्तम्।

पान्थः—शीघ्रं ब्रूहि ब्रह्मचारिन् !

तापसः—सीता देव्या अपहरणं········जातम्।

घटना के संसूचक हैं जो कि यहाँ प्रसन्नता पूर्ण महोत्सव वाले इस पर्ण कुटीर में श्मशान की शून्यता उत्पन्न हो गयी है। अरे मैं मरा ! यहाँ तो रामभद्र की कुशल बताने वाला कोई नही है। कहाँ जाऊँ, किससे पूछूँ, यहाँ कौन है। (पुनः पुकारता है) अरे यहाँ कौन है ?

(खिन्न मुख एक तापस का प्रवेश)

तापस—अरे पथिक ! थक गए हो, लगता है दूर से आ रहे हो।

पथिक—दूर से आ रहा हूँ। अपरिचित हूँ, इसलिए पूछ रहा हूँ कि यहाँ पर्ण कुटीर में सर्वत्र शून्यता है। रामभद्र कहाँ गए, सीता देवी और लक्ष्मण कहाँ गए हैं। इस समय उनके दर्शन कहाँ होंगे ?

तापस—राम के दर्शन कहाँ ! चारों ओर शून्यता देखते हुए भी नहीं जान रहे हो क्योंकि दूर से आए हो।

पथिक—राम का क्या हुआ, मैं चित्रकूट से आ रहा हूँ। बहुत समय से देखा नही था, दर्शन के लिए चला आया तो यहाँ क्या हुआ।

तापस—पथिक ! अति दारूण हो गया।

पथिक—ब्रह्मचारी ! शीघ्र कहो।

तापस—सीता देवी का अपहरण······हो गया।

पान्थः—(साश्चर्यं कष्टमनुभवन्) अहो सीता देव्याः, रामपत्न्या जनकजाया रघुवंशबध्वा अपहरणम् कथमेतद् दारुणमुपपन्नम् । केनापहृता देवी सीता ।

तापसः—श्रूयते, लङ्केश्वरेण रक्षोऽधिपतिना रावणेन चोरिता छलेन ।

पान्थः—अहो ! लङ्केश्वरातङ्कस्य चौर्ये परिणतिः ।

दिक्पालविजयादाप्तं यशोरक्षोऽधिपेन यत् ।
सीताचौर्येण तत्सर्वं रावणेनापहारितम् ॥१॥

तत् कथय तात ! कथमिदं सम्वृत्तम् ।

तापसः—किं कथयामि दैवदुर्विपाक एव यतः स्वर्णमृगचर्मावृत्तं मायाविनं मारीचं स्वर्णमृगभ्रान्त्या सीताग्रहेण ग्रहीतु मुदग्रधन्वा रामस्तमनुसरन् दूरं प्राप्तः । मारीचोऽपि रामबाणाहतो म्रियमाणो रामस्वरेण हा सीते ! हा लक्ष्मण ! त्रायस्व मामिति चीत्कृतवान् । परिचितस्वरव्याकुलया सीतया प्रहितो लक्ष्मणोऽपि तमनुसरन्नपक्रान्तः । अवसरं साधयन् साधुवेषेणागत्यैकाकिनीं सीतां शून्यकुटीराद् रावणो जहार । तत् कथयामि यदेष दैवदुर्विपाक एव ।

पथिक—(आश्चर्य के साथ कष्ट अनुभव करता हुआ) अरे ! सीता देवी का, राम की पत्नी का,.........जनक पुत्री का......रघुवंश की वधु का......अपहरण । यह दारूण कार्य कैसे हुआ । देवी सीता को किसने हर लिया ।

तापस—सुना गया है राक्षसों के राजा लङ्केश्वर रावण ने छल से चुराया है।

पथिक—अरे ! लङ्केश्वर के आतङ्क की चोरी में परिणति, राक्षसेश्वर रावण ने दिक्पालों के विजय से जो यश प्राप्त किया था, सीता की चोरी करके वह सब गँवा दिया ॥१॥

तो बताओ यह कैसे हुआ ।

तापस—क्या कहूँ ? दैव का दुष्फल ही था क्योंकि सीता के आग्रह के कारण, स्वर्ण मृगचर्म से आवृत मायावी मारीच को स्वर्णमृग के भ्रम में पकड़ने के लिए धनुष चढ़ाये राम उसका पीछा करते हुए दूर चले गए । राम के बाण से आहत मरता हुआ मारीच भी राम के स्वर में 'हा सीते हा लक्ष्मण ! मुझे बचाओ इस प्रकार चिल्लाया। परिचित स्वर से व्याकुल सीता के द्वारा भेजे गए लक्ष्मण भी उसका अनुसरण करते हुए दूर चले गए । अवसर पाकर साधु वेश में आकर रावण शून्य कुटी से अकेली सीता को हर ले गया । तभी तो कहता हूँ, यह दैव का दुष्परिणाम ही था ।

पान्थः—ननु सत्यं दैवदुर्विपाक एव । यतो—

दृष्टं न वा श्रुतमहो भुवने कदाचित्,
केनापि हैमहरिणस्य कुतोऽपि जन्म ।
तेनैव दाशरथिरेष महान् प्रलुब्धो,
दुर्दैवदुर्विलसितं नु वयं वदामः ॥२॥

का गतिरस्मादृशां, केवलं विधे विलसितमेव नमस्करोमि । क्वाधुना धन्विनावुभौ रामलक्ष्मणौ प्रयातौ ?

तापसः—मारीचवधान्निवृत्तौ तौ कुटीरं शून्यं विलोक्य शोकाकुलौ जातौ । सीतां चान्वेषमाणौ वने प्रविष्टौ ।

पान्थः—तदग्रेऽपि प्रगतिवृत्तेन परिचितो वा न वा ।

तापसः—किञ्चद् दूर एव रावणाहतेन विक्षिप्तेन जटायुषा रावणहृतां सीतां विज्ञाय समन्वयधर्मप्रबाधकमबलापहारिणं क्रोधाविष्टो रामस्तं हन्तुं प्रतिज्ञातवान् । ततः परं सीतां मार्गयन्तौ तौ राजपुत्रौ किष्किन्धा-प्रयाणमार्गे पम्पासरोवरं प्रति प्रस्थितौ ।

पान्थः—को नाम दैवस्य विचिकीर्षितं जानाति । यतो—

बनवासाभितप्तोऽपि सीताविरह वह्निना ।
पुनर्दग्धः प्रसह्यासावहो ! निष्ठुरता विधेः ॥३॥

पथिक—निश्चय ही दैवदुर्विपाक ही था । क्योंकि—

संसार में कभी किसी ने भी सोने के हिरण का जन्म न तो कहीं सुना है न देखा है । उसी ने दशरथ पुत्र राम को ठग लिया इसीलिए हम इसे दुर्दैव का दुर्विलास ही कहते हैं ॥२॥

क्या गति है हम लोगों की केवल विधि के विलास को ही नमस्कार करता हूँ । अब वे दोनों धनुर्धर राम लक्ष्मण कहाँ चले गए ।

तापस—मारीच वध से वापस आए हुए वे दोनों कुटीर को शून्य देखकर शोकाकुल होकर और सीता की खोज करते हुए बन में प्रवेश कर गए ।

पथिक—उसके आगे प्रगति का समाचार ज्ञात है या नही !

तापस—कुछ दूर पर ही रावण द्वारा मारे गए विक्षिप्त जटायु द्वारा सीता को रावण द्वारा हरी जानकर क्रोधाविष्ट राम ने धर्मसमन्वय के बाधक उस सीतापहारी को मारने की प्रतीज्ञा की । इसके पश्चात् सीता की खोज करते हुए वे दोनों राजपुत्र किष्किन्धा जाने वाले मार्ग पर पम्पासरोवर की ओर चल दिए ।

पथिक—दैव क्या करना चाहता है कौन जानता है । क्योंकि—"कैसी विधि की निष्ठुरता है कि उसने वनवास की पीडाओं से अभितप्त राम को सीता के वियोग की अग्नि से बलपूर्वक पुनः जला दिया ॥३॥"

तत् किमिदानीमितो विश्रम्य यतः शरीराच्छ्रान्तोऽपि मनसापि श्रान्तो जातः।

तापसः—तदहमपि गच्छामि, आश्रमकार्यं सम्पादयितुम्, यतो बेला विलम्बिता।

इत्युभौ निष्क्रान्तौ

(इति विष्कम्भकः)

(ततः प्रविशति सीतान्वेषणे श्रान्तमानसो लक्ष्मणानुगतो रामः)

लक्ष्मणः—इत इतो देवः

रामः—(शोकपरीतमानसं श्रान्तं सकरुणमात्मानं नाट्यन्)

वत्स लक्ष्मण ! विश्रान्ति-विरहेऽस्मिन् जीवने क्व विश्रामः।

गोदावरीपुलिनगर्तजलाशयेषु,
दृष्टं मया सघनवृक्षलतागृहेषु।
श्रान्तोऽयमद्य मनसापि शरीरयष्ट्या।
रामो विना जनकजां क्व समाश्रयेत ॥४॥

लक्ष्मणः—समाश्वसतु समाश्वसतु नामार्यः। अग्र एव पम्पाभिधानं सरो वर्तते। तत्र सलिल-सीकर-सेकशिशिर-समीरण-स्पर्शेनात्मानं गत-क्लमं करोतु नामार्यः।

तो अब यहाँ ठहर कर क्या करूँ क्योंकि शरीर से थका हुआ भी मन से भी थक गया हूँ।

तापस—सो मैं भी चलता हूँ आश्रम कार्यों को पूरा करने के लिए, क्योंकि विलम्ब हो रहा है।

(दोनों चले गए)

(विष्कम्भक समाप्त)

(सीता की खोज में श्रान्त मन वाले राम का लक्ष्मण के साथ प्रवेश)

लक्ष्मण—देव ! इधर इधर।

राम—(शोकपरीत मानस अपने को सकरुण अभिनीत करते हुए)

वत्स लक्ष्मण ! विश्रामहीन इस जीवन में विश्राम कहाँ है ? मैं गोदावरी तट के गर्त जलाशय, सघन वृक्ष तथा लता गृहों में देख चुका है। अब यह मन और शरीर से थका हुआ राम सीता के विना कहाँ आश्रय ले ॥४॥

लक्ष्मण—आर्य ! आश्वस्त हो आश्वस्त हो। आगे ही पम्पा नामक सरोवर है। आर्य यहाँ जल कणों से सिञ्चित पवन के स्पर्श से अपने को विगत-श्रम करें।

रामः—भद्र लक्ष्मण ! सीताहरणशोकसंतप्तं प्रतिशोधानले दंदह्यमानं को नु शमयेत् शीतलस्पर्शः ।

जलसीकर शीतलप्रभावं,
विलसन्मन्दसुगन्ध-गन्धवाहम् ।
शमयेन्नु सरः प्रियावियोग-,
ज्वलने प्रज्वलितं मनो मदीयम् ।।५।।

लक्ष्मणः—तात ! पम्पाभिधं सरस्तु सकलसंतापसंशमने प्रथितम् । तदत्र सरलावतार-पुलिने तरुच्छायायां क्षणमुपविशत्वार्यः, यतोऽतिकठिनं ललाटं तपस्तपति ।

रामः—अहो ! भगवान् विवस्वान् शिरसि वर्तते । नमस्ते कुलदेवते !

तप तात ! कुलाग्रणी विवस्वानवशं रामतनुं प्रतापय त्वम् ।
न शशाक यतोऽभिरक्षितुं वै कुलबध्वाश्चरितं निशाचरेभ्यः ।।६।।

(इति सायासमुपविशन्) अहो वत्स लक्ष्मण !

आर्यकुलमिदं चिरमपाख्यातं सीतापहरणाख्यानेनेति चिन्तयन् मनोऽतीव व्यथाकुलं जायते । अथ च तां दीनां स्मृत्वा तु हृदयं स्फुटतीव । यतः—

राम—भद्र लक्ष्मण ! सीता हरण शोक से संतप्त, प्रतिशोध की आग में निरन्तर जलने वालों को भला कौन सा शीतल स्पर्श शान्त करेगा ।

जल सीकरों से शीतल प्रभाव वाला मन्द सुगन्ध पवन से शोभित यह सरोवर प्रियावियोग की अग्नि में जलते हुए मेरे मन को क्या शान्त कर देगा ? ।।५।।

लक्ष्मण—तात ! पम्पा नामक सरोवर समस्त संतापो को शमन करने में प्रसिद्ध हैं । इसलिए आर्य यहाँ उतरने में सरल तट पर वृक्ष की छाया में क्षण भर के लिए बैठ जाएँ, क्योंकि ललाट को तपाने वाला सूर्य तीव्रता से तप रहा है ।

राम—अरे, भगवान सूर्य सिर पर आ गए हैं कुलदेवता तुम्हें नमस्कार है ।

हे तात, कुलाग्रणी सूर्य तुम अबाध तपो, इस राम के शरीर को तपाओ, क्योंकि यह तुम्हारी कुलवधू की लज्जा को निशाचरों से बचाने में समर्थ नही हुआ ।।६।।

(कठिनाई से बैठते हुए) अरे वत्स लक्ष्मण !

यह आर्यकुल सीता अपहरण आख्यान से 'चिरकाल के लिए कुख्यात हो गया, यह सोचते हुए मेरा मन अत्यन्त व्यथा से आकुल हो जाता है और उस दिन को याद कर हृदय फटने सा लगता है, क्योंकि

या वनान्तान्निवृत्तं मामलब्ध्वा चिन्तिताभवत् ।
सा कथं मद् वियोगेऽस्मिन्नविता जीवनं सती ।।७।।

लक्ष्मणः—आश्वसतु नामार्यः सीता जीवनं धरति । कथं नाम क्षत्रिय-कुलसंभवार्यनारी कातरेव प्राणान् परित्यक्षति ? अचिरादेव सीता हस्तगता भविष्यति ।

रामः—प्रिय लक्ष्मण ! ममानुज ! किमेभिर्मधुरवचनविन्यासै र्मे मनोविनोदः सम्भाव्यते । तथापि वत्स ! इति तु जानीहि (क्रोधं नाट्यन्)

सीता चेद् गिरिकन्दरेषु विपिने किम्वा पृथिव्यास्तले,
पाताले सुरनागकिन्नरकुले कालोग्रदंष्ट्रामुखे ।
स्याद् देवी यदि जीविता ननु धनुष्कोदण्डमुज्जृम्भयन्,
रामो राहुमुखाद्यथा शशिकलां त्रातुं प्रतिज्ञातवान् ।।८।।

लक्ष्मणः—तात ! नान्यथा चिन्तयित्वा । निश्चितमेव सीता लङ्कायां बन्दिनी । एतत्तु राक्षसेश्वरस्य रावणस्यैव दुष्कृत्यम् ।

रामः—आः राक्षसराज ! अबलापहारिन्! लङ्केश ! क्वते गतं भुवन-प्रथितं शौर्याडम्बरम् ।

लङ्काम्भोधिगंभीरनीरपरिखा रक्षांसि ते सैनिकाः ।
देवेन्द्रप्रतिभापराभवकरी शक्तिर्भुजे निष्ठुरा ।

जो मुझे वन से लौटा नहीं पाकर चिन्तित हो जाती थी वह सती मेरे इस वियोग में जीवित कैसे रहेगी ।।७।।

लक्ष्मण—आर्य आश्वस्त हो, सीता जीवित है । क्षत्रिय कुल में उत्पन्न आर्यनारी कायर की तरह प्राण कैसे छोड़ देगी । शीघ्र ही सीता हस्तगत होगी ।

राम—प्रिय लक्ष्मण ! मेरे भाई ! क्या इन मधुर वचनों की रचनाओं से मेरा मनोविनोद सम्भव है । फिर भी वत्स इतना तो जान लो (क्रोध करता हुआ)

पृथ्वी तल पर पर्वत कन्दराओं में, वन में, पाताल में, सुर असुर नाग, किन्नर कुल में, काल की उग्र दाढ़ वाले मुख में जहाँ कहीं भी यदि वह देवी सीता जीवित है तो निश्चय ही कोदण्ड धनुष को चढ़ाता हुआ यह राम राहु के मुख से चन्द्रकला की भाँति रक्षा करने की प्रतिज्ञा करता है ।।८।।

लक्ष्मण—तात ! अन्यथा न सोचे । निश्चय ही सीता लङ्का में बन्दिनी है । यह राक्षसेश्वर रावण का ही दुष्कृत्य है ।

राम—आह राक्षस राज ! अबला का हरण करने वाले, लङ्केश ! तेरा भुवन विख्यात शौर्य का आडम्बर कहाँ गया ।

समुद्र के गहरे जल की परिखा वाली तेरी लङ्का है राक्षस तेरे सैनिक है,

यद्रामस्यकठोरशायकपथं त्यक्त्वासुभीत्या सठः ।
यातश्चौर्यपथं क्व ते गतमहो ! शौर्यं महद् रावण ! ।।९।।

लक्ष्मणः—क्वाभियास्यति । आर्यशरसंपातपथाद् भीतः क्वाभियास्यति सीतापहारी । तदार्य ! शीघ्रमेव—

प्रचण्डचापोद्धृत वाण विद्धः,
क्रोधाग्निदग्धो दशकन्धरोऽसौ ।
सेनाभिराजौ पतितस्तवाग्रे,
भूमौ विलुण्ठन् सह राजलक्ष्म्या ।।१०।।

रामः—(सरोषम्) एतत्तु जानीमो वत्स लक्ष्मण !
सीतापहरणं नूनं भविता रावणान्तकम् ।
लक्ष्मणः—सत्यमेव जानाति भ्रातः !
रामः—(परिदेवयन्) एतदपि जानामि—
भार्यापमानपीडान्तं रामस्यापि च जीवनम् ।।११।।

लक्ष्मणः—(स्वगतम्) रोषकषायितेऽप्यार्यस्य चक्षुषी पुनः साश्रुणी-जाते ! अहो ! अतिकष्टं वर्तते ।

देवेन्द्र की प्रतिभा को पराजित करने वाली निष्ठुर शक्ति तेरी भुजाओं में है । तब यह जो प्राणों के भय से राम के कठोर शायकों के मार्ग को छोड़कर चोरी के मार्ग पर चल पड़ा, तो अरे शठ रावण ! तेरा वह महान शौर्य कहाँ चला गया ? ।।९।।

लक्ष्मण—कहाँ जाएगा, आर्यशर की मार के पथ से भयभीत, कहाँ जाएगा, सीतापहारी । आर्य ! शीघ्र ही—

प्रचण्ड चाप से निकले हुए वाणों से विधा हुआ, आपकी क्रोधाग्नि में सेना के साथ जलता हुआ, यह दशकन्धर युद्ध में राजलक्ष्मी के साथ भूमि पर लुढ़कता हुआ, तुम्हारे आगे गिरेगा ।।१०।।

राम—(सरोष) यह तो मैं जानता हूँ, वत्स लक्ष्मण ! सीताहरण निश्चय ही रावण का विनाशक होगा ।

लक्ष्मण—सत्य ही जानते हैं भ्राता

राम—(दुखी होते हुए) यह भी जानता हूँ

और राम के जीदन का भी भार्या के अपमान की पीडा से ही अन्त हो जाएगा ।।११।।

लक्ष्मण—(स्वगत) रोष कपायित भी आर्य के नेत्र पुनः अश्रुपूर्ण हो गए अहो ! बहुत कष्टकर स्थिति है ।

रामः—सैव जानकी मयापहारिता लक्ष्मण !

या साकेतसुखं विहाय विभवं भूत्वा तपस्विप्रिया,
याता दण्डकमुग्रसत्वमपि हा ! विश्वस्य मद्विक्रमम् ।
तां वै व्याघ्रमुखे मृगीमिव रिपोरङ्के क्षिपन् कातरां,
रामोऽद्यपि धनुर्धरोभुवितले जीवत्यसौ निष्ठुरः ॥११॥

लक्ष्मणः—आर्य ! धैर्यमालम्ब्यताम् । आर्यक्षत्रियोऽसि कथं नाम मोहेन सीतान्वेषणोद्यमः शिथिलीक्रियते ।

रामः—(अनाकर्ण्य) हा देवि सीते ! हा मय्यनुरागिणि ! वैदेहि ! त्वां विना शून्यादिशः, तमोवृतं जगत् नीरसा रसा, निष्फलं जीवनं, निर्बलो रामः । त्वां विना कथं मेऽयोध्या निवृत्तिः । अरण्यमेवशरणमथवामृत्युपाश एव । तदागच्छ सीते ! क्षमस्व, वियोगप्रतिशोधज्वालावलीढं पश्य गतायुषं रामम्—

हा हा ! देवि ! द्रुमतरुलतासिन्धुशैला विशाला,
द्रष्टुं त्वामाकुलितमनसा मार्गयन्तीव मार्गम् ।
आगच्छार्ये ! करुणहृदये ! राममेनं क्षमस्व,
शीतस्पर्शैः किसलयकरैः संस्पृशन्ती समाङ्गम् ॥१२॥

राम—लक्ष्मण ! वही जानकी मैंने अपहृत करा दी जो मेरे विक्रम पर विश्वास करके साकेत का सुख और 'विभव छोड़कर, तपस्वी की प्रिया बनकर उग्र जीवों से भरे दण्डक वन में चली आयी निश्चय ही उस दीन को व्याघ्र के मुख में मृगी की भाँति शत्रु की गोद में डालता हुआ यह निष्ठुर धनुर्धर राम पृथ्वी पर आज भी जीवित है ॥११॥

लक्ष्मण—आर्य ! धैर्य का सहारा लीजिए । आप आर्य क्षत्रिय हो, मोह के द्वारा सीता की खोज का प्रयत्न क्यों शिथिल किए दे रहे हो ।

राम—(न सुनते हुए) हा देवि सीता मुझ में अनुराग करने वाली वैदेहि ! तुम्हारे बिना दिशाएँ शून्य है, संसार अन्धकार मय है, पृथ्वी नीरस है जीवन निष्फल हैं, राम निर्बल है । तुम्हारे बिना मैं अयोध्या कैसे लौटूँगा । अब अरण्य ही शरण है अथवा मृत्यु पाश ही, तो आओ सीते ! आओ, वियोग और प्रतिशोध की ज्वाला द्वारा निगले हुए इस गतायुष राम को देखो ।

हा हा देवि ! यह विशाल वृक्ष, तरुलताएँ, सिन्धु और पहाड़ तुम्हें देखने के लिए मानो व्याकुल मन से तुम्हारा मार्ग खोज रहे हैं । करुण हृदय वाली आर्ये ! तुम आओ और शीत स्पर्श वाले कमल जैसे हाथों से मेरे अङ्गों का स्पर्श करती हुई इस राम को क्षमा कर दो ॥१२॥

(इति मोहमुपगतः)

लक्ष्मणः—(स्वगतम्) अहो सीतापहरणपरिभवपरिवादेन वियोगेन त्रातीव व्याकुलीभूतोऽधुनार्यमहोदयः । तदार्यं शीतलजलसीकरस्पर्शेन संज्ञामुपनयामि ।

(तथाकृत्वा) अहो संज्ञामागतो भ्राता ।

रामः—(उपविश्य) लक्ष्मण ! न मे निःसृताः प्राणाः । कथं नामैतेऽतिदारुणाः सीतादर्शनलोभेन मां त्यक्तुं क्षमाः ।

प्राणाः सुदारुणा देहान्निर्गच्छन्ति न नामतः ।
सीतावियोगदुःखेऽस्मिन् कठिनं जीवनं मम ॥१३॥

लक्ष्मणः—आर्य ! निर्जनेऽस्मिन्नसहाये बने धैर्यपोतं विना कथमेष विपत्सागरस्ततुं शक्यते ? अतस्तात ! धैर्येणैव सीता जीवनं त्रायते, अन्यथा तु सर्वं गतमेव जानीहि । तदत्र स्थिरीभूय लङ्काभियानरणनीति विचारणीयाथवा परिदेवनैरात्मा परिपीडनीयः ? तात !

साहसेन च धैर्येण व्युत्पन्नमतयो जनाः ।
आपत्सागरमुत्तीर्य कुर्वन्ति युगरक्षणम् ॥१४॥

अथ च—तात ! चेत् क्षत्रियं धर्मं त्यक्त्वा रामो विनश्यति ।
कस्त्राता लोकमर्यादामुद्धर्ता कश्च पीडितान् ॥१५॥

(वेहोश हो जाते हैं)

लक्ष्मण—(स्वगत) अरे सीता अपहरण के परिभव परिवाद और वियोग से इस समय आर्य महोदय अत्यन्त व्याकुल हो गए हैं । तो आर्य को शीतल जल कणों के स्पर्श से होश में लाता हूँ (वैसा करके) अहो ! होश में आ गए ।

राम—(बैठकर) लक्ष्मण ! मेरे प्राण नहीं निकले । यह अति दारुण प्राण सीता दर्शन के लोभ से भला मुझे कैसे छोड़ सकते है ।

प्राण बड़े दारुण है, देह को नाम के लिए भी नही छोड़ते हैं और इस सीता वियोग के दुःख में मेरा जीवन कठिन हो गया है ॥१३॥

लक्ष्मण—इस निर्जन असहाय वन में धैर्य के जलपोत विना यह विपत्ति का सागर कैसे पार किया जा सकता है ? अतः तात ! धैर्य से ही सीता के जीवन की रक्षा की जा सकती है । अन्यथा सब गया ही समझो । इसलिए यहाँ लङ्का पर अभियान की रणनीति विचारनी है या विलाप से आत्मा को दुःख देना है ? तात !—

व्युत्पन्न मति वाले पुरुष साहस और धैर्य से आपत्ति के समुद्र को पार करके युग की रक्षा कर लेते हैं ॥१४॥

तात ! यदि क्षत्रिय धर्म को छोड़कर राम नष्ट हो जाएगा तो कौन लोकमर्यादा की रक्षा करेगा और कौन पीड़ितों का उद्धार करेगा ॥१५॥

तदुत्तिष्ठ तात ! समुद्धर स्ववीर्यं, स्मरार्य ! राघवं क्षात्रम् । कोदण्ड-काण्डेनाकाण्डे लङ्काकाण्डमारचयन् दशकण्ठकण्ठान् निशितशरसम्पात-लक्ष्यान् विधेहि । यतो हि—

मरणं जीवनधर्मो यावज्जीवेदुपार्जयेत् कीर्तिम् ।
सर्वं नश्वरमेका कीर्तिर्लोकान्त-कालेऽपि ।।१६।।

रामः—(स्थिरीभूय) प्रिय वत्स लक्ष्मण ! नान्यथा मां सम्भाव्य ! धैर्यं मयालम्व्यते, साहसविरहितापि न मे हृदये, कृत्याकृत्यविवेकोऽपिन विस्मृतः । तथापि सीताकष्टकातरता तद्धर्षणासहायव्यथा मां व्याकुलयति ।

धैर्यं प्रेरयति क्षात्रं, कोदण्डं कर्तुमुद्यतम् ।
सीताव्यथास्मृतिर्भूयः शान्तं मथ्नाति मानसम् ।।१७।।

लक्ष्मण ! किं नाम सीता विस्मरणीया ?

आर्यं स्वधर्ममनुपालयितुं विसेहे,
बन्यानि दुःख-निवहानि यया सहैव ।
रक्षोगणैरपहृतां च कदर्थितां तां
सीतां कथं जनकजां बद, विस्मरामि ।।१८।।

इसलिए उठो तात ! अपने बल को संभालो आर्य ! रघुवंशीय क्षत्रिय धर्म का स्मरण करिए, कोदण्ड काण्ड से असमय ही लङ्का-काण्ड की रचना करते हुए दशकण्ठ के कण्ठों को अपने निशित शायको का लक्ष्य वनाइए । क्योंकि—

मरण तो जीवन का धर्म है अतः जव तक जिए कीर्ति का उपार्जन करना चाहिए । सब कुछ नश्वर है केवल एक कीर्ति ही लोक के अन्त तक रहती है ।।१६।।

राम—(स्थिर होकर) प्रिय वत्स लक्ष्मण ! मुझे अन्यथा न समझो । मैं धैर्य को धारण करता हूँ, मेरे हृदय से साहस का अभाव भी नहीं है कृत्य और अकृत्य का विवेक भी नहीं भूला हूँ तथापि सीता की कष्ट-कातरता उसके अपमान की असहाय व्यथा मुझे व्याकुल कर देती है ।

धैर्य मेरे क्षत्रिय धर्म को कोदण्ड उठाने के लिए प्रेरित करता है पर सीता की व्यथा की स्मृति मेरे शान्त मानस को पुनः मथने लगती है ।।१७।।

लक्ष्मण ! क्या सीता को भला भुलाया जा सकता है ?

अपने आर्य-धर्म का पालन करने के लिए जिसके साथ ही वन के अनेकों दुःख सहे हैं, राक्षसों द्वारा अपहृत विपत्ति ग्रस्त उस जनक-पुत्री सीता को, वताओ, क्या भूल जाऊँ ।।१८।।

लक्ष्मणः—कथमार्य ! विस्मरणीया जानकी ? अतस्तात ! तथा प्रयतितव्यं यथा रक्षःकुलकलङ्कात् सा प्रमुच्यते। अतोऽस्मिन् धैर्यभञ्जनं न केवलं सीतामुक्तिबाधकत्वेऽपितु दशग्रीवस्य गर्वोन्नायकत्वेऽपि स्थास्यति।

रामः—लक्ष्मण ! किमेतत् करुणहृदयस्य विलपनं, रामस्य शक्तिशैथिल्यं सूचयति। नहि नहि भ्रातर्नैतानि सीताविरह-विलपनानि। इमानि तु दशकण्टकूटपराभूतस्यार्यक्षत्रियस्य पराभवाश्रूणि यद्स्य सीतासंरक्षणव्रतिनोऽङ्कादपहृता जानकी। विश्वासभ्रंशाद् विनष्टा सीता, कलङ्कितं रघुकुलम्। अयमेव दहनो मां तापयति। यत्—

रावणो नश्यते वापि जानकी मुक्तिमाप्नुयात्।
सीतापहारदुर्वृत्तं कथं लोके विनंक्ष्यति ॥१९॥
इति कृत्वा पराभूतिज्वाला दहति मानसम्।
वृथा क्षात्रं धनुः शौर्यं, यदा सीतापहारिता ॥२०॥

लक्ष्मणः—जानामि तात ! मर्यादापुरुषोत्तमोऽसि कथं प्राकृतजनवदाचरिष्यसि। अन्तःपीडां कथं वा नावगच्छामि। तथापि तात ! कथमेष रावणस्य जयो मन्यते—

लक्ष्मण—आर्य ! सीता को कैसे भुला दिया जायगा इसलिए तात ! वैसा प्रयत्न करना है जिससे वह राक्षसकुलकलङ्क से मुक्त हो सके। इसलिए धैर्य की तैयारी के समय आपका धैर्य भञ्जन न केवल सीता की मुक्ति का बाधक है अपितु दशग्रीव के गर्व को ऊँचा भी करेगा।

राम—लक्ष्मण ! क्या यह राम के करुण हृदय का विलाप शक्ति की शिथिलता का सूचक है ? नहीं, भाई नहीं, यह सीता के विरह का विलाप नहीं है। यह तो दशकण्ठ की कूटनीति से पराजित आर्य क्षत्रिय के पराभाव के अश्रु हैं जिसने सीता-संरक्षण की प्रतिज्ञा करने वाले इस राम की गोद से जानकी को हर लिया। विश्वास के नष्ट होने से सीता नष्ट हो गयी, रघुकुल कलङ्कित हो गया। यही आग मुझे जला रही है कि—

रावण नष्ट हो जाए या जानकी मुक्त हो जाए पर सीता अपहरण का दुर्वृत्त संसार में कैसे नष्ट होगा ॥१९॥

यही सोचकर पराभव की ज्वाला मन को जला रही है कि जब सीता का अपहरण करा दिया तब मेरा क्षत्रिय धर्म, धनुष और शौर्य सब व्यर्थ हैं ॥२०॥

लक्ष्मण—जानता हूँ तात ! मर्यादा पुरुषोत्तम हो साधारण जन की भाँति आचरण क्यों करोगे। अन्तर की पीड़ा को भी कैसे नहीं जानता हूँ। फिर भी तात ! क्या इसे रावण की विजय मानते हो ?

जायते युद्धसंघर्षे विजयश्च पराजयः ।
अन्तिमो विजयो यस्य स एव विजयी मतः ॥२१॥

रामः—कथं नामैतद् विस्मरणीयं यदस्माकं हृदयविजयाभियानमेतत् । युगधर्मसंधानेऽत्र जनानामार्यधर्मेण सह सूत्रं संधानयन्तो विश्वबन्धुता प्रसारायं समागता वयम् ।

लक्ष्मणः—तथापि राक्षसैर्विवशीकृता वयं धनुरूद्यमाय ।

रामः—आः दुर्दैव !

सीतापहारिता रामो लक्ष्मणश्च विवासितौ
रावणस्यापि नाशेन दैव ! किं साधयिष्यति ॥२२॥

लक्ष्मणः—अनेन विश्व-धर्मोद्धारमेव साधयिता ।

रामः—भवेन्नाम तावदेतत् । स्यान्नामात्याचारविनाशः पृथ्वीतलात् । लक्ष्मण !

धर्मत्राणाय येनेयं स्वीकृता तापस-क्रिया ।
सैष दाशरथि भूयो दधाति क्षात्रमव्ययम् ॥२३॥

(नेपथ्ये)

पम्पाया नाति दूरं, वसति गिरिवरे, ऋष्यमूके स्वमित्रैः,
सुग्रीवो यस्य दारान्, विभवमपि बलादग्रबन्धुर्जहार ।

युद्ध संघर्ष में जय और पराजय होती रहती है, अन्त में जिसकी विजय होती है वही विजयी होता है ॥२१॥

राम—यह कैसे भुला दिया जाए कि हम लोगों का यह हृदयों पर विजय का अभियान है । युग धर्म की साधना में लोगों का आर्य धर्म के साथ सूत्र संधान करते हुए हम लोग विश्व बन्धुत्व के प्रसार के लिए यहाँ आए हैं ।

लक्ष्मण—फिर भी राक्षसों ने हमें धनुष उठाने के लिए विवश कर दिया ।

राम—अरे दुर्दैव !

सीता का अपहरण करा दिया, राम लक्ष्मण को घर से निकाल दिया । अरे दैव ! अब रावण के विनाश से क्या प्राप्त करेगा ॥२२॥

लक्ष्मण—इससे विश्व धर्म के उद्धार की साधना करेगा ।

राम—तो यही होने दो, पृथ्वी तल से अब अत्याचार का विनाश होने दो लक्ष्मण !

जिसने धर्म की रक्षा के लिए यह तापस वृत्ति को स्वीकार किया था वही दाशरथि राम पुनः अक्षुण्ण क्षात्र तेज को धारण करता है ॥२३॥

(नेपथ्ये में)

पम्पा सरोवर से थोड़ी दूर स्थित ऋष्य-मूक पर्वत पर अपने मित्रों के साथ

संदेशं मित्रताया, विनयनययुतस्यार्यमित्रस्य तस्य,
नीत्वा प्राप्तो हनूमान्, वदत वदत भोः, क्वास्त्यसौ कौशलेन्द्रः ।।२४।।

रामः—(आकर्ण्य) प्रतीयते लक्ष्मण! कोऽप्यसौ मामन्वेष्यति । (पुनर्नेपथ्ये)……वदत वदत भोः क्वास्त्यसौ कौशलेन्द्रः ।

लक्ष्मणः—एतत्तु परमानन्दकरं यत् सुग्रीव-संदेशं वहन् हनुमानित एवायाति । तदार्यस्य शौर्यसंधाने शुभाशंसनम् ।

रामः—सत्यमतीव सुखदायकानि मैत्रीसन्देशवाक्यानि, परमरे! क एष दारापहारी द्वितीयो रावणस्तन्मित्रं वा प्रतीयते यो बन्धुसम्बन्धं कलङ्कयन्नपि न लज्जते ।

(ततः प्रविश्य)

हनुमान्—आर्यधर्मे दीक्षितोऽयं पवनतनयो हनुमान् नाम वैष्णवो विनतशिरसोभौ पुरुषसिंहौ प्राञ्जलिनाभिवादयते ।

रामः—भद्र! वर्धस्वायुष्येन कल्याणेन च ।

हनुमान्—आर्य ! ऋष्यमूकादहं स्वामिनः सुग्रीवस्य सन्देशेन सम्प्राप्तोऽस्मि ।

रामः—तदत्र सुग्रीव-दूतस्य स्वागतमार्यस्य । अपि नाम कुशली वर्तते वानरेन्द्रः । मैत्री सन्देशेनात्मानं बहुमन्यमानः प्रस्तुतं परिज्ञातुमिच्छामि ।

सुग्रीव निवास करते हैं जिनकी पत्नी तथा सम्पत्ति को उग्र बन्धु ने बलात् हर लिया है । विनम्रता और नीति से युक्त आर्यों के मित्र उन सुग्रीव के मित्रता के सन्देश को लेकर हनूमान प्राप्त हुआ है अरे बताओ बताओ ! कौशलेन्द्र राम कहाँ है ।।२४।।

राम—(सुनकर) लगता है लक्ष्मण ! यह कोई मुझे खोज रहा है । (पुनः नेपथ्य में) बताओ ! बताओ कौशलेन्द्र कहाँ है ।

लक्ष्मण—यह तो परम आनन्दकर है कि सुग्रीव का संदेश लेकर हनुमान इधर ही आ रहे हैं । यह तो आर्य के शौर्य संधान में शुभ शकुन है ।

राम—सच ही मैत्री संदेश के वाक्य परम सुखदायक होते हैं परन्तु ! यह कौन दूसरा नारी अपहरण करने वाला रावण या उसका मित्र प्रतीत होता है जो बन्धु-सम्बन्ध को कलंकित करता हुआ भी लज्जित नहीं होता है ।

(प्रवेश करके)

हनुमान्—आर्य धर्म में दीक्षित यह पवन तनय हनुमान् नामक वैष्णव विनत शिर से दोनों पुरुष-सिंहों का हाथ जोड़कर अभिवादन करता है ।

राम—भद्र आयुष्य और कल्याण से तुम्हारी वृद्धि होवे ।

हनुमान्—आर्य ? मैं स्वामी के संदेश के साथ ऋष्यमूक पर्वत से आ रहा हूँ ।

राम—तो यहाँ आर्य सुग्रीव-दूत का स्वागत है । वानरेन्द्र सुग्रीव कुशल से तो हैं ? मैत्री-संदेश से मैं अपना सम्मान समझता हुआ प्रस्तुत को जानना चाहता हूँ ।

हनुमान्—आर्य ! वानरेन्द्रेणेयं पत्रिका भवत्सकाशं प्रेषिता। तद् वाचयित्वा आर्यः प्रमाणम्। (इति ददाति)

रामः—(आदरेण स्वीकृत्य) वत्स लक्ष्मण ! वाचयतु नामार्यस्य सन्देशम्, यदुत्सुकं मे मनो विषयपरिज्ञानाय।

लक्ष्मणः—यथाज्ञापयत्यार्यः (इति गृहीत्वा वाचयति)

"स्वस्ति श्रीरघुवंशकैरवनिशानाथाय नाथाय मे,
सुग्रीवः शिरसा नतेन तदसौ त्वां संदिशत्यादरात्।
भ्रात्रा रावणसन्धिबद्धमतिना निर्वासितो राज्यतः,
सख्यं वांछति येन शत्रुनिवहो विध्वंस्यते वै द्वयोः ॥२५॥
रावणेन हृता सीता, बालिना चापि मत्प्रिया।
हृतदारावुभौ शत्रुविध्वंसे कृतनिश्चयौ ॥२६॥

पुनरपि जानीहि—

सन्धिः समानधर्मे विहितस्तुल्येन मित्रेण।
कुरुते विप्रतिकारं विपदां दाताऽपि सम्पत्तेः ॥२७॥

तद् यदि भवते रोचते। असौ महाबली परमार्यभक्तो हनुमान् श्रीमतामानेतुमुद्यतो वर्तते। चरमौत्सुक्येन च वयमत्र स्वागतार्थं भवन्तं प्रतीक्षामहे।

हनुमान्—आपके लिए संदेश के साथ वानरेन्द्र ने यह पत्र आपके पास भेजा है। इसे पढ़कर आर्य निर्णय लें। (देता है)

राम—(आदर के साथ लेकर) वत्स लक्ष्मण ! आर्य के संदेश को पढ़िए क्योंकि मेरा मन विषय को जानने के लिए उत्सुक है।

लक्ष्मण—जैसी आर्य आज्ञा देते हैं (लेकर पढ़ते हैं)

"श्री रघुवंश रूपी कुमुद के चन्द्र मेरे स्वामी के लिए स्वस्ति वाचन है। यह सुग्रीव विनत शिर से आदर के साथ आप को संदेश देता है कि रावण के साथ संधि करने वाले भाई बालि द्वारा राज्य से निर्वासित मैं, आपसे मित्रता चाहता हूँ, जिससे निश्चय ही हम दोनों का शत्रु समूह नष्ट हो सके ॥२५॥

रावण ने सीता का हरण किया है और बालि ने मेरी प्रिया का। अपहृत पत्नी वाले हम दोनों शत्रु के विध्वंस का निश्चय कर चुके हैं ॥२६॥

इतना और भी जान ले—

समान धर्म में समान मित्र के साथ की हुई संधि विपत्तियों का प्रतीकार करती है और सम्पत्ति प्रदान करती है ॥२७॥

तो यदि आपको रुचि कर हो, यह महाबली, आर्य का परम भक्त हनुमान् आपको ले आने के लिए उपस्थित है और परम उत्सुकता से हम यहाँ आपके स्वागत की प्रतीक्षा कर रहे हैं"

इति ज्ञात्वा आर्यमहोदया एव प्रमाणम्

रामः—अहो ! पवनतनय ! भवत्स्वामिना सन्देशेनाहमतीव सन्तुष्टस्तन्निवेदयतु स्वामिने सुग्रीाय यद् रामः समानधर्मे सख्यं स्वीकरोति ।

हनुमान्—आर्य ! वर्धामहे, स्वामी भवन्तमृष्यमूके प्रतीक्षते तद् पादार्पणेन पवित्रीकुर्वन्तु नामाश्रमपदम् ।

रामः—यथा रोचते सुग्रीवाय, व्रजामो वयम् ।

(इति निष्क्रान्ताः सर्वे)

समाप्तोऽयं पञ्चमोऽङ्कः

यह समझ कर आर्य महोदय ही निर्णय करें ।

राम—अरे ! पवन तनय ! आपके स्वामी के संदेश से मैं अत्यन्त संतुष्ट हूँ । अपने स्वामी सुग्रीव को सूचित करें कि राम समान धर्म पर मित्रता स्वीकार करती है ।

हनुमान्—आर्य ! हम आनन्दित हुए स्वामी आपकी ऋष्यमूक पर प्रतीक्षा कर रहे हैं तो पादार्पण से आश्रम को पवित्र करें ।

राम—जो सुग्रीव को प्रिय है, हम चलते हैं ।

(सब चले जाते हैं)

पञ्चम अङ्क समाप्त

——

* ॐ *

षष्ठोऽङ्कः

(नेपथ्ये समवेत-स्वरेण)

स्वर्गे देवगणा ! दिवि द्युतिकरा नक्षत्र-सूर्येन्दवः !,
भूमौ वृक्षलताद्रिसिन्धुसरितो ! जीवाः ! स्थिरा जङ्गमाः ।
यूयं पश्यत लोकरक्षणधिया रामोऽग्नि-साक्षीकृतां,
सुग्रीवेण समानसन्धिसबलां मैत्रीं विधत्ते समम् ॥१॥

(ततः प्रविशन्ति वह्निवेदिकासम्मुखीना राम लक्ष्मण-सुग्रीवादयः)

(वैतालिकाः समवेत-स्वरेण पठन्ति 'स्वर्गे देवगणाः'……)

रामः—अग्निसाक्ष्यीकरोत्येष रामः सुग्रीव-मित्रताम् ।

सुग्रीवः—सुग्रीवोऽप्यग्निसाक्ष्येण मित्रतां प्रतिपद्यते ॥२॥

रामः—इयं मे महती दक्षिणपथोपलब्धि-र्यन्मया सुग्रीव-मैत्री समासादिता ।

सुग्रीवः—एतदपि मे महत्सौभाग्यं यदार्यकौशलेन्द्रेण सह मे सौहार्दं जातम् ।

रामः—न केवलं वाक्-सौहार्द्रं सक्रिय-सौहार्द्रमेतत् सम्पद्यते तद्यथा—

निकषं मित्रधर्मस्य मित्र-संताप नाशनम् ।

(नेपथ्य में)

स्वर्ग में देवगण ! आकाश में चमकने वाले नक्षत्र, सूर्य और चन्द्रमा ! पृथ्वी पर वृक्ष, लता, पर्वतों ! समुद्र और नदियों ! समस्त स्थिर और जङ्गम प्राणियों ! आप सभी लोग देखें कि लोकरक्षा की भावना से राम, अग्नि को साक्षी कर, सुग्रीव के साथ समान-सन्धि से शक्तिशाली मित्रता का विधान कर रहे हैं ॥१॥

(अग्निवेदी के सामने बैठे हुए राम लक्ष्मण सुग्रीव आदि का प्रवेश)

(वैतालिक समवेत स्वर में 'स्वर्गे देवगणाः' श्लोक पाठ करते हैं ।)

राम—यह राम, अग्नि को सुग्रीव की मित्रता का साक्षी बना रहा है ।

सुग्रीव—सुग्रीव भी अग्नि को साक्षी करके मित्रता का प्रतिपादन करु रहा है ॥२॥

राम—यह मेरी दक्षिणापथ की महान् उपलब्धि है कि मैंने सुग्रीव की मित्रता प्राप्त की ।

सुग्रीव—मेरा भी यह सौभाग्य है कि आर्य कौशलेन्द्र के साथ मेरी मित्रता हुई।

राम—यह केवल वाणी की मित्रता नहीं है। यह सक्रिय सौहार्द होगा । क्योंकि—

सुग्रीवः—सत्यमार्यवर !

स्वार्थं हित्वापि तत्कार्येष्वात्मभावेन चार्पणम् ॥३॥

कौशलेन्द्र ! तदेतत् प्रतिज्ञायते मया यत् सीतामुक्तिव्यवस्था सुग्रीव-जीवनस्य प्रथमो धर्मः ।

रामः—मित्र सुग्रीव ! स्यादेतत्, परं किष्किन्धाराज्ये तवारोहणं भार्या-मोचनं च यथा-पूर्वं मया संकल्पितं । तत्कृते व्यवस्था विधेया ।

(तदैव वैतालिकाः पठन्ति)

तीव्रं तापेन तप्तं भुवनतलमिदं वै निदाघानलेन,
पीडामन्तः समन्तान्मलिनतरुलतापल्लवाः सूचयन्ति ।
छायामाश्रित्य खिन्नास्तृषितपशुजनाः पक्षिणो निश्वसन्तः,
शीतश्यामस्वरूपं पवन-सहचरं वारिदं मार्गयन्ति ॥४॥

रामः—तदार्य ! सुग्रीव ! भ्रातृजायापहारिणं बालिनं द्रष्टुमिच्छामि, सम्पत्तिमधिकृत्य युष्मद्विवासनपटोस्तस्य शौर्यक्रूरतामालोकयितुमिच्छति मे मानसम् । तत्समरसाधनानि संनह्यताम् ।

सुग्रीवः—आर्य ! वर्धामहे श्रीमतामनेन साहस-प्रकरणेन । परं बालिना

मित्र के संताप का नाश करना मित्रता की कसौटी है ।

सुग्रीव—सत्य है आर्यवर ! स्वार्थ का त्याग करके भी मित्र कार्य में आत्म-भाव में समर्पित हो जाना चाहिए ॥३॥

कौशलेन्द्र ! अतः मैं यह प्रतिज्ञा करता हूँ कि सीता की मुक्ति की व्यवस्था करना सुग्रीव के जीवन का प्रथम धर्म होगा ।

राम—मित्र सुग्रीव ! ऐसा हो, परन्तु किष्किन्धा में तुम्हारा राज्यारोहण और पत्नी की मुक्ति यथा पूर्व मैंने संकल्पित की हैं, उसके लिए व्यवस्था करनी है ।

सुग्रीव—जैसी महानुभाव आज्ञा दें ।

(तभी वैतालिक पढ़ते हैं)

ग्रीष्म की दुपहरी के तीव्र-ताप से यह समस्त भूतल तप गया है । मलिन हुए तरुलता और पल्लव चारों ओर आन्तरिक पीडा सूचित कर रहे है । छाया का आश्रय लेकर बैठे खिन्न पशु और पक्षी निःश्वास लेते हुए शीतल श्यामरुपधारी पवन के सहचर मेघ को खोज रहे हैं ॥४॥

राम—आर्य सुग्रीव ! भाई की पत्नी का अपहरण करने वाले बालि को देखना चाहता हूँ, सम्पत्ति पर अधिकार कर तुम्हें निर्वासित करने में चतुर उसकी शौर्यमयी क्रूरता को मेरा मन देखना चाहता है । अतः समर के साधनों की तैयारी करें ।

सुग्रीव—आर्य ! आपके इस साहस से मुझे बढ़ावा मिलता है परन्तु बालि के

सह सैन्य-युद्धेऽलाभकरस्थितिः सपत्स्यते । तदत्रान्यैव काचिद् रणनीति-विचारणीयार्येण ।

रामः—राघवैः सदा युद्धप्रकरणे यशोलाभएवार्जितः कथं बालिना सहान्या रणनीतिः ? सुग्रीव ! तत्समाख्याहि । यतः—

कोदण्डकाण्डोद्यतचण्डवाणै,
वलिं महाव्यालमिव प्रमत्तम् ।
हत्वानुजस्त्रीगमनापराद्धं,
राज्यं समुद्धारयिता तवेदम् ।।५।।

सुग्रीवः—आर्य ! बालि-व्यवस्थाव्यवहारतोराज्ये सर्वत्र जना आतङ्किता अवसरं प्रतीक्षन्ते । प्रजाद्यापि मयि स्निह्यति । सेनाया सद्भावोऽपि मयार्जितः ।

अतो यदि प्रत्यक्षयुद्धघोषणा क्रियते चेद् बालिनिर्देशेन युद्धेऽवतीर्णा समग्रसेना विपत्स्यते । विनाशेन तस्याश्च विजितापि किष्किन्धा वीरशून्या लङ्काभियानेऽस्माकं कथं सहायिका भविता । यतः—

लङ्काभियानकाले, भवितास्माकं बल यदीयं तत् ।
समरेऽत्रैव निहत्य स्वयमामन्त्रणं विनाशस्य ।।६।।

साथ सैन्य-युद्ध में अपनी स्थिति अलाभकर रहेगी । इसलिए आर्य को यहाँ कोई अन्य रणनीति सोचनी पड़ेगी ।

राम—रघुवंशियों ने सदा युद्ध में यश कमाया है । फिर वालि के साथ अन्य रणनीति कैसी, सुग्रीव ! उसे स्पष्ट कहिए । क्योंकि—

प्रमत्त महाव्याल के समान, अनुज-पत्नी-गमन के अपराधी वालि को कोदण्ड-काण्ड से उद्यत, प्रचण्ड वाणो से मारकर मैं तुम्हारे इस राज्य का उद्धार करूँगा ।।५।।

सुग्रीव—आर्य ! वालि की शासन व्वस्था और व्यवहार से राज्य में सर्वत्र लोग आतंकित होकर अवसर की प्रतीक्षा कर रहे हैं । प्रजा आज भी मुझसे स्नेह करती है, सेना का सद्भाव भी मैंने अर्जित कर लिया है ।

यदि प्रत्यक्ष युद्ध की घोषणा कर दी जाती है तो वालि के निदेश से युद्ध में रत समस्त सेना के नष्ट हो जाने से विजय होने पर भी, वीर विहीन किष्किन्धा लङ्का अभियान में कैसे हमारी सहायक होगी । क्योंकि—

लङ्का अभियान काल में जो वल हमारा सहायक होगा, उसको युद्ध में यहीं मारकर, हम विनाश को स्वयं निमन्त्रण देगें ।।६।।

रामः—सुविचारितं वानरेन्द्र !

सुग्रीवः—यथावगतमेव यद् बाली रावणेन सह विहितसन्धिर्वर्तते । अनेन दुरभिसन्धिना न केवलं वानरसेना, रक्षःसेनापि युद्धसम्मुखीना सम्भाव्यते ।

रामः—सत्यमुक्तं वानरेन्द्र ! तदेतदभियानमनेन दुष्करं सम्पत्स्यते ।

सुग्रीवः—अस्मिन् युद्धे किष्किन्धापक्षत्रय-विरोधस्य युद्धस्थली भविता । लङ्कायां दृढ़-रक्षा-पङ्क्तिं विधाय रावणः स्वसेनया किष्किन्धायुद्धं विस्तारयिता । उभयथापि वानरसेनाविनाशेनैकतो लङ्काभियानं खपुष्पायितं भवितैवापरतो दशकण्ठ-सेना-कृते, सुकरमार्यावर्ताभियानं भविष्यति ।

रामः—वानरेन्द्र ! सर्वत्र ते बुद्धिचातुरी प्रतिभाप्रौढ़तामेव प्रकटीकरोति । तदत्र कीदृशं विचारितम् ।

सुग्रीवः—आर्य ! अत्र कूटनीति-प्रकरणेनैव बाली हन्तुं शक्यते ।

रामः—ननु कीदृशी कूटनीतिः ?

सुग्रीवः—यथा केवलं बालि र्हन्यते ।

रामः—कीदृशी नाम सा ?

राम—ठीक सोचा है वानरेन्द्र !

सुग्रीव—जैसा ज्ञात है, बालि रावण के साथ सन्धि किये हैं । इस दुरभिसन्धि से न केवल वानर-सेना, राक्षसों की सेना भी युद्ध में आ सकती है ।

राम—वानरेन्द्र ! तुम सच कहते हो । इससे तो यह अभियान दुष्कर हो जायेगा ।

सुग्रीव—इस युद्ध में किष्किन्धा तीन विरोधी पक्षों की युद्ध-स्थली हो जायेगी । लङ्का की रक्षा-पंक्ति को दृढ़ करके, रावण अपनी सेना के द्वारा युद्ध का विस्तार कर देगा । दोनों ओर भी वानर-सेना के विनाश से एक ओर तो लङ्का अभियान आकाश-कुसुम हो जायेगा और दूसरी ओर दशकण्ठ की सेना के लिए आर्यावर्त्त-अभियान सरल हो जायेगा ।

राम—वानरेन्द्र ! सर्वत्र तुम्हारी बुद्धि-चातुरी, प्रतिभा की प्रौढ़ता प्रकट करती है । तो इस विषय में क्या विचार किया है ?

सुग्रीव—आर्य ! यहाँ कूटनीति द्वारा ही बालि मारा जा सकता है ।

राम—कैसी कूटनीति ?

सुग्रीव—जिससे केवल बालि मरेगा ।

राम—वह कैसी ?

सुग्रीवः—मायाविनः प्रकरणमाश्रित्य वालिनाऽहं बहुवारं ताडितो गदायुद्धे। तं गत्वाहं पुनर्गदायुद्धायाकारयामि कालमप्रतीक्षमाणः स मत्स्वरेण मां हन्तुमागमिष्यति। तदैव—

तरुपार्श्वंगतेनैव युध्यन्नेव मया सह।
त्वया वालिर्निहन्तव्यो बाणेनैकेन राघव ! ॥७॥

रामः—अहो सुग्रीव ! कथमेतद् राघवेण सम्भाव्यते ?

शरसन्धाने शिथिलं प्रहरति लक्ष्य-स्थितं न यः शत्रुम्।
तरुपार्श्वेन निहन्ता रामोऽसौ वालिनं, हा धिक् ! ॥८॥

रामो रणे शूरो न खलु कूट कलापे। तदावेदयतु नाम वालिने, यदसौ दाशरथि द्वन्द्वे तमाह्वयति।

वाली चेन्म्रियते द्वन्द्वे प्रतिज्ञा पूर्यते मया।
मृतोऽहं यदि सुग्रीव ! क्षन्तव्या मे विडम्बना ॥९॥

सुग्रीवः—राजनीति-विशारदेनाप्यार्येण कथमेतद् विस्मर्यते यदसौ वाली कारणमविज्ञाय कथं द्वन्द्वे प्रवृत्तो भविता। युद्ध-घोषणा चेत् क्रियते तदा पूर्ववत् योजनाविनाशः।

सुग्रीव—मायावी नामक राक्षस का सन्दर्भ लेकर वालि ने मुझे कई बार युद्ध में मारा है। अतः मैं जाकर उसको पुन गदा-युद्ध के लिए ललकारूँगा। मेरा स्वर सुनकर, बिना समय की प्रतीक्षा किए वह मुझे मारने आ जायेगा। उसी समय—

हे राघव ! युद्ध में मेरे साथ लड़ते हुए बालि को, आप वृक्ष की आड़ लेकर एक बाण से मार दें ॥७।

राम—अहो सुग्रीव ! राघव के द्वारा यह कैसे हो सकता है। ?

जो युद्ध में बाण-संधान में शिथिल, शत्रु को लक्ष्य पर स्थित होते हुए भी नहीं मारता हैं, वह राम वृक्ष की आड़ लेकर बालि को मारेगा ? धिक्कार है ॥८॥

राम रण में शूर है, कूट-कलागों में नहीं। अतः आप वालि से निवेदन कर दें—यह दशरथ पुत्र राम, उसे द्वन्द्व के लिए ललकारता है—

यदि द्वन्द्व-युद्ध में बालि मर जाता है, मेरी प्रतिज्ञा पूर्ण हो जायेगी और, हे सुग्रीव ! यदि मैं मर गया तो मेरी इस विडम्बना को क्षमा कर देना ॥९॥

सुग्रीव—राजनीति-विशारद होकर भी आप यह कैसे भूल जाते हैं कि वालि कारण बिना जाने द्वन्द्व में क्यों प्रवृत्त होने लगेगा, और यदि युद्ध-घोषणा करते हो तो पूर्ववत् योजना का विनाश हो जायेगा—

सति योजना-विनाशे लङ्कायानं कथं नु सम्भाव्यम् ।
लङ्कागमनाभावे भविता मुक्ति र्न जानक्याः ॥१०॥

लक्ष्मणः—आर्य ! राजनीति-प्रसंगे सर्वं सम्भाव्यते । रावणेन कूटनीत्या सीतापहरणेनाप्यस्माकमद्यापि मोहभङ्गो न भूतः । तदत्र तात ! महदायोजने बाली निमित्तमात्रम् । प्रस्तावोऽयं खलु विचारणीय एवार्येण ।

रामः—वत्स लक्ष्मण ! त्वयाप्यैवमुच्यते । तत् किमेतद् रघुकुलं कलङ्कयितुमेव रामस्य जन्म ?

यथा सीतापहरणे तथा बालिवधेऽप्यसौ ।
राम एव निमित्तं वै रघुवंशकलङ्कने ॥११॥

लक्ष्मणः—नहि नहि तात ! क एष चन्द्रकलङ्कमपवदति । न केवल-मार्यावर्तस्य विश्वसंस्कृतिसमुन्नतये जन्मार्यस्य । युगान्तकालेऽपि मर्यादा-पुरुषोत्तमस्य यशः-प्रकाशो विश्वं प्रकाशयिता । तदन्यथा कृते रक्षोभिः पददलितमेव जानीहि तात ! आर्यावर्तम् । यतो हि

बाली चेन्म्रियते लोकसंस्कृती रक्षिता भवेत् ।
अन्यथा रावणाक्रान्तं नष्टं राष्ट्रस्य जीवनम् ॥१२॥

योजना विनाश होने पर लङ्का-अभियान कैसे सम्भव होगा और विना लङ्का गए, सीता की मुक्ति नहीं होगी ॥१०॥

लक्ष्मण—आर्य ! राजनीति के प्रसङ्ग में सब कुछ सम्भव है । रावण द्वारा कूटनीति से सीता हर लेने पर भी हमारा आज भी मोह भङ्ग नहीं हुआ है । तात ! यहाँ तो महान आयोजन में वालि निमित्त मात्र है इस प्रस्ताव पर आर्य को विचार करना ही चाहिए ।

राम—वत्स लक्ष्मण ! तुम भी ऐसा कह रहे हो तो क्या इस रघुकुल को कलङ्कित करने के लिए ही राम का जन्म हुआ है—

जिस प्रकार सीता अपहरण में, उसी प्रकार वालि-वध में भी यह राम ही रघुवंश को कलङ्कित करने का कारण वनेगा ॥११॥

लक्ष्मण—नहीं, नहीं तात ! कोई चन्द्रमा को कलङ्कित कहता है, न केवल आर्यावर्त्त की अपितु विश्व-सँस्कृति की समुन्नति के लिए आर्य का जन्म हुआ है । युगान्त काल में भी मर्यादा परुषोत्तम के यश का प्रकाश, विश्व को प्रकाशित करेगा । अतः तात ! यदि ऐसा नहीं किया तो आर्यावर्त को राक्षसों से पद्दलित ही समझो । क्योंकि—

यदि वालि मरता है, तो लोक-संस्कृति की रक्षा हो जाती है, अन्यथा रावण से आक्रान्त राष्ट्र का जीवन नष्ट ही है ॥१२॥

सुग्रीवः—आर्य ! मान्यथा सम्भाव्य । एष एव पन्था रावण-पराजयस्य सीतामुक्तेश्च ।

रामः—यथा रोचते विधात्रे । अहमत्र निमित्तमात्रम् । सुग्रीव ! क्रियतां व्यवस्था । सन्नद्धोऽस्मि धनुष्पाणिरहं कार्यं साधयितुम् ।

सुग्रीवः—तद् व्रजामो वयं योजनानुकूलम् ।

(इति निष्क्रान्ताः सर्वे)

(ततः प्रविशति गदापाणि हनुमान्)

हनुमान्—यथाज्ञापितोऽस्म्यहं स्वामिना सुग्रीवेण 'यद् हनुमन् ! त्वयास्माकं द्वन्द्वाहवक्षेत्रान्नातिदूरमेव गदापाणिना स्थातव्यम् । (परितो विलोक्य) तदेतत् समुचितस्थल मे स्थातुम् । अरे ! कथमेष कोलाहलो वर्धते (परितो विलोक्य आकाशे) कथं वा यूयमरे पौरजनाः ! सकोलाहलं सभयाः पलायध्वे ? किं भणथ "तदत्र गदाद्वन्द्वाहवे मर्माहतः सुग्रीव पीडामसहमानः पलायितः । तदेते वयं तस्यानुयायिनः प्राणभयात् पलायामहे" तद् धिगस्तु युष्मान् कातरान्, यदित्थं प्राणभयात् पलायध्वे ।

रे रे पौरजनाः ! किमित्थमभितो धावन्ति भीता इव ,
धैर्येण प्रतिशोध-विग्रहमिदं पश्यन्तु द्वन्द्वाहवम् ।

सुग्रीव—आर्य ! गलत न समझें । रावण की पराजय और सीता की मुक्ति का यही मार्ग है ।

राम—सुग्रीव ! जैसी विधाता की इच्छा, मैं तो निमित्त मात्र हूँ । आप व्यवस्था करें । मैं कार्य-सिद्धि के लिए धनुष लिए तैयार हूँ ।

सुग्रीव—तो हम लोग योजनानुसार चलते हैं ।

(सब चले गये)

(गदा हाथ में लिए हनुमान का प्रवेश)

हनुमान्—जैसा कि स्वामी सुग्रीव ने मुझे आदेश दिया है कि 'हनुमान् तुम हमारे द्वन्द्व-युद्ध-क्षेत्र से थोड़ी दूर पर गदा हाथ में लिए खड़े रहना' (चारों ओर देखकर) तो यही मेरे ठहरने का उचित स्थान है । अरे ! यह कोलाहल कैसा बढ़ रहा है ? (आकाश की ओर देखकर) अरे नगरवासियों ! तुम लोग कोलाहल के साथ भयभीत क्यों भाग रहे हो ? क्या कहते हो कि "गदा युद्ध में मर्माहत सुग्रीव पीडा को न सहकर भाग गया है । अतः हम लोग उसके अनुयायी प्राणों के भय से भाग रहे हैं ।" तो तुम कायरों को धिक्कार है, जो इस प्रकार प्राणों के भय से भाग रहे हो—

अरे नगरनिवासियों ! इस प्रकार भयभीत होकर चारों ओर क्या भागे जा रहे

दर्पान्धेन निपातितोऽपि बलिनाऽसौ बालिना दुर्जयः,
सुग्रीवो न पलायिताऽद्य समराद् रामेण संरक्षितः ॥१३॥

(पुनराकाशे) किं ब्रूथ 'जातमस्माकमालम्बनम्। प्रतिनिवृत्तोऽसौ गदापाणिः सुग्रीवः' तदतीव वरं सञ्जातम्। प्रेक्षतामधुना द्वन्द्वाहवं निर्भया भवन्तः।

(पुनराकाशे) किं भणथं 'निपतितोऽसौ धरापृष्ठे शराहतो बाली। शरप्रहारकोऽसौ धनुर्धरस्तापसोऽपि सम्मुखीनो जातः।"

आः विशसितो बालिः। अहो कौशलेन्द्रस्य प्रतिज्ञा लब्धकामाभूत्। तदिदानीम्—

पूर्ण-प्रतिज्ञो रघुनन्दनोऽसौ,
सुग्रीवमभ्यर्चयिता स्वराज्ये।
भवेद् द्वितीयाऽपि दशाननान्ता
सीता विमुक्त्या सह पूर्ण-कामा ॥१४॥

तत् त्वरितमादेशार्थं स्वामिनं पश्यामि।

(इति निष्क्रान्तः)

(नेपथ्ये)

हो। जरा धैर्य से यह प्रतिशोध का द्वन्द्व युद्ध देख लो दर्पान्ध और बलवान बालि के द्वारा पराजित होता हुआ भी यह, राम द्वारा सुरक्षित, दुर्जय-सुग्रीव, आज युद्ध से नहीं भागेगा ॥१३॥

(पुनः आकाश में) क्या कहते हो ? "हम लोगों का आलम्बन हो गया। गदा हाथ में लिए सुग्रीव वापस आ गया" यह बहुत अच्छा हुआ। अब आप लोग निर्भय होकर द्वन्द्व-युद्ध देखें। (पुनः आकाश में) क्या कहते हो "यह वाण से घायल होकर बालि भूमि पर गिर पड़ा है। शर प्रहार करने वाला वह धनुर्धर तापस भी सामने आ गया।"

अरे ! बालि मारा गया। अहो ! कौशलेन्द्र की प्रतिज्ञा सफल हुई ! तो अब—

प्रतिज्ञा पूर्ण करने वाले श्री राम, सुग्रीव को उसके राज्य पर अभिषिक्त कर देगें। अब रावण को मारकर सीता की मुक्ति के साथ, दूसरी प्रतिज्ञा भी पूर्ण होनी चाहिए ॥१४॥

तो शीघ्र ही आदेश के लिए स्वामी को देखता हूँ।

(चला गया)

(नेपथ्य में)

यस्यैकोऽपि प्रचण्डः प्रखरशितशरो बालिनं संजघान,
तारां संबोध्य विज्ञस्तनयमपि तयो यौवराज्येऽभिषिच्य,
सुग्रीव यो व्यधत्त प्रचुरधनवलस्वामिनं सानुजोऽसौ,
रामः सीता-विहीनो व्रजति गिरि-गुहां रावणे वद्धवैरः ॥१५॥

(ततः प्रविशति लक्ष्मणेनानुगम्यमानो रामः)

लक्ष्मणः—आर्य ! तदास्यतां तरुतले स्फटिक-शिलायां, यतोऽद्य महदुष्मा वर्तते ।

रामः—(उपविश्य) वत्स लक्ष्मण ! ईदृशीयं वनवासपरिणति र्भविता स्वप्नेऽपि न मया कल्पितासीत् । यतः—

सीतापहरणेनैव, ज्वलितं मानसं मम ।
बालिहिंसावसादाग्निः कुरुते भस्मसादिव ॥१६॥

अथवा लक्ष्मण ! भाग्यलिपिरेव प्राधान्येन वर्तते । यतः—

मनुष्यभाग्य-व्यवसायिना लिपि-
र्यथा निबद्धा विधिनास्य मस्तके ।
तथा हि वात्या तृणवन्नियन्त्रितः,
करोत्यसौ जीवनयापनक्रियाम् ॥१७॥

जिसके एक प्रचण्ड प्रखर बाण ने वाली को मार डाला, जिस विज्ञ ने तारा को ज्ञान देकर, उसके पुत्र को युवराज पद पर अभिषिक्त कर, सुग्रीव को अपार धन और शक्ति का स्वामी बना दिया, रावण के प्रति बद्ध-वैर, सीता-विहीन, वही राम भाई के साथ पर्वत, कन्दरा की ओर जा रहे हैं ॥१५॥

(लक्ष्मण के साथ राम का प्रवेश)

लक्ष्मण—आर्य ! आप यहीं वृक्ष के नीचे स्फटिक-शिला पर बैठ जायें क्योंकि आज बहुत गर्मी पड़ रही है ।

राम—(बैठकर) वत्स लक्ष्मण ! वनवास का एसा परिणाम होगा, मैंने स्वप्न में भी कल्पना नहीं की थी क्योंकि—

सीताहरण से ही जले हुए मेरे मन को, वालि की हिंसा के पश्चात्ताप की आग मानों भस्म किये देती है ॥१६॥

अथवा लक्ष्मण ! भाग्य लिपि ही प्रधान होती है । क्योंकि—

मनुष्य के भाग्य के निर्माता ब्रह्मा ने उसके मस्तक पर जैसी लिपि लिख दी है, वायु से नियन्त्रित तृण की तरह वह, वैसा ही जीवन-यापन करता है ॥१७॥

लक्ष्मणः—तात ! अतएव समागतेन वर्तयन्तो विज्ञा नानुशोचन्ति ।

शोचन्ति विज्ञा न सुखं न दुखं,
मानापमानानि जयाजयौ वा ।
समागतेनैव विवेक-बुद्ध्या,
यथोचितं सत्पथमाचरन्ति ॥१८॥

आर्याचारणं तु जनोद्धारकमेव । आलोकितं तात ! सुग्रीव-राज्याभिषेक समारोहे प्रजाहर्षोल्लासः । बालिनाक्रान्त-प्रजाया मुखरा वाणी प्रथममेव प्रस्फुटीभूता ।

रामः—सत्यमेव—

बन्दी कृत्य प्रजावाणीं, हितं प्रज्ञां विपश्चिताम् ।
वर्तते चाटुकारै र्यो भूपालः स बिनश्यति ॥१९॥

परं लक्ष्मण ! प्रजाऽसंतोषप्रकरणेऽनेन जनक्रान्तिः कथं नाहूता ?

लक्ष्मणः—तात ! सुग्रीवस्तु तत्कृते प्रयतवान् । परं बालिभयाक्रान्ता प्रजा तद् विरोधे समुत्थातुमशक्तासीत् । गतोऽसौ विदेशानपि परं ततोऽपि रावण-बालि-सन्धि-भयात् साहाय्यप्रस्तावे निष्फलो निवृत्तः। कोऽपि तच्छरण्यो

लक्ष्मण—तात ! इसीलिए विज्ञ-जन वर्तमान स्थिति से कार्य करते हुए पश्चात्ताप नहीं किया करते—

विज्ञ पुरुष सुख-दुःख, मान-अपमान, जय और पराजय के लिए कोई शोक नहीं करते हैं । अपनी विवेक-बुद्धि से वर्तमान के द्वारा ही यथोचित सत्पथ का आचरण करते हैं ॥१८॥

आर्य का आचरण तो जनोद्धारक था । देखा था तात !, सुग्रीव के राज्याभिषेक समारोह में प्रजा का हर्षोल्लास ! बालि द्वारा आक्रान्त प्रजा की मुखर-वाणी पहली बार ही फूटी थी ।

राम—सच ही,—प्रजा की वाणी, उसका हित तथा विद्वानों की बुद्धि को बन्दी बनाकर जो राजा चाटुकार लोगों के द्वारा जीवन बिताता है, वह नष्ट हो जाता है ॥१९॥

परन्तु लक्ष्मण ! प्रजा के असंतोष को लेकर इस सुग्रीव ने जन-क्रान्ति का आवाहन क्यों नहीं किया । ?

लक्ष्मण—तात ! सुग्रीव ने इसके लिए प्रयत्न किया था, परन्तु बालि के भय से आक्रान्त प्रजा उसके विरोध में खड़ी होने में असमर्थ थी । वह विदेशों में भी गया परन्तु वहाँ से भी रावण तथा बालि की सन्धि के भय से सहायता के प्रस्ताव पर

नाभूत् । असहायोऽसौ कथञ्चित् सीमितसाधनैरेवास्मिन्नृष्यमूकेऽवसरं प्रतीक्षमाणो दिवसान् निरवहत् ।

रामः—स्यादेवं लक्ष्मण ! तथापि कपटव्यापारेण बालिनो व्यापादनं भिनत्ति मेऽन्तरात्मानम्—

सुग्रीव-युद्धे सहसा मदीया-
शुगेन विद्धः पतितो धरायाम् ।
मर्माणि धिक्शब्दशरैर्विभिन्दन्,
विस्मर्यतेनैव मया कपीन्द्रः ॥२०॥

लक्ष्मण—:मर्यादा-पुरुषोत्तमस्य केवलं रामस्यैतद् वचनं न खलु नामार्यावर्तरक्षाव्रतिनो कौशलेन्द्रस्य । एतदपि कथं नाम विस्मर्यते यदस्य बलमाश्रित्य रावणस्य कृते कदाप्युत्तरापथाक्रमणं कीदृक् सुकरमासीत् ?

रामः—वत्स ! सत्यमेवोच्यते त्वयापि । प्रजाहिताभिरक्षणं राज्ञां प्रथमं कृत्यम् । यतः—

प्रजावात्सल्य-विमुखा रताः स्वार्थाभिरक्षणे ।
राजानः प्रलयं यान्ति नदीकूलद्रुमा इव ॥२१॥

निष्फल वापस आया । किसी ने उसे शरण भी नहीं दी । असहाय, वह किसी प्रकार सीमित साधनों के द्वारा ही इस ऋष्यमूक पर्वत पर अवसर की प्रतीक्षा करता हुआ दिन बिता रहा था ।

राम—रहा हो ऐसा, लक्ष्मण ! फिर भी कपट से बालि को मारना मेरी अन्तरात्मा को विदीर्ण कर रहा है—

सुग्रीव के साथ युद्ध में सहसा मेरे बाण से विद्ध, पृथ्वी पर पड़ा हुआ धिक्कार के शब्द रूपी बाणों से, मर्म को भेदता हुआ कपीन्द्र (बालि) मेरे द्वारा भुलाया नहीं जा रहा है ॥२०॥

लक्ष्मण—केवल मर्यादा-पुरुषोत्तम राम का यह वचन है, निश्चय ही यह आर्यावर्त्त की रक्षा का व्रत लेने वाले कौशलेन्द्र का नहीं । यह भी कैसे भुलाया जा सकता है कि इसके बल का आश्रय लेकर रावण के लिए कभी भी उत्तरापथ पर आक्रमण कितना सरल था ?

राम—वत्स ! तुम भी सच ही कहते हो । प्रजा का हितरक्षण राजाओं का प्रथम कृत्य है । क्योंकि—

प्रजा-वात्सल्य से विमुख, स्वार्थ-रक्षा में लगे हुए राजा, नदी तट के वृक्ष की भाँति नष्ट हो जाते हैं ॥२१॥

लक्ष्मणः—तदेतद् बालि-वधेन लोकरञ्जनं विहितमार्येण । नात्र किञ्चित् परितापकारणं विद्यते । यतः—

जनरञ्जनमाश्रित्य ह्यसिधाराव्रतै नृपैः ।
क्रियन्ते बहु-कृत्यानि प्रायो मर्मच्छिदान्यपि ।।२२।।

रामः—जानामि वत्स! तदेव विशसितो वाली । किष्किन्धा-राज्यैश्वर्य-सम्पन्नतामभजत् सुग्रीवः, मित्र-कार्यान्निवृत्तोऽस्मि । पूर्णा मे प्रतिज्ञा ।

लक्ष्मणः—कथं नामार्यस्य पूर्णा प्रतिज्ञा । यतः—

या प्रतिज्ञा कृतालोक्य मुनीनामस्थिसंचयम् ।
जानकीहरणात्तस्या गुरुत्वं सर्वतोऽधिकम् ।।२३।।

रामः—तदेतत् सुग्रीवेण सम्पादनीयम् । स एव योजनानुकूलं मामादिशतु । यतः—

लङ्काभियाने यत् कार्यं सुग्रीवेण विचार्यताम् ।
रामस्तु धनुरादाय तन्निदेशे समुद्यतः ।।२४।।

(शीतलपवन स्पर्शं नाट्यन्) वत्स लक्ष्मण ! तीव्र-तपनेऽस्मिन् निदाघे सहसा शीतल-समीरण-प्रवाहो व्यथाकुलं मे मानसं विनोदयतीव ।

लक्ष्मण—आर्य ने तो इस वालि के वध से जन-कल्याण किया है । इसमें कोई पश्चात्ताप का कारण नही है । क्योंकि—

जनकल्याण का आधार लेकर, तलवार की धार का व्रत लेने वाले राजाओं को प्रायः बहुत से मर्मच्छेदक कार्य भी करने पड़ते है ।।२२।।

राम—जानता हूँ वत्स ! तो यह वालि का वध हो गया, सुग्रीव किष्किन्धा राज्य के ऐश्वर्य का स्वामी बन गया, मैं मित्र के कार्य से निवृत हो गया हूँ । मेरी प्रतिज्ञा पूर्ण हो गयी ।

लक्ष्मण—आर्य की प्रतिज्ञा कैसे पूर्ण हो गयी, क्योंकि—

आपने जो प्रतिज्ञा मुनियों की अस्थियों को देखकर की थी, जानकी के अपहरण से उसकी गुरुता सर्वाधिक हो गयी है ।।२३।।

राम—यह कार्य तो सुग्रीव को करना है । वही योजनानुकूल मुझको आदेश दें । क्योंकि—

लङ्काभियान में जो करना है, उसके लिए सुग्रीव को सोचना है । राम तो धनुष लेकर उनके निर्देश पर उद्यत है ।।२४।।

(शीतल वायु के स्पर्श का अभिनय करते हुए) वत्स लक्ष्मण ! तीव्र-तपन वाली इस ग्रीष्म-ऋतु की दुपहरी में एकाएक शीतल वायु का प्रवाह मेरे व्यथाकुल मन को गुदगुदा सा रहा है ।

लक्ष्मणः—पश्य तात ! सहसा घनाडम्बरितं नभः, घनघनध्वनिभिः प्रतिध्वनितं केकारवैरिदमरण्यम् । शीतलजलसीकर-स्विन्नोऽयं पवनः प्रतिदिशं प्रवहन् वर्षागममेव सूचयति ।

रामः—पश्य लक्ष्मण ! सत्यमागतोऽयं बहुप्रतीक्षितः पावसः । पश्य वत्स !

मेघाडम्बरघोरगर्जनघनोद्घोषप्रसारी महान्,
विद्युल्लोललता-सुवर्णरचितालङ्कार-विभ्रत्तनुः ।
भूयो दृप्तनिदाघतापितमिदं विश्वं समाश्वासयन्,
वर्षन् निर्झरनीरझर्झरझरीमायात्यसौ पावसः ॥२५॥

अपि च पश्य—

नीलाञ्जनैरिव घनैः पवनप्रनुन्नै-
र्व्याप्तं नभो घनरवैः सहसा विलोक्य ।
आकाशमेत्य बकपङ्क्तिभिरुन्मुखाभिः,
केकारवैश्च रचितान्यभिनन्दनानि ॥२६॥

लक्ष्मणः—जलवर्षणस्विन्नोऽयं वृक्षः । वर्धत एव वर्षावेगः । तदुत्थाय गिरिकुटीरमेवाश्रयावः ।

लक्ष्मण—तात ! देखिए, सहसा घने बादलों से आकाश भर गया। मेघों के गर्जन की ध्वनि से, मयूरों के केका स्वर ने इस अरण्य को प्रतिध्वनित कर दिया है। शीतलजल-सीकार से भीगा हुआ प्रत्येक दिशा में बहता हुआ पवन, वर्षा का आगमन ही सूचित कर रहा है।

राम—देखो लक्ष्मण ! सचमुच बहुप्रतीक्षित पावस ऋतु आ रहा है देखो वत्स !—

मेघों के आडम्बर के घोर-गर्जन के गम्भीर उद्घोष का प्रसार करता हुआ, विद्युत की चञ्चल-लताओं के स्वर्ण-आभूषणों से शरीर को सुसज्जित किए, गर्वित-ग्रीष्म द्वारा तापित, विश्व को आश्वासन देता हुआ, झरने के जल की जैसी झड़ी लगाये हुए, यह महान पावस आ रहा है ॥२५॥

और भी देखो—

सहसा नीलाञ्जन के समान घन-ध्वनि वाले, वायु-प्रेरित बादलों से व्याप्त, नभ को देखकर, आकाश में उड़कर उन्मुख, बक-पंक्ति तथा मयूरों की केका-ध्वनि ने अभिनन्दनों की रचना की है ॥२६॥

लक्ष्मण—जल वर्षा से यह वृक्ष भीग गया है। वर्षा का वेग बढ़ ही रहा है। अतः उठकर पर्वत कुटीर में आश्रय लिए लेते हैं।

रामः—वत्स ! यथा ते रोचते । (उत्थाय)

सीतावियोगसञ्जातप्रतिशोधानले हुतम् ।
केनेदं शाम्यतेऽप्यन्तर्दग्धं रामस्य मानसम् ॥२७॥

लक्ष्मणः—इत इतः समायातु महोदयः । जलसेकपिच्छिलेऽस्मिन् मार्गे सावधानं समागम्यतामार्येण ।

रामः—लक्ष्मण ! सावधानेऽपि स्खलतिः सम्भाव्यते वत्स !

लक्ष्मणः—आर्य ! तन्नोपहासाय सत्पुरुषाणाम् । इत इतो देवः ।

(इति निष्क्रान्तौ)

समाप्तोऽयं षष्ठोऽङ्कः

राम—वत्स ! जैसी तुम्हारी इच्छा । (उठकर)

सीता के वियोग से उत्पन्न प्रतिशोध की आग में हवन हुए भीतर से जल रहे राम के इस मन को किससे शीतल किया जा सकता है ॥२७॥

लक्ष्मण—महोदय इधर आइये । जलवर्षा से चिकने इस मार्ग पर आर्य ! सावधानी से आयें ।

राम—सावधान होने पर भी स्खलति हो सकती है वत्स !

लक्ष्मण—आर्य ! वह सत्पुरुषों की हँसी का विषय नहीं होती है । देव ! इधर से आइये ।

(दोनों चले जाते हैं)

छठा अङ्क समाप्त

* ॐ *

सप्तमोऽङ्कः

(नेपथ्ये)

एकः—अपसरतापसरत, भो मदोन्मत्ता राक्षसाः ! भयभीतानिमान् बालानबलाजनाम् वा सम्भावयत यूयं, गृहेषु कपाटपिधानैरर्गलादानै यतः—

बाहुभ्यां सागरं योऽतरदतुलबलो ध्वंसकः सिंहिकायाः,
सीतामन्विष्य रोषात् सघनतरुलतावाटिकामुज्जहार।
हन्ता योऽक्षस्य रक्षः-प्रमुख-दशमुखस्यात्मजस्यापि सोऽयं
लङ्कां ब्रह्मास्त्र-बद्धो व्रजति गतभयो वानरेन्द्रो हनूमान् ॥१॥

अपरः—बद्धोऽप्येषोऽबद्ध इवात्मानं मन्यमानः कथमभीतो राजपथं परिक्राम्यति। वेपते इवास्य शरीरे लग्नं ब्रह्मास्त्रपाशबन्धनम्।

द्वितीयः—अहो ! ज्वलन्नेत्राभ्यामसौ विकटमुखः पिबन्निव लङ्केश-राजधानीमुद्धताभ्यां, समुद्धतः, पद्भ्यां कम्पयन्निव धरां, कथञ्चिदेष प्राप्त एव राजद्वारम्।

अपरः—अहो ! अत्याश्चर्यंकरमस्य विक्रान्तं शरीर-सौष्ठवम्। पश्यत भोः ! पश्यत, प्रविष्ट एवासौ राजसभागारम्। सत्यमेव—

(नेपथ्य में)

एक—भागो भागो रे मदोन्मत्त राक्षसों ! तुम लोग घरों में किवाड़ बन्द कर और कुण्डी लगाकर इन भयभीत बच्चों और महिलाओं को ढाढस बँधाओ क्योंकि—

जिस अतुल बलशाली ने भुजाओं से समुद्र पार कर लिया सिंहिका को मार डाला, जिसने सीता की खोज करके क्रोध से सघन तरुलताओं वाली अशोक वाटिका को उजाड़ दिया जिसने राक्षसों के स्वामी दशमुख रावण के पुत्र अक्षकुमार का बध कर दिया हैं, यह वही निर्भय वानरेन्द्र हनुमान ब्रह्मास्त्र से बँधा हुआ लङ्का की ओर जा रहा है ॥१॥

अन्य—बँधा हुआ भी यह अपने को मुक्त जैसा मानता हुआ, कैसा निर्भीक राजपथ पर चल रहा है। इस के शरीर पर सलग्न ब्रह्मास्त्र पाश बन्धन काँप सा रहा है।

द्वितीय—अरे ! यह विकट-मुख जलते हुए अपने नेत्रो से लङ्केश राजधानी को पीता हुआ सा, यह समुद्धत अपने उद्धत पैरों से पृथिवी को कँपाता हुआ सा किसी प्रकार राज द्वार पर पहुँच ही गया है।

अपर—अरे ! इसका विक्रान्त शरीर-शौष्ठव अत्यन्त आश्चर्य कर हैं। देखो लोगों ! देखो, यह राजसभागार में प्रविष्ट हो गया। सच ही—

दृष्टिः किरन्तीव तिरस्कृतिं पथि,
धृष्टा गतिर्धर्षयतीव राक्षसान् ।
दोर्दण्डमाबद्धमपि स्फुरत्यहो,
विशत्यसौ शौर्यमिवारिमन्दिरम् ॥२॥

(ततः प्रविशति मेघनाद-प्रमुखैः राक्षसैरनुगम्यमानो ब्रह्मास्त्र-बद्धो हनुमान् सिंहासनोपविष्टो रावणः सभासदश्च)

मेघनादः—सप्रणतिरयं निवेदयति मेघनादो यदयं भ्रातृहन्ता रक्षोऽपकारी बद्धो मया वानरः श्रीमतां चरणेषु प्रस्तुतीकृतो विद्यते ।

रावणः—पुत्र ! इन्द्रजित् ! रक्षसां क्षेमकरी ते विरूदावलिः पुनरेतेन परिष्कृता । वत्स ! इदमासनमास्यताम् ।

मेघनादः—यथाज्ञापयन्ति तातमहोदयाः ।

रावणः—आकर्णयन्तु नाम सभासदो राक्षसपुंगवाः । एष स एव वानरोद्धतो येन राक्षसा निपातिता, वाटिका भग्ना, कुमाराक्षस्य रक्तेन रञ्जितोऽसौ रक्तमुखोऽधुना दण्डार्थं प्रस्तुतो वर्तते ।

(हनुमन्तमभिमुखीभूय) वद रे वानर ! कोऽसि ? कुतः समागतः ? अनभिज्ञाय लङ्केश पराक्रमं कथमपराद्धमेतत् ? न ते प्राणभीति र्विद्यते ?

मार्ग में इसकी दृष्टि, तिरस्कार सा बिखेर रही है, धृष्ट-गति राक्षसों को भयभीत सा कर रही है। आश्चर्य है, भुजाएँ बँधी होने पर भी फड़क रही है, यह शौर्य की मूर्ति की तरह शत्रु के गृह में प्रवेश कर रहा है ॥२॥

(रंग मञ्च पर मेघनाद प्रमुख राक्षसों द्वारा अनुगम्य मान ब्रह्मास्त्र बद्ध हनुमान्, सिंहासन पर बैठा रावण तथा सभासद प्रस्तुत होते हैं।)

मेघनाद—प्रणाम के साथ मेघनाद निवेदन करता है कि यह भ्रातृ-हन्ता राक्षसों का अपकारी वानर मेरे द्वारा पकड़ लिया गया है और श्रीमान के चरणों में प्रस्तुत है।

रावण—पुत्र इन्द्रजित ! राक्षसों के लिए कल्याणकारी तुम्हारा यश पुनः इस कृत्य से परिष्कृत हो गया है। वत्स इस आसन पर बैठ जाओ।

मेघनाद—पिता जैसी आज्ञा दे रहे।

रावण—राक्षसपुंगव सभासदों ! सुनिये—यह वही उद्धत वानर है जिसने राक्षस मार डाले, वाटिका नष्ट कर दी, कुमार अक्ष के रक्त से रंगा हुआ यह रक्त मुख इस समय दण्ड के लिए प्रस्तुत है। (हनुमान की ओर मुख करके) कह रे वानर ! कौन है, कहाँ से आया है ? लङ्केश के पराक्रम को बिना जाने कैसा यह अपराध कर दिया ? तुझे प्राणों का भय नहीं है ?

हनुमान्—लङ्केश ! क एष जनः पृथिव्यां यस्य प्राणभीति र्नं विद्यते तथापि स्वामिकार्यप्रवृत्तानां जीवनमति दुष्करं जायते । अन्यथा कथमेष दाक्षिणात्यो बानरो हनुमानेकाकी लङ्कामागच्छेत् ।

शतयोजनविस्तीर्णं तीर्त्वा सागरमुल्वणम् ।
राक्षसैरक्षितां लङ्कां प्रविशेन्नाम कोऽन्यथा ।।३।।

रावणः—अहो ! स्वामिकार्य-प्रवृत्तस्य ते दुःसाहसं मयि जीवत्येव लङ्काविनाशोन्मुखे विद्यते । क एष ते स्वामी ?

हनुमान्—लङ्काविनाशोन्मुखं तु त्वदीयमेव दुःसाहस भविता । अहमत्र स्वामिनः किष्किन्धापते सुग्रीवस्य निर्देशेन रामकार्यार्थं समागतोऽस्मि ।

रावण—अहो ! किष्किन्धापतिः सुग्रीवो, येन राज्यलुब्धकेन स्वभ्राता विनाशितः । अहो मित्रबालिन् । गृह्यतां मे श्रद्धाञ्जलिः । (इति दुःखं नाटयति)

हनुमान्—लङ्केश्वर ! परदारापहारिणां सर्वेषामियमेव नियतिर्विरचिता दैवेन ।

रावणः—बानर ! दुःसाहसिका ते बचन-पद्धतिः । ब्रूहि कस्ते स्वामिनो निदेशः, येनेदृशी धृष्टता विहिता लङ्कायाम् ?

हनुमान—लङ्केश ! कौन वह पुरुष है जिसे प्राणों का भय नही है, फिर भी स्वामी के कार्य में संलग्न लोगों का जीवन तो दुष्कर होता ही है अन्यथा यह दक्षिणात्य बानर हनुमान् अकेला लङ्का में कैसे आता ।

शतयोजन विस्तार वाले भयंकर सागर को तैर करके राक्षसों से रक्षित लङ्का में अन्यथा कौन प्रवेश करता ।।३।।

रावण—अरे ! स्वामिकार्य में लगे हुए तुम्हारा दुःसाहस मेरे जीवित रहते ही लङ्का विनाशोन्मुख हो गया । यह तुम्हारा स्वामी कौन है ?

हनुमान्—लङ्का विनाश के लिए उन्मुख तो तुम्हारा ही दुःसाहस होगा । मैं यहाँ स्वामी किष्किन्धापति सुग्रीव के निर्देश से राम कार्य के लिए आया हूँ ।

रावण—अरे ! किष्किन्धा पति सुग्रीव, राज्य के लोभी जिसने अपना भाई मरवा डाला । अरे मित्र ! बालि मेरी श्रद्धाञ्जलि ग्रहण करें (दुःख प्रकट करता है)

हनमान—लङ्केश्वर ! दूसरों की नारियों का अपहरण करने वाले सभी का दैव ने ऐसा ही भाग्य बनाया है ।

रावण—बानर ! तुम्हारा बचनविन्यास दुःसाहसिक है । कहो क्या तुम्हारे स्वामी का निदेश हैं जिसके कारण लङ्का में ऐसी धृष्टता की है ।

हनुमान्—एतत्तु ज्ञातमेव यदार्यवरो दाशरथिः स्वपत्न्या सीतया, भ्रात्रा लक्ष्मणेन सह धर्मसद्भावयात्रिको भूत्वा दक्षिणापथमागतः।

रावणः—श्रुतमेव यद् रामो रक्षसां दमनार्थं दण्डकारण्ये समागतः।

हनुमान्—मिथ्या श्रुतं त्वया राक्षसेन्द्र ! दमनकार्ये राज्यकोष-विपुल-वाहिनी-विधानं विधीयते। परं रामस्तु पदातिस्तापस एव।

साधनहीनो रामः पत्न्या सार्धं चरन् वने घोरे।
असहायोऽसौ कर्ता दमनं किं रक्षसां, सत्यम् ? ॥४॥

परन्तु अस्मिन् सद्भाव-सन्धानकाले तत्पर्णकुटीरात् प्रिया सीता केनापि दुर्विनीतेनापहृता।

रावणः—वानर ! कथमबलापमानितां नार्यः सुरक्षिताः सम्भाव्यन्ते ?

हनुमान्—अयं ते मतिभ्रमः। मर्यादापुरुषोत्तमोऽसौ रामः कथं तस्मादबलापमानसम्भूतिः। परमाचरणरहितानां तु पदे-पदेऽवमानना भवत्येव।

यदुच्यते, सीतान्वेषण-प्रवृत्तो रामो दक्षिणे ऋष्यमूके सुग्रीवेण मित्र-सन्धिं कृतवान्।

हनुमान्—यह तो ज्ञात ही है कि आर्यवर दाशरथि राम अपनी पत्नी सीता और भाई लक्ष्मण के साथ धर्म-सद्भावना की यात्रा करते हुए दक्षिणा-पथ में आए—

रावण—सुना है कि राम राक्षसों के दमन के लिए दण्डकारण्य में आये हैं।

हनुमान—तुमने राक्षसेन्द्र गलत सुना। दमनकार्य में राज्यकोष और विशाल सेना का विधान होता है परन्तु राम तो पैदल तपस्वी ही है।

पत्नी के साथ घोरवन में विचरण करते हुए, साधन हीन यह असहाय राम क्या राक्षसों का सचमुच दमन करेंगे ? ॥४॥

फिर भी इस सद्भाव की तैयारी के समय उनकी पर्णकुटीर से प्रिया सीता का किसी दुर्विनीत ने अपहरण कर लिया।

रावण—वानर ! अबलाओं का अपमान करने वालों की नारियों का सुरक्षित रहना कैसे सम्भव हैं ?

हनुमान—यह तुम्हारा मतिभ्रम है, यह राम मर्यादा पुरुषोत्तम हैं, उनसे कैसे अबला अपमान सम्भव है। परन्तु आचरण हीन नारियों का पद-पद पर अपमान होता ही है, जो कह रहा था, सीतान्वेषण प्रवृत्त राम ने दक्षिण में ऋष्यमूक पर्वत पर सुग्रीव के साथ मित्र संधि कर ली है।

रावणः—जानामि तस्यैव कपटसाहाय्येन वालिं व्यापाद्य किष्किन्धा-राज्ये प्रतिष्ठितोऽसौ सुग्रीवः ।

हनुमान्—तत्र सन्धिप्रस्तावे सीता मुक्तिवचनं प्रदत्तं स्वामिना। स्वामिना च ज्ञायते यत् सीता लङ्केश्वरेणापहृता। तत्कार्यमेव साधयितुं मदीयेयं लङ्का-यात्रा, दुस्तरं सिन्धुमुत्तीर्य प्रतिपन्ना।

रावणः—किमत्र बानर! सीतां नेतुमागतोऽस्मि। किं सीतापहरण-प्रतिरोधे हता राक्षसा, विनाशितं चोपवनम्? । किमीदृक् ते दुःसाहसम्?

हनुमान्—रक्षःपते! किमत्र सीतापहरणेन मया सा रामपत्नी राम-समीपे गमिष्यत्येव। अहमत्र केवलं दूतकार्यनिर्वाहकः सीतामन्वेष्टुमागतः। तद् दृष्टा सीता। इतो गमनात् पूर्वं किञ्चित् संदिष्टव्यमासीत्। तदर्थं त्वत्समीपमागच्छन्नेव राक्षसैरीदृशी मे गति विहिता।

रावणः—उदण्डस्य कृते दण्ड-व्यवस्था समुचितैव।

हनुमान्—राक्षसेन्द्र! उद्दण्डता नाम कीदृशी केवलमार्यं परिज्ञाय राक्षसैरह बहुशस्तिरस्कृतः। भोजनार्थं फलग्रहणेऽपि तैः प्रताडितो, यदा स्वरक्षार्थं मया प्रतिरोधो विहितस्तदोद्दण्डेन त्वत्पुत्रेण मे वधो घोषितः परं सौभाग्यादहं रक्षितः।

रावण—जानता हूँ उसकी ही कपट सहायता से वालि को मार कर किष्किन्धा राज्य पर सुग्रीव प्रतिष्ठित हुए हैं।

हनुमान—वहाँ संधि के प्रस्ताव में स्वामी ने सीता मुक्ति का वचन भी दिया हैं। स्वामी को ज्ञात है कि सीता का अपहरण लङ्केश्वर ने किया है। उन्हीं के कार्य को सिद्ध करने के लिए दुस्तरसमुद्र को पार कर यह मेरी लङ्का यात्रा हुई है।

रावण—वानर! क्या तू यहाँ सीता को लेने आया है? क्या सीता अपहरण के प्रतिरोध में ही राक्षसों को मार डाला और उपवन का विनाश कर दिया। क्या तेरा ऐसा दुःसाहस है?

हनुमान—राक्षसेश्वर! सीता के अपहरण से मुझे क्या? वह राम की पत्नी राम के पास जाएगी ही। मैं तो यहाँ केवल दूत-कार्य का निर्वाहक हूँ सीता की खोज में आया था। सीता को देख लिया। यहाँ से जाने के पूर्व कुछ संदेश देना था, उसके लिए आपके पास आते ही राक्षसों ने मेरी यह गति बना दी।

रावण—उद्दण्ड के लिए दण्ड की व्यवस्था उचित ही है।

हनुमान—राक्षसेन्द्र! उद्दण्डता कैसी! मुझे आर्य समझ कर राक्षसों ने बहुत तिरस्कृत किया, भोजन के लिए फल तोड़ते समय उन्होंने मुझे मारा, जब अपनी रक्षा के लिए मैंने प्रतिरोध किया तो तुम्हारे उद्दण्ड पुत्र ने मेरे वध की घोषणा कर दी परन्तु सौभाग्य से मैं बच गया।

रावणः—न खलु सौभाग्यात्, मदादेशेनैव जीवितः समागतोऽसि केवलं बद्धोऽसि ।

हनुमान्—अहं स्वयमेवागतोऽस्मि न काचिच्छक्तिर्मां बद्धुं समुत्पन्ना । इदं तेऽप्यार्यास्त्रं ब्रह्मास्त्रं नाम, पश्य, पादयोः पतितम् । मेघनाद! संस्तभय रे ब्रह्मास्त्रम् (शरीर संकोचेन ब्रह्मास्त्रं शिथिलीकृत्य निर्गतः) मुक्तोऽहमधुना मदीयमिदमास्ते राजदूतोचितमासनम् (इति पीठासनमुपविशति)

रावण —(भयविकृतमुखः) सेनापते ! बध्यमेनं निगडयतु बन्धनै र्दुविनीतम् ।

प्रधानामात्यः—स्वामिन् ! सुग्रीवसंदेशवाहकोऽसौ क्षम्य एव ।

रावणः—सेनापते ! यथोक्तं प्रधानामात्येन मर्षितोऽसौ दुर्विनीतः ।

हनुमान्—सुष्टु कृतं लङ्केश्वर ! तदेतत् स्वामिना संदिष्टम् । यत् सुग्रीवो बालि-विहितं-किष्किन्धा-सन्धि-सम्माने समुत्सुको वर्तते । असौ रक्षः-संस्कृते प्रचारं प्रसारं चेच्छति । परं तेनोक्तम्—

हिंसावृत्तिं परित्यज्य सर्वधर्म-समन्वये ।
यद् विधेयं तथा कार्यं राक्षसेन्द्र ! मतं हि मे ।।५।।

रावण—निश्चय ही सौभाग्य से नहीं, मेरे आदेश से ही जीवित आए हो, केवल बंधे हुए हो ।

हनुमान—मैं स्वयं ही आता हूँ, कोई भी शक्ति मुझे बाँधने के लिए पैदा नहीं हुई है । यह तुम्हारा आर्यों का अस्त्र ब्रह्मास्त्र भी, देखो पैरों में पड़ा है । मेघनाद ! रोक, रे ! ब्रह्मास्त्र को (शरीर को संकुचित करके ब्रह्मास्त्र को ढीला करके निकल गया) अब मैं मुक्त हूँ । यह रहा मेरा राजदूतोचित आसन । (पीठासन पर बैठ जाता है ।)

रावण—(भय विकृत मुख) सेनापति ! इस बध योग्य दुर्विनीत को बन्धनों से जकड़ दो ।

महामात्य—स्वामिन्—यह सुग्रीव का संदेश वाहक क्षम्य ही है ।

रावण—सेनापति ! जैसा प्रधानामात्य ने कहा, इस दुर्विनीत को क्षमा कर दिया ।

हनुमान—अच्छा किया लङ्केश्वर ! तो यह संदेश दिया है स्वामी ने, कि सुग्रीव बालि के साथ की गयी किष्किन्धा-संधि के सम्मान में उत्सुक है । वह रक्ष-संस्कृति का प्रचार और प्रसार चाहते हैं । उन्होंने पुनः कहा है—

हे राक्षसेन्द्र ! मेरा मत है कि हिंसा-वृत्ति को छोड़ कर सर्वधर्म-समन्वय में जो करने योग्य है वही कीजिए ।।५।।

रावणः--अहो ! किष्किन्धा-सन्धि-सम्माने समुत्सुकः सुग्रीव इति तु प्रियतरं मे । अग्रे किमुक्तमनेन ?

हनुमान्—अग्रे तेनोक्तं-यद् भवता रक्षः-संस्कृतिसमुद्धार व्याजेन-हिंसा-धर्म व नं-महदनर्थं कृत्वा पौलस्त्यकुल-प्रतिमैव मलिनीकृता । अतः—

या राक्षसेश्वरेणापहृता सीताकुलं कलङ्कयता ।
तां हि परावर्तयता रक्ष्या वै रक्षसां प्राणाः ।।६।।

रावणः—किं सुग्रीवेण सीता-परावर्तनमुक्तम् ? नैतत् सम्पद्यते, हनुमन् !

हनुमान्—अन्यदप्युक्तमार्ये-सुग्रीवेण यत्—

कालवशात् संदेशो यदि मे न स्वीकृतो विमूढत्वात् ।
विहितस्तेऽत्र विनाशो, विधिना, भस्मी भवेल्लङ्का ।।७।।

रावणः—अहो ! असह्यमस्य वचनम् ।

हनुमान्—राक्षसेन्द्र ! नेमानि मद्वचनानि । अहं तु संदेशवाहकोऽस्मि, सुग्रीवस्य दूतः । यदि ते न रोचते तूष्णीं भवामि ।

रावणः—(शान्तो भूत्वा) कथमत्र संदेशे सुग्रीवो व्यस्मरत् यत्—

रावण—अरे ! किष्किन्धा-संधि के सम्मान में सुग्रीव उत्सुक है ! यह तो मेरे लिए प्रियतर है । आगे उन्होंने क्या कहा है ?

हनुमान—आगे उन्होंने कहा है कि आपने रक्ष संस्कृति के उद्धार करने के बहाने हिंसा और धर्म के विध्वंस से महान अनर्थ करके पौलस्त्य कुल की प्रतिमा ही मलिन कर दी है । अतः—

कुल को कलंकित कहते हुए राक्षसेश्वर ने जिस सीता का अपहरण कर लिया है उसको वापस करते हुए राक्षसों के प्राणों की रक्षा करना चाहिए ।।६।।

रावण—क्या सुग्रीव ने सीता को वापस करने के लिए कहा है ? यह सम्भव नहीं है, हनुमान् !

हनुमान—आर्य सुग्रीव ने और भी कहा है कि—

काल के वशीभूत होकर यदि मूर्खता से मेरा संदेश स्वीकृत नहीं किया तो दैव ने अब तुम्हारा विनाश निश्चित कर दिया है, लङ्का भस्म हो जाएगी ।।७।।

रावण—अरे ! इसके वचन असह्य है ।

हनुमान—राक्षसेन्द्र ! यह मेरे वचन नही है मैं तो संदेशवाहक हूँ सुग्रीव का दूत । यदि तुम्हें पसन्द नहीं, मैं चुप हो जा रहा हूँ ।

रावण—(शान्त होकर) सुग्रीव इस संदेश में यह कैसे भूल गए कि—

सूर्पणखापमानेन खरादीनां वधेन च ।
रावणस्य यशोगाथा पूर्वमेव कलङ्किता ॥८॥

हनुमान्—राक्षसेन्द्र ! किमस्य प्रतिशोधोऽबलापहरणात् सम्भाव्यते । तवापराधी कौशलेन्द्रो न चेयं तस्य भार्या सीता । यदि तापसानां प्रथमापराधोऽप्यक्षम्य एवासीत्—

उद्वेलयन्ती हृदयं भगिन्या-
स्तिरस्क्रिया चेद् विकलीकरोति ।
उदग्रधन्वा प्रसभं रिपूणां,
रक्तेन कुर्याः समराभिषेकम् ॥९॥

रावणः—किमुक्तं रे हनुमन् ! तत्तापसेन सह प्रतापिनो लङ्केश्वरस्य युद्धम् ? किं रे ! नावगतां रावणस्य पराक्रमयशोगाथा ?

माहेन्द्रं कुलिशं निपत्य हृदये यस्याभवन्निष्फलम् ,
हुंकारेण निवृत्य कण्ठ अग्रहीत् पाशः स्वयं पाशिनः ।
शृङ्गं विद्रवतो यमस्य महिषस्योत्खातमाजौ बलात्,
सोऽयं रावण आह्वयेदपकृतं रामं वराकं रणे ॥१०॥

हनुमान्—तत् किं लङ्केश्वर ! सीतापहरणं तव यशोऽनुकूलम् ?

सूर्पणखा के अपमान और खरादि के वध में रावण की यशोगाथा पहले ही कलंकित हो चुकी है ॥८॥

हनुमान—राक्षसेन्द्र ! क्या उसका प्रतिशोध अबला के अपहरण से सम्भव हैं ? तुम्हारा अपराधी कौशलेन्द्र है, न कि उनकी पत्नी सीता । यदि तापसों का पहला अपराध भी अक्षम्य ही था तो—

हृदय को उद्वेलित करता हुआ यदि बहन का तिरस्कार विकल कर रहा है तो धनुष उठाकर बलपूर्वक शत्रुओं के रक्त से समर का अभिषेक करना चाहिए ॥९॥

रावण—क्या कहा हनूमान् ! उस तापस के साथ प्रतापी रावण का युद्ध ! क्या तुम्हें रावण के पराक्रम की यशगाथा ज्ञात नहीं हैं ?

इन्द्र का वज्र जिसकी छाती पर पड़कर निष्फल हो गया, जिसकी हुंकार ने वापस जाकर पाश ने स्वयं वरुण का ही गला दबोच लिया, जिसने रण में भागते हुए यमराज के महिष का सींग बलपूर्वक उखाड़ लिया, वह रावण एक मामूली अपकारी राम को रण में युद्ध के लिए ललकारे ? ॥१०॥

हनुमान—तो क्या, लङ्केश्वर ! सीता का अपहरण तुम्हारे यश के अनुकूल है ?

रावणः—नैतदपहरणं नाम, एतत्तु गर्वोद्धतस्य तत्तापसस्याभिमान-भञ्जनमात्रम् । किमुत नापश्यद् हनुमन् सीताशोकवाटिकामध्यास्ते, राक्षसीभिः संरक्षिता । सत्यपि मदीयाधिकारे सा तथैव पूता, यथा पूर्व-मासीत् ।

तथापि सीताहरणाद् बभूवा-
पमानमेतद् महदार्यजातेः ।
वधेन बन्धो भगिनी-विकृत्या
न रक्षसां कापि तिरस्क्रियाभूत् ॥११॥

हनुमान्—कीदृशं, सूर्पणखा व्यवहारेणाकारणमेतत् काण्डं भूतमित्य-वधार्य त्वया तथा विधेयं यथायमग्निर्लङ्कां न प्रज्वालयेत् । सुग्रीवेण सहैव रामेण सन्धिप्रस्तावो रक्षसां हितायेति मे मतिः ।

रावणः—कथमार्यैः सह सन्धिप्रश्नः ? वायुनन्दन ! अपि नाम जानासि कीदृशी तिरस्कारसरणि-विसोढानेन रावणेन । बाल्येऽनार्यासुतत्वान्निष्का-सितोऽहमध्ययनशालाया आर्योपाध्यायैः । दूरतरुच्छायोपविष्टेनैव श्रुत्वाधी-तानि मया सर्वाणि वेदशास्त्राणि ।

हनुमान्—अयमासीदार्याणां भ्रम एव । मानवाधिकारवादिना रामेणासौ भग्नः । तेन निषादो भ्रातृस्नेहेन स्वीकृतः, शबर्या सहाशनक्रिया

रावण—यह अपहरण नहीं है, यह तो गर्वोद्धत उस तापस का अभिमान भञ्जन मात्र है । क्या हनुमान ने नहीं देखा है ! सीता राक्षसियों से संरक्षित अशोक-वाटिका में रहती है । मेरे अधिकार में भी वह वैसी ही पवित्र है जैसी पहले थी ।

फिर भी सीताहरण से आर्य-जाति का महान अपमान हो गया ? किन्तु बन्धु के वध से और बहन की विकृति से राक्षसों का कोई अपमान नहीं हुआ ॥११॥

हनुमान्—सूर्पणखा के व्यवहार से अकारण ही यह कैसा काण्ड हो गया यह विचार कर तुम्हें वैसा करना चाहिए, जिससे यह आग लङ्का न जला दे । सुग्रीव के साथ ही राम के साथ संधि प्रस्ताव राक्षसों के हित के लिए है ऐसा मैं सोचता हूँ ।

रावण—आर्यों के साथ संधि का प्रश्न कैसा ? वायु नन्दन ! जानते हो ? कैसी तिरस्कार की परम्परा सही है रावण ने । बाल्यकाल में अनार्यापुत्र होने के कारण आर्यउपाध्यायों ने अध्ययनशाला से निकाल दिया । दूर वृक्ष की छाया में बैठे ही सुनकर मैंने समस्त वेद और शास्त्रों को पढ़ा है ।

हनुमान—यह आर्यों का भ्रम ही था । मानवाधिकारवादी राम ने इसे तोड़ दिया है । उन्होंने निषाद को भाई का स्नेह दिया है शबरी के साथ भोजन किया ।

विहिता, समस्तवानरजातिरार्यदीक्षयात्मसात्कृता । विस्मरणीयो नाम बाल्येऽनुदार-व्यवहारस्तेषामार्याणम् ।

रावणः—परं हनुमन् ! विस्मरामि नाम तानाघातान्, प्रतिभाशक्ति-सम्पन्नोऽप्यसौ रावणोऽनार्यत्वाद् दिक्पाल पदात् प्रवञ्चितः । देवानां चाटु-कारोऽसौ मे भ्राता कुबेरो दिक्पालपदेन सहैव कोषाध्यक्षे प्रतिष्ठितः केवल-मार्यत्वात् ।

आर्योद्वाहसम्बन्धेऽपि सर्वत्र तिरस्कृतिरेव हस्ते गता । विज्ञोऽपि रावणः सर्वत्रार्यसभास्वकिञ्चनवत् तिरस्कृतोऽभूत् ।

हनुमान्—राक्षसेन्द्र ! भूतकलस्यैतद् वृत्तम् । व्यतीतमेतत् सर्वम-धुनाऽऽर्यधर्मे महत्परिवर्तनं जातम् । आर्यानार्यसमन्वयेन धर्मस्यात्रुनातनं नव्यं भव्यमेव स्वरूपं निष्पन्नं दृश्यते ।

रावणः—रक्षःसंस्कृतेः समुत्थानप्रतिक्रियेयं हनुमन् ! इति तु त्वया न ज्ञायते । बाल्ये पदे-पदेऽपमानितेनानेन रावणेन यौवने स्वपौरुषमाश्रित्य जीवनस्य स्वयं मार्गमावधारितम् । रक्षः-संस्कृतेरुदयो जातः । अधुना देवाना-मार्याणां कोषनगरसेनासाधनानि मे हस्तेगतानि आर्यप्रमुखा मे दासाः, देवा मे वन्दिनः, दिक्पाला मे यशोगायकाः, भगिनी-तिरस्कारिणस्तापसस्य च

समस्त वानर जाति को आर्य-दीक्षा से अपने में मिला लिया । वाल्यकाल में उन आर्यो का अनुदार व्यवहार भूल जाइए ।

रावण—परन्तु हनुमान ! भूल जाऊँ, उन आघातों को, प्रतिभा और शक्ति सम्पन्न भी यह रावण अनार्य होने के कारण दिक्पाल पद से वञ्चित रह गया और केवल आर्य होने के कारण देवताओं का चाटुकार वह मेरा भाई कुबेर, दिक्पाल पद के साथ ही कोषाध्यक्ष पद पर प्रतिष्ठित हो गया । आर्यों के साथ विवाह सम्वन्ध में भी सर्वत्र तिरस्कार ही हाथ लगा । विद्वान् होते हुए भी रावण सर्वत्र आर्य सभाओं में अकिञ्चन की भाँति अपमानित होता रहा ।

हनुमान—राक्षसेन्द्र ! यह भूतकाल की बातें हैं । यह सब बीत गया है अब आर्यधर्म में महान परिवर्तन आ गया । आर्य और अनार्य धर्म के समन्वय से धर्म का अधुनातम नव्य और भव्य ही स्वरूप दिखाई देता है ।

रावण—रक्ष संस्कृति के उत्थान की यह प्रतिक्रिया है हनमान् ! यह तुम नहीं जानते हो । वाल्यकाल में पद-पद पर अपमानित इस रावण ने यौवन में अपने पौरुष का आश्रय लेकर स्वयं जीवन का मार्ग निर्धारित किया है । रक्ष-संस्कृति का उदय हुआ । अब आर्यदेवों का कोष नगर, सेना, साधन मेरे हाथ में आ गए हैं । आर्य प्रमुख मेरे दास है, देवता मेरे बन्दी हैं, दिक्पाल मेरे यश गायक हैं और बहन का

पत्नी मे बन्दिनी । अधुना रामेण सन्धिः सम्भाव्यते परं सीतापणेन । जनकपुरे हस्ताच्च्युतेयं यदा लङ्कापुरीमागतैव तदेतदार्यनारी-रत्नं लङ्कागारे, सुरक्षितं विराजेतेत्येव मे निश्चयः ।

हनुमान्—एष ते निश्चयो लङ्केश्वर ! तज्जानीहि राजन् !
नश्यति हिंसापरकं शासनमुन्मूलयति प्रजा ह्यसंतुष्टा ।
कूलङ्कषेव सरिता, वृक्षान् निरङ्कुशान् महीपालान् ।।१२।।

राक्षसेश्वर ! लङ्कावासिनः सर्वे विनाशविमुखाः शान्तिमिच्छन्ति । लङ्काजनमत सीताहरण-काण्डेनान्त-र्विरोधस्थितिं जनयति । अतो रामेण सह सन्धिरेव ते श्रेयसे । मा विपरीतवुद्ध्या सर्वेषां विनाशमुद्घाटयेः ।

रावण—अरे रे वानर ! विनाशभीत्या मां भीषयति—
येषां भृकुटि-विलासाद् यमराजः कम्पते करौ बद्ध्वा ।
तान् भीषयसि विनाशात् कीदृक् त्वं वानरो मूढः ।।१३।।

किमधिकेन । त्वत् स्वामिनः कृते एष मे संदेशो, यद् रावणेन सह पूर्वसन्धिसम्मानं वानराणां शोभनं भविता । वयं सुग्रीवमैत्रीमिच्छामः । एतन्मेऽतीव प्रीतिकरं भविता यत् मया सह मिलित्वाऽतीतात्याचारप्रतिशोधनार्थमार्यावर्ताभियानं विधीयते ।

अपमान करने वाले तापस की पत्नी मेरी बन्दिनी है । अब राम के साथ संधि सम्भव है पर सीता के सौदे पर । जनकपुर में हाथ से गिरी हुई जब यह लङ्का पुरी आ ही गई तो यह आर्य नारी-रत्न लङ्का पुरी में ही सुरक्षित रहे, यही मेरा निश्चय है ।

हनुमान—यही तुम्हारा निश्चय हैं लङ्केश्वर, तब तो राजन् ! समझ लो-हिंसा पर चलने वाला शासन नष्ट हो जाता है, असंतुष्ट प्रजा निरङ्कुश राजाओं को उस प्रकार उखाड़ फेंकती है जिस प्रकार किनारा काटने वाली नदी वृक्षों को ।।१२।।

राक्षशेश्वर ! सभी लङ्का वासी विनाश विमुख, शांति चाहते हैं । लङ्का का जनमत सीता हरण काण्ड से विरोध की स्थिति उत्पन्न कर रहा है । इसलिये राम के साथ संधि तुम्हारे कल्याण के लिये है । विपरीत बुद्धि से सर्वनाश का उद्घाटन मत करो ।

रावण—अरे वानर ! विनाश के भय से मुझे भयभीत कर रहा हैं—

जिनके भृकुटि-विलास से यमराज हाथ जोड़कर कांपने लगता है उन को विनाश से भयभीत करते हो तुम कैसे मूर्ख वानर हो ।।१३।।

अधिक क्या, तुम्हारे स्वामी के लिये मेरा यह संदेश है कि रावण के साथ पूर्व संधि का सम्मान वानरों के लिये शोभन होगा । हम सुग्रीव की मित्रता चाहते हैं । यह मेरे लिये अत्यंत प्रीति कर होगा कि मेरे साथ मिलकर अतीत के अत्याचारों के प्रतिशोध के लिये, आर्यावर्त पर आक्रमण किया जाये ।

हनुमान्—राक्षसेन्द्र ! यदि प्रतिशोधमात्रं रक्षः-संस्कृतेर्लक्ष्यं तदा विज्ञापयामि—

केवलं प्रतिशोधाय क्रियाशीलं प्रशासनम् ।
प्रजाहिते निरुद्दिष्टमल्पकालिकमुच्यते ॥१४॥

तत् तथा कुर्या यथा संस्कृतिद्वयी समानरूपेण समन्वयपथेऽग्रसरेत् । अन्यथा तवेयं हठधर्मिता रक्षःसंस्कृते र्विनाशहेतुरेव भविता ।

रावणः—पुनरीदृशी ते वाक्-प्रवृत्तिः ! आर्यावर्त-दर्पदलनक्षमं रावण-मेवं ब्रवीषि । किं न जानासि—

भ्राता कुम्भकर्णो मे मेघनादसमः सुतः ।
सन्नद्धा वाहिनी शस्त्रैरादेशं मे प्रतीक्षते ॥१५॥

तद् दूत वानर ! ब्रूहि सुग्रीवं यदसौ तापसपक्षधरो मन्मैत्रीं तिरस्करोति तदेदानीमसुरक्षिता किष्किन्धा । एतदपि जानातु नामासौ—

विना युद्धं न लङ्कातः सीतेयं बहिरेस्यति ।
कृते युद्धे विनाशो वै नराणां वानरैः सह ॥१६॥

हनुमान—राक्षनेन्द्र ! यदि प्रतिशोध मात्र रक्ष-संस्कृति का लक्ष्य है तो सूचित करता हूँ—

केवल प्रतिशोध के लिए क्रियाशील और प्रजा के हित में निरुद्दिष्ट प्रशासन, अल्पकालिक कहा जाता है ॥१४॥

अतः ऐसा करें जिससे दोनों संस्कृतियां समान रुप से समन्वय-पथ पर अग्रसर होवे । नहीं तो तुम्हारी यह हठ धर्मिता रक्ष-संस्कृति का विनाश-हेतु हो जायेगी ।

रावण—तुम्हारा पुनः वाग् व्यवहार ऐसा हो गया । आर्यावर्त के दर्प को दलन करने में समर्थ रावण से इस प्रकार बात करते हो, क्या नही जानते हो—

भाई कुम्भकर्ण और मेघनाद जैसा मेरा पुत्र और शस्त्रों से सन्नद्ध सेना मेरे आदेश की प्रतीक्षा कर रही है ॥१५॥

तो दूत वानर ! सुग्रीव से कहना कि वह तापस पक्षधारी मेरी मित्रता का तिरस्का र करता है तो अब किष्किन्धा असुरक्षित है । यह भी वे जान ले—

विना युद्ध यह सीता लङ्का से बाहर नहीं जायेगी और युद्ध करने पर वानरों के साथ नरों का विनाश निश्चित है ॥१६॥

हनुमान्—राजन् ! प्रजामङ्गल-कामनैव प्रथमो राजधर्मः । युद्धं तु प्रजाविनाशकरमेव ।

अतः—कुर्वन्तां वा न कुर्वन्तां राजानो लोकपालनम् ।
चिन्तयन्ति हि तत्क्षेमं प्रजा राज्ञां यतो बलम् ॥१७॥

रावणः—तत् किमहं, शौर्यप्रतापैश्वर्यं विहाय कदर्यं प्रदर्शयन् ननु सीतां परित्यजामि ?

हनुमान्—राक्षसेन्द्र !
त्रुटीनां दर्शनं, ज्ञात्वा स्वीकृतिः, परिशोधनम् ।
दर्शनं महतामेतज्जीवनस्य मनस्विनाम् ॥१८॥

तत् त्रुटिस्वीकरणं महतां लक्षणं नानेन ते क्वचित् कदर्यमुपपद्यते ।

रावणः—कीदृशोऽयं वानरो, मां नीतिमुपदिशति ।

हनुमान्—राजन् ! नीति-वाक्यानि सर्वतो ग्राह्याणि, तथापि राक्षसेश्वर ! किमियं नीतिवाक्यशब्दावलिरेव नैतद् दृश्यते यस्यैकोऽपि दूतस्त्वेदृशान् भटान् हन्तुं क्षमस्तदागते लङ्कायां किं शिष्यते ।

रावणः—(क्रोधेन) कटुवादिन् ! दूतत्वादवध्योऽपि दण्डनीयोऽसि !

हनुमान—राजन् ! प्रजा की मंगल कामना ही राजा का प्रथम धर्म है। युद्ध तो प्रजा विनाशक है—अतः राजा लोग प्रजा का पालन करें या न करें, प्रजा के कल्याण की चिन्ता तो करते हैं; क्योंकि प्रजा ही राजाओं की शक्ति है ॥१७॥

रावण—तो क्या वानर ! शौर्य प्रताप ऐश्वर्य को छोड़कर कायरता प्रदर्शित करते हुए सीता को छोड़ दूं ?

हनुमान—राक्षसेन्द्र ।

त्रुटियों को देखना, जानकर उसे स्वीकार करना, उसमें शोधन करना, यह महान् मनस्वी लोगों के जीवन का दर्शन है ॥१८॥

तो त्रुटियों की स्वीकृति महानता का लक्षण है इससे तुम्हारी कहीं कायरता नही होती है।

रावण—कैसा है यह वानर, मुझे नीति का उपदेश देता है ।

हनुमान—राजन् ! नीति के वाक्य तो सभी स्थानों से ग्रहण करने योग्य होते हैं । राक्षसेन्द्र क्या यह नीति वाक्यों की कोरी शब्दावली ही है यह नहीं दिखाई देता जिसका एक दूत भी तुम्हारे ऐसे भटों को मारने में समर्थ है उसके आने पर लङ्का में क्या शेष रहेगा ।

रावण—(क्रोध से) कटुवादी तू दूत के कारण अवध्य होने पर भी दण्ड-

(सैनिकान् प्रति) अस्य पृष्ठे ज्वलन्तं लाङ्गूलं विधाय नगरे भ्रामयन्तु नामैनं सैनिकाः ! ।

हनुमान्—लङ्केश ! मा क्रीडित्वाग्निना, अनेन लङ्का भस्मसाद्-भविता ।

रावणः—(सक्रोधम्) सैनिकाः ! आदेशं पालयन्तु, नयन्तु नामैनं मत्सम्मुखात् त्वरितम् ।

हनुमान्—(सैनिकैर्नीयमानः) लङ्केश्वर !

सर्वधर्मोपदेशस्तु हस्तिस्नान-क्रियाऽभवत् ।
गृहीतस्त्वं तु कालेन, कः केशेषु समुद्धरेत् ॥१९॥

राक्षसेन्द्र ! लङ्काविनाशो निश्चित एव प्रतीयते (सैनिकैः सह निष्क्रान्तः)

रावणः—भोः सभासदः ! वयं मध्याह्नकृत्यसम्पादनार्थं सभां विसर्जयामः ।

(सर्वे निष्क्रान्ताः)

(ततः प्रविशत्य शोक तरु तले सीता)

सीता—(सविषादम्) अहो ! हनुमद् दर्शनेनाधिगतं किञ्चिदालम्बनं तदपि हस्तात् पतितम् । मद्दृष्टिसम्मुखीनोऽसौ राक्षसै युध्यमानो

नीय है (सैनिकों से) सैनिकों ! इसके पीछे जलती हुई पूँछ बनाकर इसे नगर में घुमाओ ।

हनुमान—लङ्केश ! आग से मत खेलो । इससे लङ्का भस्म हो जायेगी ।

रावण—(क्रोध से) सैनिकों ! आदेश का पालन करो मेरे सामने से इसे शीघ्र ले जाओ ।

हनुमान—(सैनिकों से ले जाये जाते हुए) लङ्केश्वर ! सब धर्म का उपदेश हाथी का स्नान हो गया, तुम्हारे केश तो काल ने पकड़ लिये है तुम्हारा कौन उद्धार करेगा ॥१६॥

राक्षसेन्द्र ! लङ्का का विनाश निश्चित है ।

(निकल गया)

रावण—सभासदों ! मध्यान्ह कृत्य सम्पादन के लिये सभा विसर्जित करते है ।

(सब चले गये)

(अशोक वृक्ष के नीचे सीता)

सीता—(सविषाद) आह, हनुमान के दर्शन से कुछ आलम्बन मिला था वह भी हाथ से गिर गया । मेरी आँख के सामने ही लड़ता हुआ, दुर्दान्त राक्षसों द्वारा

बद्धो दुर्दान्तैः। क्व नु खलु गतो भवेत्। जीवितो, हतो वा लङ्केशभृत्यैः। का गतिः।

अहो! इमा राक्षस्यो मां विहाय क्व नु पलायिताः किमापतितम्? यन्मे रक्षणमेव विस्मृतम्।

कीदृशं मे जीवनं? विवाह काले किं नु मयेप्सितं, चक्रवर्तिकुलवधू र्भूत्वा सकलैश्वर्यस्वामिनी खलु भविष्यामि। परं दैवेन पर्णकुटीरं भाग्ये लिखितं, तदपि दूरीभूतम्। देशान्तरेऽद्येमाभिः क्रूराभी राक्षसीभिः परिवृता तरुतले भूमौ शयानासौ सीताऽद्यापि रघुकुलवधूस्वप्नं पश्यति।

अहो कीदृशीयं नारीतिहास-परिकल्पना! विनाशमूलमेव सर्वत्रेयं दृश्यते। वनवास प्रसंगे कैकयी, सीताहरणप्रसगे सूर्पणखा, तद् रामरावणयो र्युद्धप्रसंगे किमियं सीता कारणं भविता।

नारी-जीवनं कीदृशी ते परिणतिः। तवैतद् यौवनं पुरुषमाकर्षति, मातृत्वं विश्वं सृजति, पद्दलितापि त्वमेव लक्ष्मीस्त्वमेव दुर्गा, त्वमेव महा-मायान्नपूर्णेति सर्वत्र पूज्यसे। त्वमेव प्रकृतिरूपा पुरुषं नर्तयन्ती प्रतीयसे।

मयैव शान्तमार्यपुत्रस्य हृदयमुद्वेलितम्। मयैव प्रबोधितमार्यपुत्रस्य

बांध लिया गया। जाने कहां गया होगा, जीवित है या लङ्केश के भृत्यों ने मार डाला, क्या गति है।

अरे! यह राक्षसियां मुझे छोड़कर कहां चली गई, क्या आ पड़ा है? जो मेरा रक्षण ही भूल गयी।

कैसा है मेरा जीवन, विवाह के समय मैंने क्या सोचा था कि चक्रवर्ती कुल की वधू होकर सकल ऐश्वर्य की स्वामिनी बनूंगी परंतु दैव ने पर्ण कटी भाग्य में लिख दी, वह भी दूर हो गयी। दूसरे देश में आज इन क्रर राक्षसियों से घिरी हुई पेड़ के नीचे भूमि पर सोती हुई यह सीता आज भी रघुकुल वधू का स्वप्न देख रही हैं।

अरे! कैसी है यह नारी-इतिहास की परिकल्पना। विनाश की मूल ही यह सर्वत्र दिखाई देती है। वनवास के प्रसंग में कैकयी, सीता हरण के प्रसंग में सूर्पणखा, तो क्या राम-रावण के युद्ध प्रसंग में यह सीता कारण होगी?

नारी-जीवन तेरी कैसी परिणति है। तुम्हारा यह यौवन पुरुष को आकर्षित करता है, मातृत्व विश्व की रचना करता है, पद्दलित होती हुई भी तुम्ही लक्ष्मी, तुम्ही दुर्गा, तुम्ही महामाया, अन्नपूर्णा के रूप में सर्वत्र पूजी जाती हो। तुम ही प्रकृति रूप धारिणी पुरुष को नचाती प्रतीत होती हो।

मैंने ही शान्त आर्यपुत्र का हृदय उद्वेलित कर दिया। मैंने ही आर्यपुत्र

क्षात्रम्। स्मरामि, स्वणमृगावलोकनसमये यथोक्तमार्यपुत्रेण 'सीते! समागतोऽयं कालस्तेऽग्नि-परीक्षायाः' सत्यं किमसावन्तर्यामी भविष्यज्ञ आसीत्। किं जानन्नेव गतो मायामृगं विहन्तुमार्यपुत्रः। किमहं सत्यं तत्कार्ये बाधाभूवम्। सत्यं द्वादशवर्षैं यंन्नभूतं तदेकवर्षेण सञ्जातम्। किमेष लङ्केशवधोपक्रमः प्रतीयते किमियं मे सत्यमग्निपरीक्षैव ?

(सहसा विलोक्य) अहो! दग्धं लङ्कानगरम्। वर्धते महत्कोलाहलः। सर्वथा मङ्गलं स्याद् हनूमतः। कः को नु खल्वत्र वर्तते ? न कापि, सर्वा अपि मामेकाकिनीं परित्यज्य पलायिता राक्षस्यः।

(नेपथ्ये)

अग्निदाहेन दंदह्यमाना भो भो राक्षसाः! पश्यत रे पश्यत, कीदृशमस्य कृत्यं विकटमुखस्य मर्कटस्य। भस्मीकृतं नगरं, ध्वस्तानि सौधानि, नष्टानि साधनानि पश्यत रे पश्यत !

लीलालाङ्गूल-लोलत्स्फुरदनलचलद्रोचिषां ज्वालमालः,
हुंकारोत्पात-लङ्काशिखरगतमरुद्वेग-विभ्रत्-प्रतापः ।
वह्निध्वस्तोच्च-सौधाध्युसित-जनविपच्चीत्कृति-व्याप्तलोको,
भाग्यव्योम्नीव दीप्तो ज्वलति कपिरयं रक्षसां धूमकेतुः ॥२०॥

का क्षात्र जगा दिया। याद है, स्वर्ण मृग देखने के समय आर्यपुत्र ने कहा था "सीता, तुम्हारी अग्नि परीक्षा का समय आ गया" सचमुच क्या यह अन्तर्यामी भविष्यज्ञ थे। क्या जानते हुए भी आर्य पुत्र माया मृग को मारने गये। क्या मैं सचमुच उनके कार्य में बाधा थी। सच ही जो बारह वर्षों में नहीं हुआ, वह एक वर्ष में हो गया। क्या यह लङ्केश-वध का उपक्रम है ? क्या यह सच ही मेरी अग्नि परीक्षा ही हैं।

(सहसा देखकर) अरे ! लङ्का नगर जल रहा है। महान कोलाहल बढ़ रहा है, सर्वथा हनमान का मंगल हो अरे यहां कौन है ? कोई नहीं ! सभी मुझे अकेली छोड़कर, राक्षसियां भाग गयी।

(नेपथ्य में)

आग से जलते हुये राक्षसों, देखो रे देखो इस विकट मुख मर्कट का कैसा कृत्य है। नगर भस्म कर दिया, महल ध्वस्त कर दिये, साधन नष्ट कर दिये, देखो रे देखो—

खिलवाड़ में पूँछ के हिलने से फैलती हुई आग की चिनगारियां भरी ज्वालाओं की मालाओं वाला, हुँकार से कूदता हुआ लङ्का के शिखर पर पहुँचे हुये, वायु वेग के समान प्रताप को धारण किये हुये, अग्नि से नष्ट ऊंचे महलों में बसे हुये लोगों के विपत्ति ग्रस्त चीत्कार से लोक को व्याप्त करता हुआ, यह वानर

सीता—(आकर्ण्य) अहो ! तदेतद् वानरेन्द्रस्यैव कृत्यम्। दिष्ट्या वर्धामहे। सर्वथा रक्षकोऽसौ भगवानादित्यो मङ्गलं विदधातु हनूमतः।

हनुमान्—(सहसा प्रविश्य) प्रणमत्यसौ हनुमान् मातरम्। मातः ! तवाशिषा दग्धेयं लङ्का राक्षसपुरी। रावणस्य दुराशया सहैव सर्वं भस्मीभूतम्।

सीता—वत्स ! अपि नाम कल्याणं ते शरीरस्य। (संस्पृशन्ती) सर्वथा नश्यन्तु तेऽमङ्गलानि।

हनुमान्—शुभमाशंसतोऽपि मे वधोद्यमस्तस्य लङ्काभस्मोद्यमो जातः। तद् गच्छामि स्वामिनं शुभमाशंसितुम्। समादेशय मां मातः !।

सीता—(चूणामणि यच्छन्ती) वत्स ! आर्यपुत्राय देयमिदं मत्प्रतीकम्। मद्वचनादुच्यतां चार्यपुत्रः। यत्—

इयमग्नि-परीक्षा मे किमद्यापि न पूर्यते।
वनवासादपि स्वामिन् ! लङ्कावासोऽति दुस्तरः॥

हनुमान्—(सास्रम्) मा गा अधैर्यं मातः। शीघ्रमेतायं सुकरो भविष्यति।

राक्षसों के भाग्य रूपी आकाश में चमकता हुआ, धूमकेतु जैसा प्रज्वलित हो रहा है ॥२०॥

सीता—(सुनकर) तो यह वानरेन्द्र का ही कृत्य है। मेरा सौभाग्य है। सर्वथा रक्षक भगवान आदित्य हनुमान का मंगल करें।

हनुमान—(सहसा प्रवेश करके) माता को यह हनुमान् प्रणाम करता है। माता, तुम्हारे आशीर्वाद से यह राक्षसपुरी लङ्का जला दी। रावण की दुराशा के साथ ही सब कुछ भस्म हो गया।

सीता—वत्स तुम्हारे शरीर का तो कल्याण है। (स्पर्श कर) सर्वथा तुम्हारे अमंगल नष्ट हो जायें।

हनुमान्—कल्याण के लिये समझाते हुए भी मेरे वध का उद्यम, लङ्का को भस्म करने का उद्यम हो गया। तो मैं स्वामी को शुभ सूचना देने जा रहा हूँ। माता जी मुझे आज्ञा दें।

सीता—(चूणामणि देती हुई) आर्यपुत्र को यह प्रतीक देना। मेरे वचनों से आर्यपुत्र से कहना कि—

क्या यह मेरी अग्नि परीक्षा अभी पूर्ण नहीं हुई है। स्वामी ! वनवास से भी यह लङ्का-निवास अति कठिन है।

हनुमान्—(अश्रु पूर्ण) माता ! धैर्य न छोड़ो शीघ्र ही यह सरल हो जाएगा।

सीता—(सास्रम्) गच्छ वत्स ! लङ्कादहनक्रुद्धा इमे राक्षसा यथा नापकुर्वन्तु । शुभास्ते पन्थानः सन्तु ।

हनुमान्—एष गच्छामि । (इति प्रणम्य निष्क्रान्तः)

सीता—आः अपि नाम गतो हनुमान् ? सत्यं गत एव । किं क्रियते, न कापि राक्षसीतः समायाता तदहं वाटिकान्तरिता भूत्वा प्रतीक्षे त्रिजटाम्। सैव केवल मे प्रियसखी, शोकसंवाहनाय शरणं जाता ।

(इति निष्क्रान्ता)

समाप्तोऽयं सप्तमोऽङ्कः

सीता—(अश्रु पूर्ण) वत्स ! जाओ जिससे लङ्का दहन से क्रुद्ध यह राक्षस हानि न पहुँचाये । तुम्हारा मार्ग शुभ हो ।

हनुमान्—यह जा रहा हूँ । (प्रणाम कर चले गये)

सीता—आह ! क्या हनुमान् चले गये । सच ही चला गया । क्या करें । कोई राक्षसी भी इधर नहीं आयी । तो इस वाटिका के अन्दर जाकर त्रिजटा की प्रतीक्षा करती हूँ । केवल वही मेरी प्रिय-सखी शोक संवाहन के लिये शरण है ।

(चली गयी)

सप्तम अङ्क समाप्त

---

* ॐ *

अष्टमोऽङ्कः

(ततः प्रविशति, अहितुण्डिकेन सह चेटी)

चेटी—यथानिर्दिष्टाह स्वामिना लङ्केश्वरेण यत् कतिपयदिवसैः स्वामिनी मन्दोदरी विमनायमाना वर्तते, तदहं गत्वाद्य प्रातरेव स्वामिन्या-रहि-क्रीडनैः मनोविनोदनं करोमि ।

(परिक्रम्याकाशे) अहो ! मदनिके ! क्व गतेदानीं प्रातरेव स्वामिनी ? किं भणषि "प्रातरेवोत्थाय स्नात्वाविमनायमाना स्वामिनी पूजापात्रेण महेश्वर-मन्दिरं प्रस्थिता" अहो ! कथं मामप्रतीक्षमाणा स्वामिन्येकाकिनी मन्दिरं प्रस्थिता । (पुनराकाशे) कथं सा विमनायमाना-सीत् किं ब्रवीषि "लङ्कादहनसमयादेव विमनायमाना स्वामिनी, रात्रौ भयङ्कर-स्वप्नबोधिता भयातुरा निद्रामलभमाना व्याकुलमानसाऽऽशुतोषं, प्रातरेवोत्थाय, दुःस्वप्नशान्तये शरणं गता ।" अहो ! केवल स्वप्नसंदर्शनेन विकलीभूता स्वामिनी, तदनेन सर्पनृत्येन स्वामिन्या मनोविनोदनं विधेयम् ।

(अहितुण्डिकं प्रति) अरे रे नाग नर्तक ! विलम्बते बेला, पूजानन्तरं

(सपेरे के साथ चेटी का प्रवेश)

चेटी—जैसा स्वामी लङ्केश्वर ने निर्देश दिया है कि कुछ दिनों से स्वामिनी मन्दोदरी उदास रहती है; अतः मैं जाकर आज प्रातः ही सर्प क्रीडा से स्वामिनी का मनोविनोद करती हूँ । (घूमकर आकाश की ओर) अरे मदनिके ! स्वामिनी आज प्रातः ही कहां चली गयी ? क्या कहती हो—"प्रातः ही उठकर स्नान करके उदास-मन स्वामिनी पूजा-पात्र लेकर महेश्वर के मन्दिर की ओर गयी है ।" अरे ! मेरी बिना प्रतीक्षा किये ये ही स्वामिनी अकेले ही मन्दिर की ओर क्यों चली गयी (पुनः आकाश की ओर) वह उदास क्यों थी ? क्या कहती हो—"लङ्का दहन के समय से ही उदास रहने वाली स्वामिनी रात्रि में भयङ्कर स्वप्न से जग गयी, भय से नींद न आने पर व्याकुल-मन, प्रातः उठकर दुःस्वप्न-शांति के लिये आशुतोष की शरण में गई है ।"

अरे ! स्वप्न दर्शन से स्वामिनी व्याकुल हो गयी, तो इस सर्प-नृत्य से स्वामिनी का मनोविनोद होना चाहिये, (सपेरे से) अरे नागनर्तक ! समय बीत रहा

स्वामिन्या आगमन समयं समागतमेव जानीहि। तत् त्वमपि नागनर्तनकला-प्रदर्शन-सन्नद्धो भूत्वा तिष्ठ।

अहितुण्डकः—यथाज्ञापयति भद्रे! (करण्डात् काल नागं बहिरा-नयति) पश्यासौ कालनागो, विषधरो दन्तस्पर्शनेनव कालकवलीकर्तुं समर्थोऽसौ जीवान्। ततोऽपि नतयामि जीविकार्थम्।

चेटी—अहो! कीदृशीय जीविका-वृत्ति यदर्थं जना ईदृशान् विषधरान् स्कन्धेन वहन्ति क्रीडन्ति चैतैः सह।

अहितुण्डकः— न केवल क्रीडन्ति क्रुद्धानामेतेषां फणप्रहारानपि सहन्ते।

चेटी—सत्यमतिकठिनं विषधरैः कीडनम्।

अहितुण्डकः—तथापि सर्वे लङ्कावासिनो विषधरैरेव क्रीडन्ति।

चेटी—कीदृशं नाम?

अहितुण्डकः—यदत्र प्रशासकै शान्तं लङ्काजीवनम् सीतापहरण-काण्डेन युद्धोन्मुखीकृतम्। अनिच्छन्तोऽपि लङ्का जना एतेषामादेशानुकूल क्रीडने विवशाः सन्ति।

चेटी—तत् किमेतान् शासकान् विषधरान् मन्यसे?

है। पूजा के पश्चात् स्वामिनी के आने का समय आया हुआ ही जानो। तो तुम भी नाग नचाने की कला प्रदर्शन के लिये तैयार होकर बैठो।

सपेरा—भद्रे! जैसी आज्ञा। (पिटारी से कालनाग को बाहर लाता है) देखो, यह कालनाग, यह विषधर दाँत के स्पर्श से ही जीव धारियों को काल कवलित करने में समर्थ है। तब भी जीविका के लिए इसे नचाता हूँ।

चेटी—अरे! यह कैसी है जीविकावृत्ति! जिसके लिए लोग ऐसे विषधरों को कन्धे पर ढोते हैं; और इनके साथ खेलते हैं।

सपेरा—केवल खेलते ही नही है क्रोधित इनके फणों को भी सहते हैं।

चेटी—सचमुच विषधरों के साथ खेलना बड़ा कठिन है।

सपेरा—फिर भी सभी लङ्कावासी विषधरों से ही खेलते हैं।

चेटी—कैसे?

सपेरा—जोकि यहां प्रशासकों ने लङ्का का जीवन सीताहरण-काण्ड से युद्ध की ओर जाने को विवश कर दिया है। न चाहते हुए भी लङ्कावासी इनके आदेशानुसार चलने को विवश हैं।

चेटी—तो क्या इन शासकों को विषधर मानते हो?

अहितुण्डिकः—अहो ! निरङ्कुशानिमान् ततोऽप्यधिकानेव । रोष-विषैरेतेषां व्यापादितः को नाम जीवितुं समर्थः ।

चेटी—एतन्नाम कथं त्वया ज्ञायते ?

अहितुण्डिकः—बाल्यादेव विषधरैः क्रीडामि नर्तयामि चैतानेव ततः परिचिनोमि सर्वजातीयान् विषधरान् ।

चेटी—भवतु नाम दर्शय नागनृत्यम् ।

अहितुण्डिकः—इदं दर्शयामि (इति तथा करोति)

(ततः प्रविशति पूजापात्रहस्ता मन्दोदरी)

मन्दोदरी—(नाग-नृत्यं दृष्ट्वा स्वगतम्) अहो ! गृह-प्रवेश एव सर्पदर्शनम् । सर्वथा शं विधेयान्महेश्वरः ।

चेटी—(मन्दोदरीं दृष्ट्वा) अहो ! प्राप्ता स्वामिनी । (अग्रे गत्वा) अपि नाम सर्वथा कल्याणं स्वामिन्याः शरीरस्य ? इयमहं बहुप्रतीक्षितास्मि स्वामिन्या कृते । पश्यैतत् त्वद् मनोविनोदार्थमानीतं नाग-नृत्यम् ।

मन्दोदरी—(किञ्चित् कुपितेव) हले ! किमेतत्त्वया प्रातरेव सर्पदर्शनप्रबन्धो विहितः । नैतद् रोचते मह्यम् । दूरमपसार्यतामेतत् ।

सपेरा—अरे ! इन निरङ्कुशों को तो उससे भी अधिक ही । इनके रोष-विष से मारा हुआ कौन जी सकता है ?

चेटी—तुम यह कैसे जानते हो ?

सपेरा—बचपन से विषधरों के साथ खेलता हूँ और इन्हें ही नचाता हूँ इसीलिए सर्वजातीय विषधरों को पहचानता हूँ ।

चेटी—होगा ! नागनृत्य दिखाओ ।

सपेरा—यह दिखा रहा हूँ (वैसा करता है)

(पूजा पात्र हाथ में लिए मन्दोदरी का प्रवेश)

मन्दोदरी—(नागनृत्य देखकर मन में) अरे ग्रह प्रवेश करते ही सर्पदर्शन ! महेश्वर सब कल्याण करें ।

चेटी— (मन्दोदरी को देखकर) अरे स्वामिनी आ गयीं (आगे जाकर) स्वामिनी के शरीर का सर्वथा कल्याण है ? मैंने स्वामिनी के लिए बहुत प्रतीक्षा की है । यह देखो, तुम्हारे मनोविनोद के लिए नागनृत्य बुला है ।

मन्दोदरी— (कुछ कुपित सी) अरे ! यह क्या तुमने प्रातः ही सर्पदर्शन का प्रबन्ध कर दिया । मुझे पसन्द नहीं है, इसे दूर हटाओ ।

चेटी—(सविस्मयं सापराधेव) क्षमस्व स्वामिनी अविचारितमेव मया ते मनोविनोदनार्थमानीतं सर्पनृत्यम् । चेदरुचिस्ते ततो दूरीकरोमि । (अहितुण्डिकं प्रति) त्वरितमेव विषधरानिमान् करण्डे कृत्वा दूरमपसर । यतः स्वामिनी सर्पदर्शनेऽननुरक्ता वर्तते । इयं वर्तते ते परिश्रम-दक्षिणा ।

अहितुण्डिकः—यथाज्ञापयति भद्रे ! तदेते गताः करण्डे विषधराः । इदमहं गच्छामि । सत्यमेव—

जीवन्ति चण्डकोपैर्ये भूमिपालै निरङ्कुशैः ।
ते वै बिषधरैरेव जीवन्ति जनसेवकाः ॥१॥

(इति निष्क्रान्तः)

मन्दोदरी—प्रातरेव गृहे सर्पदर्शनम् । इदमपरो गण्डस्योपरि स्फोटः सम्वृत्तः ।

चेटी—सत्यमियमहमपराद्धा । यथा मदनिकयोक्तं स्वामिनी स्वप्न दर्शनादाकुला प्रतीयते ?

मन्दोदरी—हले ! त्वं मे प्रियसखी सापराधापि मे रोचते तत्त्वां स्वप्नसहभागिनीं करोमि ।

चेटी—(आश्चर्य के साथ अपराधिनी सी) स्वामिनी क्षमा करें विना विचारे ही मैंने तुम्हारे मनोविनोद के लिए सर्पनृत्य मगा लिया । तुम्हे पसन्द नहीं है तो इसे दूर कर रही हू (सपेरे के प्रति) शीघ्र ही इन विषधरों को पिटारी में बन्द कर चले जाओ, क्योंकि स्वामिनी सर्प-दर्शन पसन्द नही कर रही हैं । यह रहीं तुम्हारी परिश्रम दक्षिणा ।

सपेरा—जैसी आपकी आज्ञा । तो यह लो गए पिटारी में विषधर । यह मैं चला, सच ही—

जो प्रचण्ड क्रोध वाले निरंकुश राजाओं के साथ जीवन व्यतीत
करते हैं वे जनसेवक निश्चय ही विषधरों के साथ जीते हैं ॥१॥

(चला गया)

मन्दोदरी—सवेरे सवेरे गृह में सर्पदर्शन । यह अन्य गाल पर फोड़ा हो गया ।

चेटी—सच ही यह मैं अपराधिनी हू । जैसा मदनिका ने बताया स्वामिनी स्वप्न दर्णन से व्याकुल प्रतीत हो रही है ?

मन्दोदरी—अरे ! तुम मेरी प्रिय सखी अपराधिनी भी मुझे पसन्द हो, तो तुम्हे मैं स्वप्न की सहभागिनी बना रही हूँ ।

चेटी—सर्वथा भूतेश्वरः शं विधास्यति, वदतु मां स्वामिनी यतः परिजनविनोदिता मनोवेदना स्वल्पा संजायते ।

मन्दोदरी—स्वप्ने मयासौ दृष्टस्तापसो धनुर्धरः समुद्रं मार्गं याचमानः ।

चेटी—किमनेन याचमानेन ।

मन्दोदरी—किञ्चित् कालं प्रतीक्ष्यानेन कोपारुण-लोचनेन निषङ्गान्नाराचः समुद्धृतः । प्रचण्डेन तद्बाणानलेन व्याकुलीभूय सागरेण सविनयं मार्गं प्रदत्तम् । तदनन्तरं मया दृष्टं यद् बानरैः सागरोपरि सेतु र्निर्मितः । तन्मार्गेण प्रविष्टा सर्वे लङ्कायाम् ।

चेटी—नैव शोभनम् जातम् । ततस्ततः

मन्दोदरी—ततो मया दृष्टं यत् सभागारे स्थिताया मे कर्णाभ्यां ताटङ्के निपतिते । स्वामिनो मस्तकाच्च मुकुटम् ।

चेटी—निद्रानुभूत-परिणामा अपि केचित् स्वप्ना हृदयं पीडयन्ति । तथापि स्वामिनि ! इमे नाम स्वप्ना एव । को नामान्यथा स्वामिनः शीर्ष-गतानि मुकुटानि स्प्रष्टुं क्षमः ।

चेटी—भूतेश्वर सब कल्याण करेंगे स्वामिनी मुझे बताए क्योंकि परिजनों में विनोदन की गयी मन वेदना हल्की हो जाता है ।

मन्दोदरी—स्वप्न मे मैंने उस धनुर्धर तापस को समुद्र से रास्ता मांगते हुए देखा ।

चेटी—इसके मांगने से क्या ?

मन्दोदरी—कुछ काल तक प्रतीक्षा करके क्रोध से लाल नेत्र वाले उसने निषङ्ग से बाण निकाल लिया । बाण की प्रचण्ड आग से व्याकुल होकर सागर ने विनय पूर्वक मार्ग दे दिया । उसके बाद मैंने देखा—कि वानरो ने सागर के ऊपर सेतु बना दिया । उस मार्ग से सभी लङ्का मे प्रविष्ट हो गए ।

चेटी—यह अच्छा नहीं हुआ । फिर क्या हुआ ?

मन्दोदरी—तब मैंने देखा कि सभाभवन में बैठे हुए मेरे कानों से कुण्डल और स्वामी के सिर से मुकुट गिर पड़े ।

चेटी—निद्रा में परिणाम की अनुभूति देने वाले भी कुछ स्वप्न हृदय को पीडा पहुंचाते है । फिर भी स्वामिनी यह केवल स्वप्न ही है नहीं तो कौन भला स्वामी के सिर के मुकुट को छू सकता है ।

मन्दोदरी--अतोऽपि दारुणतरो दृष्टः स्वप्नः। स्मृत्वाऽपि मे कम्पते हृदयम्।

चेटी--मा केवलं स्वप्नदर्शनेन भैषीः। वदतु नामाग्रे।

मन्दोदरी--तदनन्तरमेव स्वामी नग्नशिरा एवोत्थाय स्नानागारे तैलेन स्नातुमारब्धः। ततो निर्गत्य महिषमारुह्य पुत्रेण मेघनादेनानुगम्यमानो यमदिशं प्रस्थितः। तदैव मे निद्रा भग्ना।

चेटी--अति दारुणानि कल्पनागतान्यपि कदाचिदसह्यानि भवन्ति दृश्यानि। सर्वथा शुभं विधास्यति भगवान् भूतेश्वरो महेश्वरः।

मन्दोदरी--सखि! प्रातरेव मया गत्वैकाकिन्या प्रथमं दृष्टो महेश्वरः, अर्चितश्च सप्रार्थनं रक्षः-कुलप्रतिष्ठेश्वरः।

चेटी--सर्वथा ते कल्याणं स्वामिनश्चाभयं विधास्यत्यसौ।

मन्दोदरी--अहमत्र स्थित्वा प्रसादेन, पवित्रीकृतेन जलेन स्वामिनो विघ्नपरिसमापनक्रियां विधातुमिच्छामि। क्व नु खलु स्वामी वर्ततेऽधुना?

चेटी--तिष्ठतु स्वामिनीहैव यतोऽहं गत्वा स्वामिने निवेदयामि। गत्वा च पुनर्मन्दिरे स्वामिन्याः स्वप्नशान्त्यै महामायां प्रसादयामि।

मन्दोदरी--इससे भी दारुण स्वप्न देखा है। स्मरण से ही मेरा हृदय कांप जाता है।

चेटी--केवल स्वप्न दर्शन से मत डरिये। आगे कहिए।

मन्दोदरी--उसके बाद स्वामी नङ्गे सिर ही उठ कर स्नानागार में तैल से स्नान करने लगे। बाद में निकलकर महिष पर चढ़कर पुत्र मेघनाद से अनुगम्यमान दक्षिण दिशा को चल दिए। तभी मेरी नींद टूट गयी।

चेटी--कल्पना गत भी दृश्य अत्यन्त दारुण और कभी तो असह्य हो जाते है। भगवान, भूतेश्वर, महेश्वर सर्वथा कल्याण करेगें।

मन्दोदरी--सखी! प्रातः ही मैंने अकेले जाकर सर्वप्रथम महेश्वर के दर्शन किए और राक्षसकुल की प्रतिष्ठा के ईश्वर की प्रार्थना सहित अर्चना की

चेटी--वे तुम्हारा कल्याण और स्वामी का सर्वथा अभय करेगें।

मन्दोदरी--मै यहां रहकर प्रसाद से पवित्र किए जल से स्वामी की विघ्न परिसमान-क्रिया करना चाहती हूँ। जाने स्वामी इस समय कहां हैं?

चेटी--स्वामिनी यहीं ठहरें, जिससे मैं जाकर स्वामी से निवेदन कर दूं और फिर मन्दिर में जाकर स्वामिनी के स्वप्न-शान्ति के लिए महामाया की पूजा

(परिक्रम्यावलोक्य च) (स्वगतम्) अहो! इत एवाभिवर्तते स्वामी, मन्ये मन्दोदरी-मनोव्यथा-परिज्ञानाकुलोऽसौ विमृशन्निवैकाग्रचित्तः समायाति। ततोऽहमितो भूत्वा गच्छामि महामाया-निकेतनम्।

(इति निष्क्रान्ता)

(ततः प्रविशति धीरगम्भीरमुद्रा-विनिवेशितात्मा रावणः)

मन्दोदरी—(प्रणमन्ती) गृह्यतामयं प्रणामाञ्जलि र्दास्याः।

रावणः—(हृदयेनालिङ्ग्य) दास्याः अथवा लङ्केश-स्वामिन्याः, अद्य किमेतच्चन्द्राननमुद्वेगराहुणा ग्रस्तमिवोपलक्ष्यते क एष यमलोकाभिलाषी स्वामिन्या अहितेनापराध्यति।।

मन्दोदरी—स्वामिन्! न कोऽप्यसौ। केवलं दुःस्वप्नदर्शनेन मनो मे खिन्नतामगात्।

रावणः—(विहसन्) अहो स्वप्न दर्शनेन! भवतु नामेमे दुःस्वप्नाः शीघ्रमेव मे वन्दिनो भविष्यन्ति।

मन्दोदरी—स्वामिन्! प्रातरेवाद्य मया समर्चितो भूतेश्वरः। तदेष प्रसादः स्वामिना गृह्यताम्।

करूं। (आगे चलकर और देखकर) (मन में) अरे स्वामी इधर ही आ रहे हैं, मन्दोदरी की मनोव्यथा जानने के लिए व्याकुल वे कुछ सोचते हुए एकाग्रचित्त चले आ रहे हैं। तो मैं इधर होकर महामाया मन्दिर को चली जा रही हूँ। (निकल गयी)

(चली गयी)

(धीर गम्भीर मुद्रा में रावण का प्रवेश)

मन्दोदरी— (प्रणाम करती हुई) दासी का प्रणाम स्वीकार करें।

रावण— (हृदय से लगाकर) दासी या लङ्केश–स्वामिनी की। आज क्यों यह चन्द्रानन उद्वेग राहु से ग्रस्त लग रहा है। यह कौन यमलोकाभिलाषी स्वामिनी का अहित करके अपराध कर रहा है।

मन्दोदरी—स्वामी! वह कोई नही है, केवल दु स्वप्न दर्शन से मेरा मन खिन्न हो गया है।

रावण—(हँसता हुआ) अरे स्वप्न दर्शन से? होने दो, यह दुःस्वप्न शीघ्र ही मेरे बन्दी हो जायेगें।

मन्दोदरी—स्वामी! प्रातः ही आज मैंने भूतेश्वर की अर्चना की है। यह प्रसाद स्वामी ग्रहण करले।

भूतेश्वर-प्रसादस्तु सर्वथा ग्राह्य एव। परं मे हृदयस्य स्वामिनी स्वप्नेभ्यो बिभेति तदेदं दशकण्ठस्य शौर्यप्रभामण्डल निष्फलमेव। यतः—

मत्त जेन्द्र विमर्दन-चर्चित-यशसो वनेषु केशरिणः।
केशरिणी यदि शशकात् त्रस्येत् व्यर्थं हि तच्छौर्यम् ॥२॥

मन्दोदरी—कथमेतदाचक्षते स्वामिन्! तथापि लङ्कादहन-समयादारभ्य मे मनोऽशन्तं जातम्। अद्य तु दुःस्वप्न-दर्शनाद् बहुशो व्याकुलो कृतास्मि। नाथ! अहमेतत् प्रार्थये।

रावणः—स्वामिन्या मुखात् प्रार्थना! केवलं मामाज्ञापय प्रिये

अग्निमिद्रं कुबेरं वा यमदण्डान्वितं यमम्।
दिक्पालं कं प्रयच्छामि स्वामिन्यै दासवृतये ॥३॥

मन्दोदरी—मा मैवम्! सर्वथैश्वर्यसम्पन्ना ते दासी। स्वामिन्! ममेयं प्रार्थना—

सीतेयं विपदानीता लङ्काविध्वंस-कारिणी।
राहुच्छायेव सन्नद्धा ग्रस्तुं रक्षःकुल द्विजम् ॥४॥

अतो नाथ! प्रार्थये विसृज्यतामियं सर्वेषां हिताय। न जाने

रावण—भूतेश्वर का प्रसाद तो सर्वथा ग्राह्य ही है। परन्तु मेरे हृदय की स्वामिनी स्वप्नों से डरती है तो यह दशकण्ठ का शौर्य-प्रभा-मण्डल निष्फल ही है। क्योंकि—वनों में मत्त गजराज के दर्शन से शोभित यश वाले केशरी की केशरिणी यदि शशक से भय करती है तो उसका शौर्य ही व्यर्थ हो गया। ॥२॥

मन्दोदरी—स्वामिन्! आप ऐसा क्यों कहते है, तथापि लङ्का दहन के समय से मेरा मन अशान्त हो गया है। आज तो स्वप्न दर्शन से बहुत व्याकुल हो गयी हूँ। नाथ! मैं यह प्रार्थना करती हूँ।

रावण—स्वामिनी के मुख से प्रार्थना! प्रिये! केवल मुझे आज्ञा दो कि—अग्नि, इन्द्र, कुबेर, यमदण्ड से युक्त यमराज जैसे किस दिक्पाल को स्वामिनी की सेवा के लिए दे दूँ ॥३॥

मन्दोदरी—ऐसा कुछ नहीं। आप की दासी सर्वथा ऐश्वर्य-सम्पन्न है। स्वामी! मेरी यह प्रार्थना है—

यह सीता लङ्का-विध्वंस करने वाली विपत्ति आगयी है जो राहु की छाया की तरह राक्षस-कुलरुपी चन्द्रमा को ग्रसने के लिए तैयार है ॥४॥

अतः नाथ! प्रार्थना करती हूँ सब के हित के लिए इसे छोड़ दें। न जाने क्यों

कथमिमां स्मृत्वा मेऽन्तःकरणमनायासमेव स्पन्दते, कम्पते चाशङ्कया हृदयम् ।

सर्वैश्वर्य-समापन्ना लङ्केयं नाथ ! रक्ष्यताम् ।
मा भवेद्धि यतो लोके राक्षसानाममङ्गलम् ॥५॥

रावणः—आश्चर्यं महदाश्चर्यम् । वीर-प्रसविन्या वीर-पत्न्या लङ्केश्वर-स्वामिन्या इदं निवेदनं वा जल्पनामात्रम् । मन्दोदरि ! किमेतदापतितं ते हृदये । यतः—

स्वर्गग्राम-विलुण्ठने यमपुर-ध्वंसाभियानेऽपि या,
वज्रे गर्जति कालदण्डपतनाद् भीता न किञ्चित् पुरा ।
सा निर्वासित-तापसादपि पुनर्वन्यादहो वानराद्,
भीता तत् किमियं ममाकुशलता, नारी स्वभावस्तु वा ॥६॥

तत् किमहं प्रिये ! सीतया सहैव विजितं सर्वं निवर्तयामि, समुत्खातं यममहिष-विषाणं, विजितामिमां लङ्कां, भुवनख्यात-वीर्यस्य दशग्रीवस्य दिग्-व्याप्तं यशोऽपि विसर्जयामि । भीरुहृदये ! तापसभयाद् भीतस्य रावणस्य जीवनं वा कथं सम्भाव्यते ।

एतदपि जानीहि—

सीता संरक्षणे मृत्यु र्भवेद् वा न भवेत् प्रिये !
सीता विमोचनाकीर्ति र्मां हनिष्यति निश्चितम् ॥७॥

इसका स्मरणकर मेरा अ त करण अनायास ही धड़कने लगता है और हृदय आशंका से कांपने लगता है ।

हे नाथ सम्पूर्ण ऐश्वर्य से सम्पन्न इस लङ्का की रक्षा करलो जिससे संसार में राक्षसों का अमंगल न हो ॥५॥

रावण—आश्चर्य ! महान आश्चर्य ! वीर प्रसाविनी वीर पत्नी लङ्केश्वर की स्वामिनी का यह निवेदन है या वकवास है । मन्दोदरी ! तुम्हारे हृदय मे यह क्या आ पड़ा—क्योंकि जो पहले स्वर्ग लूटने पर यमपुर के अभियान पर गर्जते हुए वज्र के सामने और काल-दण्ड के पतन से किञ्चित भी नही डरी वह वनवासी तापस और व य वानर से भयभीत हो गयी तो यह मेरी अकुशलता है या नारी स्वभाव ही ऐसा होता है । ॥६॥

तो क्या प्रिये ! मैं सीता के साथ ही सव कुछ जीता हुआ वापस कर दूँ, उखाड़ा हुआ यमराज के महिष का विषाण, विजित लङ्का भुवन मे विख्यात शौर्य वाले दशग्रीव का दिग्व्यापी यश भी छोड़ दूँ । भीरु हृदय वाली तापस से भयभीत रावण का जीवन भी कैसे सम्भव है । यह भी जान लो सीता को रखने में मृत्यु हो या न हो परन्तु सीता को छोड़ने का अपयश मुझे निश्चय ही मार डालेगा ॥७॥

मन्दोदरी—नाथ ! यथा श्रुतं मया तापसोऽसौ न केवलं युद्धकला प्रवीणः स्वधर्मंदीक्षाकुशलोऽपि वर्तते। सर्वं दक्षिणापथमस्य प्रभावेणार्य—धर्मे दीक्षितं जातम्। युद्ध-हिंसाविरोधे बहूनि रक्षः-कुलानि लङ्कायामपि प्रच्छन्नार्याणि जातानि। तैरत्र विद्रोहः सम्भाव्यते नाथ ! बहूपलब्धमैश्वर्यं जीवने तत् का क्षतिः सीता परावर्तनात् ?

रावणः—का क्षतिः ? भी रुहृदये !

या क्षति विहिता तेन तापसेन बनस्थले।
लङ्कायां तद्ध तेनापि तदंशोऽपि न पूर्यते ॥८॥

जानासि किमपकृतमनेन तापसोद्धतेनानपराद्धस्यापि दिग्विजयिनो लङ्केश्वरस्य—

भृकुटि-विलासो यस्य, क्रुद्धस्याकम्पयेज्जगत् सर्वम्।
भ्राता तस्य विशसितो भगिनी विद्रूपिता तेन ॥९॥

तथापि प्रिये ! तवाग्रहो यत् सीतां तस्मै निवेदयामि। जानासि—

सीता लोभ वशीभूत स्ता पसोऽसौ सहानुजः।
लङ्कामागत्य मद् बाणानले यज्ञ-हवि र्भवेत् ॥१०॥

मन्दोदरी—नाथ ! जैसा मैंने सुना हैं यह तापस न केवल युध्धकला प्रवीण हैं, स्वधर्मदीक्षा कुशल भी है। इसके प्रभाव से सम्पूर्ण दक्षिणा–पथ आर्य–धर्म दीक्षित हो गया है। युद्ध की हिंसा के विरोध में बहुत से राक्षसों के कुल लङ्का में प्रच्छन्न आर्य हो गए है। उनसे विद्रोह की सम्भावना है। नाथ ! जीवन में बहुत ऐश्वर्य पाया है सीता परित्याग से क्या क्षति हो जायेगी ?

रावण—भीरू हृदय वाली ! क्या क्षति हो जायेगी ?

दण्डकवन में जो क्षति उस तापस ने की है लंका में उसके मरने से भी उसका अंश भीं पूरा नही होगा ॥८॥

जानती हो, विना अपराध ही दिग्विजयी लंकेश्वर का उस उद्धत तापस ने क्या अपकार किया है ?

क्रोधित होने पर जिसका भृकुटि विलास सारे संसार को कंपा दे उसका भाई उसने मार डाला और बहन को कुरुप कर दिया ॥९॥

फिर भी प्रिये ! तुम्हारा आग्रह है कि सीता उसे भेंट कर दूँ जानती हो– सीता के लोभ से वशीभूत वह तापस भाई के साथ लंका में आकर मेरे वाणों की आग में यज्ञ की हवि हो जायगा ॥१०॥

मन्दोदरी—स्वामिन् ! रामभक्तेन सुग्रीवदूतेन हनूमता यदत्र विहितं तेन तत्सैन्यशक्तिरनुमीयते। यदि मित्र-हिते सुग्रीवेण युद्धं निर्णीतं तदा सति बाधा-बहुलेऽपि लङ्का पथे—

रामनाराच-विस्फोटो लङ्काप्राङ्गण-मध्यगः।
खरानुभूतिं व सर्वं राक्षसेभ्यः प्रदास्यति ।।११।।

(नेपथ्ये)

किमिति रे राक्षसाः ! मदोन्मत्ता इतस्ततो विक्षिप्ता विचरन्ति। विस्मरत रे विलासलास्यान्, गता रे ! मधुयामिनी-चन्द्रिकाभिसाराः, व्यतीता पुष्पावचयदिवसाः, कुरुत रे ! सज्यानि धनूंषि विदधत रे ! शितानि शस्त्रास्त्राणि सन्नद्धा भवत रे ! आयोधनाय।

अरे रे वृकोदर ! कुतः खल्विदं, किमिदं भाषसे। विजितसकल भुवनकोषोऽस्माक स्वामी। क एष पुनरुद्दण्डो दण्डार्थमुपक्रमते।

किमसौ महोदरः पृच्छति। धिग् रे शून्यबुद्धे ! किमेतन्नावगतमद्यापि यद् वारीशप्रवाहवद् विपलबानरेन्द्रवाहिनी सागरोत्तर-परिसरमाच्छादयन्ती लङ्काभियानोन्मुखी वर्तते।

मन्दोदरी—स्वामी ! रामभक्त-सुग्रीव दूत हनुमान ने जैसा यहाँ जो किया है उससे उनकी सैन्य-शक्ति का अनुमान होता है। यदि मित्र के हित में सुग्रीव ने युद्ध का निर्णय लिया तो लङ्का मार्ग में अनेक बाधायें होने पर भी—

लङ्का के प्रांगण में राम के बाणों का विस्फोट समस्त राक्षसों को खरानुभूति प्रदान करेगा। ।।११।।

(नेपथ्य में)—

क्यों रे मदोन्मत्त राक्षसो ! नशे में चूर इधर-उधर घूम रहे हो। अरे वह विलास नृत्य भूल जाओ, यह मधुमास की निशाओं में चन्द्रिका अभिसार चले गये, पुष्प चुनने के दिन बीत गये, धनुषों पर प्रत्यञ्चा चढ़ाओ अरे शस्त्रास्त्रों पर धार रखो, युद्ध के लिये तैयार हो जाओ।

ओ रे वृकोदर ! यह कहाँ से हो गया, तू यह क्या कह रहा है ? यह कौन उद्दण्ड दण्ड पाने के लिये उपक्रम कर रहा है।

क्या यह महोदर पूछ रहा है ? शून्य बुद्धि तेरे लिये धिक्कार है, क्या अभी तक तुझे मालूम नहीं कि सागर के प्रवाह के समान विशाल-वानरेन्द्र सेना समुद्र के उत्तरी परिसर को घेरे हुये लङ्का-अभियानोन्मुखी हो रही है।

(मन्दोदरीदशाननौ साश्चर्यं श्रृणुतः)

किं भाषसे वृकोदर ! विशालावानरवाहिनी ?
अथ किं महोदर ! वानर-वाहिनी, श्रृणुत रे सर्वे राक्षसाः—

पादाघातसमुत्थितेन रजसा दिग्व्यापिना व्याकुलम् ।
आवेगेन समुद्रलङ्घनपथ-व्याप्त-त्वरोद्वेजितम् ।
वीरैः संकुलमार्य-यूथपतिभिः सुग्रीव-संचोदितम् ,
सैन्यं सञ्चितशक्ति रामधनुषः संकेतमुद्वीक्षते ।।१२।।

सत्यं वृकोदर ! पश्यासौ लङ्केश्वरानुजो राजकुमारो विभीषणः सत्वरं राजगृहं प्रयाति । मन्ये किञ्चित् सविशेषं वृत्तं वर्तते ।

महोदर ! नान्यत् किञ्चित् यथा मयोक्तं युद्धकालः समागतस्तद् गच्छत रे गृहान् ।

(ततः प्रविशति समुद्विग्न-मानसो विभीषणः)

रावणः—(विभीषणं दृष्ट्वा) आयाहि वत्स विभीषण ! स्वागतं ते, सावसरं समागतोऽसि । पश्य रे तवेयं भातृजाया स्वप्नसंदर्शनेन चिन्तिता वर्तते ।

(मंदोदरी और दशानन आश्चर्य से सुनते हैं)

क्या कहते हो वृकोदर ! विशाल वानर सेना ! और क्या महोदर ! वानर सेना, सुनो रे सभी राक्षसों ।

पैरों के आघात से उठी हुई दिग्व्यापी धूल से व्याकुल, आवेग से समुद्र पार करने की मार्ग में व्याप्त शीघ्रता से उद्वेजित वीर-आर्य यूथपतियों से परिपूर्ण और सुग्रीव से संचालित शक्तिशाली सेना राम के धनुष के संकेत की ओर देख रही है ।।१२।।

सच है वृकोदर ! देखो वह लङ्केश्वर का अनुज राजकुमार विभीषण तेजी से राजगृह की ओर जा रहा है । लगता है कोई विशेष बात है ।

महोदर ! और कुछ नहीं, जैसा मैंने कहा, युद्ध काल आ गया है इसलिये घरों को जाओ ।

(उद्विग्नचित्त विभीषण का प्रवेश)

रावण—(विभीषण को देखकर) आओ वत्स ! विभीषण तुम्हारा स्वागत है समय से आये हो, देखो यह तुम्हारी भाभी स्वप्नदर्शन से चिन्तित है ।

विभीषणः—तात ! किमियं दुःस्वप्नसंदर्शनाकुला केवलं मे भ्रातृजाया एव, सकलमेतल्लङ्काजीवनं न केवलं नक्तं, दिवा-दुःस्वप्नेन विक्षिप्तं वर्तते ।

रावणः—किमिदं भाषसे विभीषण ! तवापीदृशी मनोवृत्तिः संजाता ।

विभीषणः—न चात्र तात ! मनोवृत्तेः प्रश्नः प्रजापरिवीक्षणे विचार-परिचर्चा न केवलं राजनीतिं, राज्ञां विवेकशीलतामपि पुष्णाति ।

रावणः—किमत्र विना परिवीक्षणं, राजनीतिं तिरस्कृत्यैव विश्व विजय-प्रतिष्ठोपार्जिता दशग्रीवेण ।

विभीषणः—अपि नामेमां परिवर्तितां विपरीतां राजनीतिं पश्यति राजन् ? केनानुमीयते यत् केनापि लङ्काऽऽक्रम्यते, परमद्य सूचयामि लङ्केश्वरम्—

सुग्रीवाधिष्ठिता तात ! विशाला शत्रुवाहिनी ।
सागरस्यापरप्रान्ते लङ्कामाक्रान्तुमुद्यता ॥१३॥

किमेतद् राक्षसानां भयकारणं न ?

तात ! क्या यह दुःस्वप्न दर्शन से केवल मेरी भाभी ही व्याकुल है, यह समस्त लङ्का जीवन न केवल रात के, दिवा-स्वप्न से विक्षिप्त हो रहा है ।

रावण—यह क्या कह रहे हो विभीषण ! तुम्हारी भी ऐसी मनोवृत्ति हो गई है ।

विभीषण—तात ! यहां मनोवृत्ति का प्रश्न नहीं है प्रजा के परिवीक्षण में विचार परिचर्चा न केवल राजनीति को, विवेक शीलता को भी पुष्ट करती है ।

रावण—क्या बिना परिवीक्षण, राजनीति को तिरस्कृत करके ही दशग्रीव ने विश्व विजय की प्रतिष्ठा प्राप्त की है ।

विभीषण—क्या राजन् ! इस परिवर्तित विपरीत राजनीति को भी देख रहे हैं । किसने सोचा था कि कोई लङ्का पर आक्रमण करेगा, परन्तु आज लङ्केश्वर को सूचित कर रहा हूँ —

तात ! सुग्रीव से अधिष्ठित विशाल शत्रुवाहिनी समुद्र के दूसरे किनारे पर लङ्का पर आक्रमण के लिये उद्यत खड़ी हैं ॥१३॥

क्या यह राक्षसों के भय का कारण नहीं है ?

रावणः—(सोपहासम्) वत्स ! किमत्र भयकारणम्। मृत्यून्मुखी पिपीलिका पक्षिणी संजायते। अहो ! वानराणां सेना, ! तापसा रामः !, लङ्काभियानम् ! दशग्रीव जयाकांक्षा ! किमेतत् सर्वं हास्यास्पदं न प्रतीयते।

विभीषणः—न चैतन्नाम चिन्तन वानराणामपितु राक्षसानां कृते हास्यास्पदम्। यतः—

हन्याद् रक्षो विराधं खरमतुलबलं नासिकां यो भगिन्याः,
छेत्तुं शक्तः प्रसह्य प्रखर-शरहतो येन वाली क्षणेन।
उल्लंघ्याब्धिं नगर्यां तनयमपि दरेद् यस्य दूतोऽसहायो,
लङ्कायां तस्य शौर्यं विफलमिह भवेत् कीदृशी नो दुराशा ॥१४॥

रावणः—(साक्रोशम्) कथं रे विभीषण ! मां तापस-प्रभावेणाक्रान्तुमिच्छसि। त्रैलोक्य-विजयिनो रावणस्य शौर्यं किमद्य निर्वीर्यं जातम्। अथ वा रे त्वदीयं भुजबलं मृत्युभयात् शिथिलीभूतम्।

विभीषणः—तात ! न ते शौर्यं, न मे भुजबलं शिथिलीभूतम्। तथापि शान्तं लङ्काजीवनं युद्धज्वलने निर्दहेदकारणमेव।

तात ! विचार्यतामेतत्—

रावण—(उपहास के साथ) वत्स ! इसमें भय का क्या कारण है मृत्यु की ओर जाती हुई चीटीं के पर निकल आते है। अहो ! वानरो की सेना ! तापस राम ! लङ्का पर आक्रमण ! दशग्रीव को जीतने की अभिलाषा ! क्या यह हास्यास्पद नहीं है ?

विभीषण—ऐसा सोचना वानरों के लिये नहीं, अपितु राक्षसों के लिये हास्यास्पद है क्योंकि—

जिसने विराध और अतुलवलशाली खर को मार डाला हो वहन की नाक काटने मे समर्थ हो, जिसने हठात प्रखर शर से वाली को मार डाला हो, जिसका दूत असहाय समुद्र को पारकर लङ्का नगरी में पुत्र को मार जाये, उसका शौर्य यहां लकां में, विफल हो जाएगा, यह हम लोगो की कैसी दुराशा है। ॥४॥

रावण—(आक्रोश से) क्यो रे विभीषण ! मुझे तापस के प्रभाव से आक्रन्त करना चाहता है। त्रैलोक्य विजयी रावण का शौर्य क्या निर्वीर्य हो गया या तेरी भुजाओं का वल मृत्यु के भय से शिथिल हो गया है।

विभीषण—तात ! न तुम्हारा शौर्य न मेरी भुजाओं का वल शिथिल हुआ है फिर भी शान्त लङ्का जीवन अकारण ही युध्द की ज्वाला में जले। तात ! यह तो सोचिए—

बाला अनाथा विधवाश्च नार्यो,
दुर्भिक्षदुःखाज्जनता विपन्ना।
युद्धं महल्लोकविनाशकं वै,
निन्दन्ति सन्तो जनशान्तयेऽतः ॥१५॥

मन्दोदरी—स्वामिन् ! समयोचितं ब्रूते वत्स विभीषणः। युद्ध-वर्जनमेव श्रेयस्करमिदानीम् । सीताविसर्जनेमेव वरम् । आर्यक्षत्रियस्य पत्न्याः परगृहनिवास एव तत्कृतापराधस्य पर्याप्तं दण्डः।

रावणः— (सक्रोधम्) अहो ! इदानीं द्वयोरपि शत्रुपक्षपातिनी वृत्तिः। (विभीषण प्रति) त्वयेदानीं प्रकटीकृतं प्रच्छन्नार्यत्वम्।

अविज्ञातो गृहे सर्पः शरीरे रोग एव च।
शत्रुपक्षधरो भ्राता त्रय एव विनाशकाः ॥१६॥

रे विभीषण !

शत्रून् भीषयतेत्येवं कृतं नाम विभीषणः।
भीषयेत् स तु शत्रुभ्यः स्वराष्ट्रं धिक् कृतघ्नता ॥१७॥

तन्निर्वासयामि त्वामिदानीं दशग्रीवरक्षिताद् राष्ट्रात्। त्वरितं निर्गम्यतां यावत्त्वत्कृते कापि कठोरदण्डव्यवस्था न क्रियते।

बालक अनाथ, नारियां विधवा और दुर्भिक्ष–दुख से जनता विपन्न हो जाती है। इसीलिए जन-शांति के लिए सत्पुरुष महान लोक विनाशक युद्ध की निन्दा करते हैं। ॥१५॥

मन्दोदरी—स्वामी ! वत्स विभीषण समयोचित बात कह रहे हैं। इस समय युद्ध को रोकना ही श्रेयस्कर है। सीता को त्यागना ही उचित है। आर्य-क्षत्रिय की पत्नी का पर-गृह में निवास ही उसके लिए अपराध का पर्याप्त दण्ड है।

रावण—(क्रोध से) अरे इस समय दोनों की शत्रु-पक्ष-पातिनी वृति हो गयी है। (विभीषण से) तुमने तो प्रच्छन्न आर्य होना प्रकट कर दिया है —

गृह मे अनजाना सर्प शरीर में रोग और शत्रु पक्षधर भाई तीनो विनाशकारी होते है ॥१६॥

अरे विभीषण–शत्रुओं को भयभीत करेगा इसलिये तेरा नाम विभीषण रखा गया वह अपने राष्ट्र को शत्रुओं से भयभीत करे, इस कृतघ्नता को धिक्कार है ॥१७॥

अतः दशग्रीव रक्षित राष्ट्र से तुम्हें इसी समय निकाल रहा हूँ, शीघ्र चले जाईये, जब तक तुम्हारे लिये कोई अन्य दण्ड व्यवस्था न कर दी जाये।

मन्दोदरी—किमिति भ्रातुर्निर्वासनमादिष्टम् ?

विभीषणः—तात ! बुद्धे वैंपरीत्यं सन्नीते दुंष्प्रभावोऽपशकुनं सूचयति। लक्ष्यते रक्षसां विनाशोऽपरिहार्यः।

रावणः—विभीषण ! पलायतां मद् दृष्टिपातात् सद्य एव । गत्वा रे ! शत्रुतापसं श्रावय सन्नीतिसंदेशम्।

मन्दोदरी—नाथ ! किमेतदाचक्षसे ?

रावणः—दशग्रीवादेशोऽपरिहार्यः।

विभीषणः—त्रैलोक्यविजयिन् ! दशकण्ठ ! एष गच्छामि । प्रदर्शितस्त्वयैव सत्पथः। प्रयतितं मया लोकरक्षणं किन्तु बुद्धिवैपरीत्येन दुर्नियत्या निष्फलीकृतम्।

राक्षसेन्द्र ! अपि नाम त्वया ज्ञायते—

चषकशतै र्मधुपानं कृत्वा लास्यं विलासिनीभिश्च।
निद्रालस्यनिमग्ना सेना ज्येस्यत्यसौ रामम् ? ॥१८॥

तात ! इयम् मे भविष्योक्तिः—

मन्दोदरी—अरे क्या भाई के निर्वासन का आदेश दे दिया ?

विभीषण—तात ! बुद्धि की विपरीतता, सन्नीति का दुष्प्रभाव अपशकुन को सूचित करता है। लगता है राक्षसों का विनाश अपरिहार्य है।

रावण—विभीषण ! तू तत्काल मेरी दृष्टि से ओझल हो जा। अरे जाकर शत्रु तापस को सन्नीति का संदेश सुना।

मन्दोदरी—नाथ यह क्या कह रहे हो ?

रावण—दशग्रीव का आदेश अपरिहार्य है।

विभीषण—त्रैलोक्य विजयिन् ! दशकण्ठ ! यह जा रहा हूँ। तुम्हीं ने सन्मार्ग दिखा दिया। मैंने लोकरक्षा का प्रयत्न किया था किन्तु बुद्धि-वैपरीत्य और दुर्भाग्य ने निष्फल कर दिया।

राक्षसेन्द्र ! क्या आप जानते हैं ?

सैंकड़ों प्याले मदिरा पान कर विलासिनियों के साथ नृत्य करके निद्रा और आलस्य में डूबी हुई यह सेना राम को जीत लेगी ? ॥१८॥

तात ! यह मेरी भविष्यवाणी है—

स्नेहसमन्वयसिक्तः फलितार्यानार्य - संस्कृते वृक्षः ।
हिंसातङ्ककलङ्कै नंशिता नै रक्षसां धर्मः ॥१९॥

(इति निष्क्रान्तः)

मन्दोदरी—नाथ ! गतोऽयं विभीषणः रामसंगतये । ननु नष्टैव लङ्का ।

रावणः—प्रिये ! किमसौ विभीषणो लङ्काविनाशनक्षमः ।

मन्दोदरी—नाथ ! गृहभेदकस्तु महदनर्थकारको जायते । यतो हि—

महत्कार्यमरे धत्ते स्वाल्पोऽपि गृहभेदकः ।
कुठारः काष्ठदण्डेन काननोच्छेदन-क्षमः ॥२०॥

रावणः—(समालिङ्ग्य) प्रिये ! मा भैषीः । अस्य गतिविधि-परिवीक्षणार्थं व्यवस्था विधीयते । विलम्बते च मे परिषत्-परामर्शवेला, तद् गच्छामि सभागृहम् ।

मन्दोदरी—यथा स्वामिने रोचते । अहमपि मदनिकां गृहीत्वा महामाया-मन्दिरं गच्छामि ।

इति निष्क्रान्तौ

समाप्तोऽयमष्टमोऽङ्कः

स्नेह और समन्वय से सिक्त आर्य अनार्य संस्कृति का वृक्ष फलेगा । हिंसा आंतक के कलंक से निश्चय ही राक्षसों का धर्म नष्ट हो जाएगा ॥१९॥

मन्दोदरी—नाथ ! यह विभीषण राम की संगति के लिए गया है निश्चय ही लङ्का नष्ट हो गयी

रावण—प्रिये ! क्या यह विभीषण लङ्का नष्ट कर सकता है ?

मन्दोदरी—नाथ ! गृहभेदक बहुत बड़ा भयकारक होता है ? क्योंकि छोटा भी गृहभेदक, शत्रु का महान कार्य पूरा करता है कुल्हाड़ी काष्ठ दण्ड से ही वन को काटने में समर्थ होती हैं ॥२०॥

रावण— (आलिङ्गन करके) प्रिये ! मत डरो । उसकी गति-विधियों के ज्ञान की व्यवस्था की जाएगी मुझे परिषद में परामर्श के लिए विलम्ब हो रहा है। अतः सभाभवन को जा रहा हूँ ।

मन्दोदरी—जैसी स्वामी की इच्छा । मैं भी मदनिका को लेकर महामाया के मंदिर जा रही हूँ ।

चले गये

सप्तम अङ्क समाप्त

॥ ॐ ॥

नवमोऽङ्कः

(ततः प्रविशति प्रमुखवानरै रुपेतः ससुग्रीवः सानुजो रामः)

रामः—वानरेन्द्र ! कीदृशमिदानीं सैन्यवृत्तं वर्तते ?

सुग्रीवः—आर्यप्रवर ! दीर्घाध्वश्रमश्रान्तं समस्तमिदानीं यूथपैर्यथास्थानं व्यवस्थितं वानरर्क्षसैन्यं विनिवृत्तमध्याह्निकं विश्राम्यते ।

रामः—तात ! यदेतदस्माकं प्रयाणमध्ये सागर-व्यवधानमुपस्थितं तदपि विचारणीयम् । यतः—

नक्रतिमिङ्गिलपूर्णो भीषणमावर्तसंकुलो व्यग्रः ।
शतयोजनमायतनो गर्जत्येषोऽम्बुधिर्लवणः ॥१॥

सुग्रीवः—सत्यमेतद्, यदियं लङ्का सागरावृतत्वात् सुरक्षिता रक्षसामनेक-क्रूरायोजन-क्रीडास्थली सञ्जाता । तथापि बाधाशतैरपि दृढसंकल्पैरस्माभिरियं विजेतव्या । यतः—

मार्गे भीषण-वन्हिर्झंझावातोऽथवा पतेद् वज्रम् ।
धीरा दृढसंकल्पा, लक्ष्यं कुशला जयन्त्येव ॥२॥

(प्रमुख वानर तथा सुग्रीव और अनुज के साथ राम का प्रवेश)

राम—वानरेन्द्र ! अपनी सेना का क्या समाचार है

सुग्रीव—आर्यप्रवर ! दीर्घ मार्गश्रम से श्रान्त, यूथपतियों द्वारा यथा स्थान व्यवस्थित समस्त वानर ओर ऋक्ष सेना मध्यान्ह कृत्य समाप्त करके विश्राम कर रही है ।

राम—तात ! यह जो हम लोगों के प्रयाण के मध्य में सागर का व्यवधान उपस्थित हो गया है इस पर भी विचार करना है । क्योंकि—

मगर और विशाल मछलियों से पूर्ण, भीषण आवर्त से संकुल, सौ योजन विस्तीर्ण, यह व्यग्र, लवण सागर गर्जन कर रहा है ॥१॥

सुग्रीव—सचमुच समुद्र से घिरी होने के कारण सुरक्षित यह लङ्का राक्षसों की अनेक क्रूर योजनाओं की रङ्गस्थली हो गयी है । तथापि सैकड़ो बाधा होने पर भी दृढ़ संकल्प वाले हम लोग इसे जीत लेगें । क्योंकि—

मार्ग में भीषण आग हो: झंझावात हो या वज्र ही टूट पड़े , कुशल दृढ़ संकल्पवान् धीर पुरुष विजेतव्य को जीत ही लेते हैं ॥२॥

रामः—जानामि महौजसां पुरुषार्थ-कौशलम् । तथापि सेना-व्यवस्थामधिकृत्यैव लङ्काभियानमितो भाव्यम् ।

अङ्गदः—आर्य-महोदयाः ! तदत्र सागरे सेतुबन्धनमेव श्रेयस्करं भविता ।

सुग्रीवः—आर्य ! वत्सागदो यथा ब्रवीति सागरे सेतुबन्धनमेवोचितं दृश्यते ।

रामः—अहो ! सागरोपरि सेतु-बन्धनम् । किमिदानीमेतत् सम्भाव्यते ?

सुग्रीवः—आर्य ! नलनीलप्रमुखेषु वैज्ञानिकेषु सैन्येऽत्र वर्तमानेषु न न किञ्चिद् दुष्करमेतत् सेतुबन्धनम् ।

रामः—सुग्रीव ! यदिदानीमेतादृशा विज्ञानवेत्तारः सहायकाः विद्यन्ते तन्निर्मितमेव जानीहि सेतुम् ।

(नेपथ्ये)

पुत्रो विश्रवसः पुलस्त्यकुलजो लङ्केश्वरस्यानुजो,
नाम्ना चैव विभीषणोऽपि मनसामानन्दनो यः सताम् ।
सीतामुक्तिसमान-सन्धिविषये निष्काषितो बन्धुना,
प्राप्तः प्रीतिकरोऽधुनार्यसुहृदां पृच्छत्यसौ राघवम् ।।३।।

राम— महान, ओजस्वी वीरों का पुरुषार्थ कौशल जानता हूँ, फिर भी सेना को पूर्ण व्यवस्थित करके ही यहां से लङ्का पर अभियान होना चाहिए ।

अङ्गद—आर्य महोदय ! इस सागर पर सेतु बांधना ही कल्याणकर होगा ।

सुग्रीव—आर्य ! वत्स अङ्गद जैसा कहते है, सागर पर सेतु बांधना ही उचित दिखाई देता है ।

राम—अहो ! सागर पर सेतु बांधना ! क्या यह इस समय सम्भव है ।

सुग्रीव— आर्य ! नलनीलादि प्रमुख वैज्ञानिको के यहाँ सेना मे विद्यमान रहते हुए यह सेतुबन्धन कुछ दुष्कर नही है ।

राम—सुग्रीव ! यदि इस समय ऐसे विज्ञान बेत्ता सहायक हैं तो सेतु को निर्मित ही समझो ।

(नेपथ्य में)–

विश्रवा का पुत्र, पुलस्त्य के कुल में उत्पन्न, लङ्केश्वर का अनुज, नाम से विभीषण होते हुए भी जो सज्जनो के मन को आनन्दित करने वाला है, वह सीता की मुक्ति और समान स्तरीय सन्धि के विषय पर रावण द्वारा निष्काषित अब आर्य मित्रो का हितकारी, यहां आ गया हैं और राम को पूछ रहा हैं ।।३।।

हनुमान्—स्वामिन् ! निर्मितः सेतुः ।

रामः—कीदृशस्तात ! (सर्वे साश्चर्यं पश्यन्ति)

हनुमान्—आर्यानार्यरक्षसां संस्कृतिसेतुः ।

रामः—(सस्मयम्) कथमीदृशं नाम वायुनन्दन !

हनुमान्—श्रूयतामार्य ! (पुनर्नेपथ्ये "पुत्रो विश्रवसः……" इति श्रूयते ।)

रामः—अहो लङ्केश्वरानुजः !

हनुमान्—तात ! लङ्केश्वरानुजो विभीषणः शरणं प्राप्तः ।

रामः—अतीव प्रीतिकरमिदानीमेतत् ।

सुग्रीवः—रावणेन निष्कासितः श्रीमतां प्रीतये मैत्रीं याचमान इवानुमीयतेऽसौ विभीषणः ।

हनुमान्—अत एवार्येण विभिन्नसंस्कृतिसागरेषु निर्मितः सेतुः । सफलोऽद्य वनवासायासः । यतः—

भिन्नमार्ग - प्रवृत्तानामार्यवानर - रक्षसाम् ।
अभूदार्यवरः सेतुः सर्वधर्मसमन्वये ।।४।।

हनुमान्—स्वामिन् ! सेतु निर्मित हो गया ।

राम—तात ! कैसा (सब आश्चर्य से देखते है)

हनुमान्—आर्य-अनार्य और राक्षसों का संस्कृति-सेतु ।

राम—(विस्मय से) वायुनंदन ऐसा कैसे ?

हनुमान्—आर्य सुनिये (पुनः नेपथ्य में "विश्रवा का पुत्र……" सुनाई पड़ता है)

राम—अरे लङ्केश्वर का अनुज !

हनुमान्—तात ! लङ्केश्वर का अनुज विभीषण शरण में आया है ।

राम—यह अत्यन्त प्रीतिकर है ।

सुग्रीव—रावण से निष्कासित यह विभीषण आपके स्नेह के लिये मित्रता की याचना करता सा प्रतीत होता है ।

हनुमान्—अतएव आर्य ने, विभिन्न संस्कृतियों के सागरों पर सेतु निर्मित कर दिया । आज वनवास का परिश्रम सफल हो गया क्योंकि—

भिन्न मार्गों पर चलने वाले आर्य, वानर और राक्षसों के सर्वधर्म समन्वय में आप सेतु बन गए हैं ।।४।।

सुग्रीवः—अनेन विभीषणागमनेन सिद्धमस्माकं महत् कूटकार्यम्। यतो रहस्यमयीयं लङ्का विगतावगुण्ठना भविष्यति।

जाम्बवान्—महोदय! न केवलमेतदेव अन्यदपि। यतः—

छिन्नबाहुरभूदेष रावणो भ्रातृवञ्चितः।
भविता रामबाणस्य प्रचण्डज्वलेन हविः ॥५॥

सुग्रीवः—तथ्यमुक्तं जाम्बवता। राघवेन्द्र! यतो हि—

लङ्केशमुत्सृज्य यदा स्वबन्धुं,
विभीषणस्त्वामिह संप्रयातः।
सद्धर्मनीतिप्रतिभा-विवेकाः,
सर्वे तदा रावणमुत्ससृजुः ॥६॥

हनुमान्—नाथ! एतदपि ज्ञातव्यम् यद् विभीषणागमनेन सिद्धं नोऽभीप्सितम्। राघवेन्द्रस्य संस्कृतिसमन्वययज्ञस्येयं पूर्णाहुतिः। यतः—

धर्मसमन्वयमार्गे विहितः सेतुर्विभीषणेनाद्य।
यद् रक्षःकुलकेतुः प्राप्तो नः प्रीतये ह्येषः ॥७॥

लक्ष्मणः—तात! बहुविघ्नोऽयं लङ्कासमरोपक्रमः। तदत्र कूटचक्षुषापि प्रेक्षणीयं विभीषणाभिगमनम्। कदाचिद् रावणस्य द्वितीयमेतच्छलाभियानं स्यात्।

सुग्रीव—इस विभीषण के आ जाने से हमारा महान कूट कार्य सिद्ध हो गया, क्योंकि रहस्यमयी इस लङ्का का घूंघट खुल जायेगा।

जाम्बवान्—महोदय! केवल यही नहीं, अन्य भी, क्योंकि

भाई से वञ्चित यह रावण बाहुविहीन हो गया है, यह रामबाण की प्रचण्ड आग में हवि हो जायेगा ॥५॥

सुग्रीव—राघवेन्द्र! जाम्बवान सच कह रहे हैं। क्योंकि अपने बंधु लङ्केश को छोड़कर विभीषण जब आपके पास यहाँ आ गया तभी सद्धर्म नीति, प्रतिभा और विवेक इन सभी ने रावण का परित्याग कर दिया ॥६॥

हनुमान्—नाथ! यह भी जानना चाहिए, कि विभीषण के आने से हमारा अभीष्ट सिद्ध होगया। राघवेन्द्र के संस्कृति समन्वय यज्ञ की यह पूर्णाहुति है। क्योंकि—

धर्म-समन्वय मार्ग में विभीषण ने आज सेतु निर्मित कर दिया, जो यह राक्षसों के कुलकेतु हम लोगों के हित के लिए यहां आ गए ॥७॥

लक्ष्मण—तात! लङ्का समर की तैयारी बड़ी विघ्नमय है। अतः यहां विभीषण के आगमन को कूट दृष्टि से भी देखना चाहिए। कहीं रावण का यह दूसरा छल का अभियान हो?

रामः—वत्स ! कदाचिद् मारीच-प्रपञ्चाद् विक्षुब्धोऽसि परं विभीषणप्रसंगे हनुमताहं पूर्वमेव प्रबोधितोऽस्मि । तथापि सैन्य-शिविरेषु सर्वत्र सतर्कदृष्टेः प्राधान्यं वर्तते ।

सुग्रीवः—सर्वत्र प्रवेशमार्गेषु प्रहरिभि र्नवागन्तुकानां कठोर-परिवीक्षण-व्यवस्था विहिता वर्तते । तदत्र रावणस्य प्रपञ्च-प्रवेशोऽत्र कथमपि न सम्भाव्यते ।

रामः—लक्ष्मण ! अलक्षितोऽप्येष रक्षसामुत्तराधिकारीव लक्ष्यते । यतः समन्विता अपि नाम सर्वा संस्कृतयः पल्लविता भवन्तु तदर्थमेव रामस्याभियानम् । यथा वानरसंस्कृतेः सुग्रीव स्तथासौ विभीषणो रक्षःसंस्कृते संरक्षकः सम्भाव्यते । तदानयन्तु नाम सादरं लङ्केश्वरानुजम् ।

(हनुमदाङ्गदौ निष्क्रम्य विभीषणेन सह प्रविशतः)

विभीषणः—जयन्तु नाम कौशलेन्द्रमहोदयाः—

लङ्केशस्य त्रिभुवनजयोद्गीतकीर्तेः सुरारे—
र्भ्राता सीताहरणजनितक्लेश-विक्षोभितोऽहम् ।
त्यक्त्वा बन्धुं मधुरवचनैश्चाटुकारैरुपेतं,
प्राप्तः प्रीत्या शरणसुखदं त्वामुदारं नतोऽस्मि ॥८॥

राम—वत्स ! शायद मारीच के प्रपञ्च से विक्षुब्ध हो परन्तु विभीषण के सम्बन्ध में हनुमान मुझे प्रथम ही वता चुके है । तर्थापि सैन्य शिविरों में सर्वत्र सतर्क दृष्टि की प्रधानता है ।

सुग्रीव—सर्वत्र प्रवेश मार्गो पर प्रहरियों द्वारा नवागन्तुकों की कठोर जांच की व्यवस्था की गई है । अतः यहां रावण के प्रपञ्च प्रवेश की कोई भी सम्भावना नही है ।

राम—लक्ष्मण ! अलाक्षित भी यह राक्षसो का उत्तराधिकारी सा प्रतीत होता है । क्योंकि समन्वित होती हुई भी सभी संस्कृतियां पल्लवित हों, इसलिये ही राम का अभियान है । जैसे वानर संस्कृति के संरक्षक सुग्रीव है, उसी प्रकार विभीषण रक्षसंस्कृति के संरक्षक प्रतीत होते है । इसलिये रावण के अनुज को आदर के साथ ले आइए ।

(हनुमान् और अंगद बाहर जाकर विभीषण के साथ प्रवेश करते है)

विभीषण—कौशलेन्द्र महोदय की जय हो ।

त्रिभुवन की जय से विख्यात-कीर्ति वाले रावण का भ्राता सीता-हरण से उत्पन्न कलेश से विक्षोभित, मैं मधुर वचन वाले चाटुकारों से घिरे हुये भाई को छोड़कर शरणसुखदाता उदार आपके पास प्रेम से आया हूँ और नमस्कार करता हूँ ॥८॥

रामः—(सहसा समुत्थाय) अहो ! लङ्केश्वरानुजो विभीषणः प्राप्तः । स्वागतं ते रामशिविरे ।

विभीषणः—कृतार्थोऽस्मि यदार्येण सीताहरणापराधिनो भ्राता शरणे स्वीकृतः ।

रामः—कथं नाम भ्रातरं, रावणमपि स्वीकर्तुं रामस्य हृदयं सदैवोत्सुकं वर्तते । यतः—

परित्यक्ताऽयोध्या विपिनमधिवासो जनहिते,
निषादैः कोलै र्वा शबरवनभिल्लैः सह कृतः ।
विधायेमानृक्षान् परमसुहृदो वानरगणा—
निहाप्यार्यो रामोऽभिलषति हितं स्नेहमपि वः ॥९॥

विभीषणः—परमार्य ! रक्षसामुद्धारकोऽपि लङ्केश्वरोऽधुना विनाशबुद्धिमाधाय युद्धाय सन्नद्धो वर्तते । तत् कथमार्येण तेषां हितं विधीयते ।

रामः—विभीषण ! युद्धाद् भीतिः क्षत्रियस्य कृते ! कथमेतत् सम्भाव्यते । केवलं जनविनाशं, विचार्यैव चिन्तितोऽस्मि । यतः—

राम—(सहसा उठकर) अरे ! लङ्केश्वर के अनुज विभीषण आये हैं । तुम्हारा राम के शिविर में स्वागय है ।

विभीषण—मैं कृतार्थ हूँ, जो आर्य ने सीता हरण के अपराधी के भाई को शरण में स्वीकार कर लिया ।

राम—भाई ही क्यों राम के हृदय में रावण को भी स्वीकार करने की उत्सुकता है । क्योंकि

जनहित में अयोध्या त्याग दी, निषाद, कोल, शवर, वनभिल्लो के साथ वन में निवास किया । इन वृक्ष और वानरगणो को परम मित्र बनाकर यह आर्य राम यहां पर भी आप लोगों का हित और स्नेह चाहता है ॥९॥

विभीषण—परन्तु आर्यवर । राक्षसों का उद्धारक होते हुये भी लङ्केश्वर इस समय विनाश बुद्धि को धारण कर युद्ध के लिये तैयार बैठा है । तब आर्य कैसे उनका हित कर पायेंगे ।

राम—विभीषण ! युद्ध से भय-क्षत्रिय के लिये, यह कैसे सम्भव है ? केवल जनविनाश का ही विचार करके चिन्तित हूँ । क्योंकि—

सर्वधर्मसमृद्ध्यर्थं रामः प्रव्रजितो वने ।
तेन चेद्विधस्यते रक्षो नातिप्रियकरं मम ॥१०॥

विभीषणः—मया बहुशः प्रबोधितो लङ्केश्वर। परमैश्वर्यबल-प्रमत्तेन तेन सीतानिवर्तनं न स्वीकृतम् ।

रामः—अहो ! सीता (किञ्चिद् विषादं निरुपयन्) ।

युगसंधान-सन्नद्धाः पुरुषा लोकरक्षणे ।
कियन्नाम विपद्यन्ते दुष्टप्रकृतिभि र्जनैः ॥११॥

तपस्विपरिवेशस्य शान्तेऽपि हृदये मम ।
सीतापहरणं शूलं निखातं तेन रक्षसा ॥१२॥

विभीषणः—(स्वगतम्) अहो व्यथितोऽयं महोदयः सीतासम्बोधनेन । (प्रकटम्) आर्य ! सीता सम्यक् संरक्षणे संनिहिता मनोविनोदिता च त्रिजटया भवदागमनं प्रतीक्षते ।

रामः—सीता मदागमनं प्रतीक्षते । (आकाशमुद्वीक्षमाणः) अहो ! धैर्यं, मयि स्नेहं च देव्याः ।

राम सभी धर्मों की समृद्धि के लिये ही वन में आया है, यदि उससे राक्षसों का वध होता है तो मेरे लिये बहुत प्रीतिकर नहीं होगा ॥१०॥

विभीषण—मैंने लङ्केश्वर को बहुत समझाया परंतु ऐश्वर्य के बल से पागल उसने सीता की वापसी नहीं स्वीकार की ।

राम—अहो सीता ! (कुछ खिन्न होकर)—

युग-संधान और लोक-रक्षा में लगे हुये पुरुषों को दुष्ट प्रकृति वाले लोग, कितना सताते है ? ॥११॥

तपस्वी के परिवेश वाले शांत हृदय में भी उस राक्षस ने सीता हरण रूप शूल ठोक दिया ॥१२॥

विभीषण—(मन में) अरे यह महोदय तो सीता के सम्बोधन से व्यथित हो गये (प्रकट) आर्य ! सीता जी भली प्रकार संरक्षण में स्थित-त्रिजटा से मनोविनोदित होती हुई आपके आगमन की प्रतीक्षा कर रही हैं ।

राम—'सीता मेरे आगमन की प्रतीक्षा करती हैं' (आकाश की ओर देखते हुये) अहो देवी का धैर्य और मेरे प्रति स्नेह !

वनेऽप्यलं हिंसकजन्तुराक्षसा-
कुलेऽसहायां प्रविहाय यामसौ।
गतोऽपि तं निष्ठुरमेनमीदृशं,
स्मरस्यहो वै महनीयता तव ॥१३॥

सुग्रीवः—आर्य ! नैतत्परितापसमयः । सकल-वानरर्क्षवाहिनी लङ्कामतिक्रान्तुं व्याकुला वर्तते। तात ! सीताप्रतीक्षावेला समाप्तप्राया।

हनुमान्—राघवेन्द्र ! यदीदृशं, तदा पुनरादेशयतु नाम दासम्। यतः—

उल्लङ्घ्याब्धिं भुवनजयिनो राजधानीमवाप्य,
दृष्टा सीता बलमपि रिपोरक्षमाजौ निहत्य।
दग्धा लङ्का दशमुखयशः-कज्जलीकृत्य येन,
सोऽयं देवीं प्रभवति समानेतुमेको हनुमान् ॥१४॥

विभीषणः—आर्य ! सर्वं समयेन सम्पद्यते। अतः धैर्यमालम्ब्यताम्। लङ्काभियाने रणनीति विचारणीया यतो हनुमतोन्मथितापीयं सर्वथा दुर्लङ्घ्या प्राकृतैः, मायामन्त्रबलप्रभाविता न केवल शूरैर्मायाविराक्षसैरुप-चिताऽमरजयिना दशकण्ठेनाधिष्ठिता रहस्यमयीयं लङ्का सर्वथा दुर्भेद्या वर्तते।

हिंसक जीव और राक्षसों से भरे वन मे जिसको यह असहाय छोड़कर चला गया था, इस दशा को प्राप्त, इस निष्ठुर को स्मरण करती हो। निश्चय ही यह तुम्हारी महनीयता है ॥१३॥

सुग्रीव—आर्य ! यह परिताप का समय नही है। समस्त वानर और ऋक्षों की सेना लङ्का पर आक्रमण के लिए व्याकुल है। तात ! सीता की प्रतीक्षा वेला अब समाप्तप्राय है।

हनुमान्—राघवेन्द्र ! यदि ऐसा है, तो पुनः दास को आज्ञा दें क्योंकि —

जिसने समुद्र को लांघकर भुवनजयी रावण की राजधानी में पहुचकर सीता को देखा है और युद्ध में अक्षकुमार को मारकर शत्रु के बल को भी देखा है, रावण के यश को कालिख बनाकर जिसने लङ्का जला दी वही यह अकेला हनुमान् सीता को लाने की शक्ति रखता हैं। ॥१४॥

विभीषण—आर्य ! सब समय से होता है। अतः धैर्य रखें। लङ्का अभियान मे रणनीति विचारनी है क्योंकि हनुमान द्वारा मथी गयी भी यह लङ्का प्राकृतजनों द्वारा सर्वथा दुर्लंघ्य हैं माया मन्त्रबल से प्रभावित न केवल वीरों से मायावी राक्षसों से भरी हुई, देवजयी दशकण्ठ से अधिष्ठित यह रहस्यमयी लङ्का सर्वथा दुर्भेद्य है।

रामः—यथा रोचते भवद्भ्यः। परं मन्ये सीता मे शक्तिस्रोतस्विनी तत्स्मरण यथा मे हृदयं विषादमुपनयति तथैव तन्मुक्तिसंकल्पदृढतामुत्प्रेरयति। यतः—

रामोऽसौ पुरुषः सीता प्रकृतिर्विश्वसाधिका।
मदन्तःप्रेरणाशक्तिः सर्वतो लोकरञ्जने ॥१५॥

विभीषणः—इयमेव संकल्पशक्तिर्जीवनस्य रहस्यम्। विज्ञा एव जानन्ति।

रामः—तात विभीषण ! राक्षसानां कृते, न मद्हृदये वैरभावना। भिन्नसंस्कृतिर्भिन्नधर्मोऽयं लोकः। परं तद्व्यवस्था मानवतामुत्पीडयेत्, विधर्मिता वैरकारणं भवेत्। किमेतद् धर्मलक्षणम् ? किमेषा संस्कृतिपरिभाषा ?

विभीषणः—आम् ! जानामि, रावणेन रक्षः-संस्कृतिमादायार्यसंस्कृति-विच्छेदनाय महत्प्रयासो विहितः।

रामः—न केवलं रावणेनैवास्माकं पूर्वजैरपि देशे समृद्धाऽनार्यसंस्कृतिः पददलिता ध्वस्ताश्च तस्याः समुन्नतेः पन्थानः। परमुत्तरवर्तिभिरार्यैः संस्कृतिसमन्वयः स्वीकृतः।

राम—जैसा आप लोगों को ठीक लगे, परन्तु लगता है सीता मेरी शक्ति का प्रवाह है, उसका स्मरण जैसे मेरे हृदय को विषाद देता है, वैसे ही उसकी मुक्ति के संकल्प को भी दृढ़ करता है। क्योंकि—

राम पुरुष है, सीता विश्व साधिका प्रकृति है वह सर्वत्र लोक रञ्जन में मेरी अन्तः प्रेरणा शक्ति है ॥१५॥

विभीषण—यही संकल्प शक्ति जीवन का रहस्य है इसे विज्ञ ही जानते हैं।

राम—तात विभीषण ! राक्षसों के लिए मेरे हृदय मे कोई वैर भावना नही है। यह संसार भिन्न धर्म भिन्न संस्कृति वाला है। परन्तु उस धर्म की व्यवस्था मानवता को उत्पीड़ित करे, विधर्मिता वैर का कारण बने क्या यह धर्म का लक्षण है ? क्या संस्कृति की परिभाषा हैं ?

विभीषण—जानता हूँ, रावण ने रक्ष संस्कृति के नाम पर आर्य–संस्कृति के विनाश के लिए महान प्रयास किया।

राम—न केवल रावणने ही, हमारे पूर्वजो ने भी देश मे समृद्ध अनार्य संस्कृति को पद्दलित किया और उसकी उन्नति के मार्ग ध्वस्त कर दिये। परन्तु उत्तरवर्ती आर्यो ने संस्कृति का समन्वय स्वीकार किया।

विभीषणः—अद्यतनं त्वार्यसंस्कृतेः स्वरुपं समन्वितमेव तदेव संगतमपीति ।

रामः—रामस्तु मानवतारक्षकः सर्वेषां भद्रसाधकः।

लक्ष्मणः—परं लङ्केश्वरस्य चरमोद्देश्यं विश्वविजयः धर्मध्वंसनम्। अपहरणं लुण्ठनं, मानवताया दास्ये परावर्तनम्। तत् कथमार्य ! मदमानसमुद्धतेनैतदुपयुज्यते । तत्कृते सदुपदेशो हस्तिस्नानमभूत् ।

रामः—तत्कृते तापसोऽप्यसौ रामो वनेऽपि धनुर्धरः। मानवतारक्षणमस्मत् परमो धर्मः। तथाप्यस्य निदानं न केवलं युद्धम्। यतः—

उपायसाध्यं क्रियते मनस्विभिः,
समाज - संरक्षणमात्मदर्शिभिः ।
यतो न लोकोऽनुभवेद् विभीषकां,
करालयुद्धज्वलनस्य नाशिनः ॥१६॥

विभीषण—लङ्केश्वरेण समस्ताः शान्तिपथा बाधिताः। केवलं युद्धमेव शरणम्।

रामः—आगतोऽसि विभोषण ! मे पथप्रदर्शकस्तद् ब्रूहि किमत्र क्रियते ?

विभीषण—अब तो आर्य संस्कृति का स्वरुप समन्वित है वही उचित है।

राम—राम तो मानवता का एक रक्षक और सबका कल्याणकर्ता है।

लक्ष्मण—परन्तु लंङ्केश्वर का चरम उद्देश्य विश्व विजय, धर्म ध्वंसन अपहरण, लूटना और मानवता को दास वनाना है। तो, कैसे आर्य ! मदमानसमुद्धत के साथ यह उपयुक्त हैं उसे दिया सदुपदेश हाथी का स्नान हो गया।

राम—उसके लिए यह तपस्वी राम वन में भी धनुर्धर है मानवता की रक्षा करना हमारा परम धर्म है, फिर भी इसका निदान केवल युद्ध ही नही है, क्योंकि—

आत्म-दर्शी मनस्वी पुरुष, उपाय साध्य, समाज-संरक्षण करते है, जिससे संसार विनाशकारी, कराल युद्धाग्नि की विभीषिका का अनुभव न करें ॥१६॥

विभीपण—लङ्केश्वर ने समस्त शान्ति के मार्ग वन्द करा दिए है, केवल युद्ध ही शरण है।

राम—विभीपण अब मेरे मार्ग-दर्शक वनकर आए हो तो वताओ यहाँ क्या किया जाए ?

विभीषणः—विशालवानरवाहिनीमुत्तर्तुं वारिधिबन्धन-व्यवस्था विधीयतामार्येण। रावणो नान्यथा संधीयते।

सुग्रीवः—यथादिष्टं पूर्वमेव नलनीलादिभि सेंतुवैज्ञानिकैः सेतुबन्धमस्य सर्वेक्षण विधीयते।

रामः—उचितमेवैतत् ततोऽस्माभिरपि तत्रैव गत्वा समुचितं साहाय्यं विधेयम्। यतः—

पूर्वजं निर्मितोऽसौ मे सागरः सगरात्मजैः।
साहाय्यं भविताऽस्माक लङ्कावर्त्म-निदर्शने ॥१७॥

(इति विभीषणेन सुग्रीवेण च सह निष्क्रान्तः।)

(नेपथ्ये कोलाहलः)

निगृहीतौ निगृहीतौ क्व रे! पलायिष्यतः। अग्रतो भूत्वा मार्गमवरोधयन्तु रे प्रहरिणः।

(ततः प्रविशतो वानरैर्निगृहीतौ वानरवेशौ शुकसारणराक्षसौ)

एकः—जयतु रामानुजः। निगृहीतावेतौ रावणस्य गुप्तचरौ। सैन्यपरिवेक्षणेरतौ शुकसारणनामधेयौ।

अपरः—अयं शुकः सैन्य व्यूहव्यवस्था-परिवेक्षणे नियुक्त आसीत्।

विभीषण—आर्य, द्वारा विशाल वानर वाहिनी को पार करने के लिए समुद्र बन्धन की व्यवस्था की जानी चाहिए। रावण से अन्यथा सन्धि सम्भव नहीं है।

सुग्रीव—जैसा पूर्व ही आदेश दिया गया है नल नीलादिक मेरे वैज्ञानिक सेतु बन्धन का सर्वेक्षण कर रहे है।

राम—उचित ही है, तो हम लोग भी वहीं चलकर समुचित सहायता प्रदान करें क्योंकि— हमारे पूर्वज, सगर पुत्रों द्वारा निर्मित यह सागर, लङ्का मार्ग दिखाने में सहायक होगा ॥१६॥

(विभीषण और सुग्रीव के साथ बहिर्गमन)

(नेपथ्य में कोलाहल)

पकड़ लिया, पकड़ लिया कहां रे भागोगे, प्रहरियों आगे बढ़कर मार्ग रोक लो।

(तभी वानरों से निगृहीत वानरवेश में शुक, सारण का प्रवेश)

एक—रामानुज की जय हो यह दो रावण के गुप्तचर बन्दी कर लिए है। यह दोनों शुक और सारण नाम वाले सैन्य परिवेक्षण में लगे थे।

अन्य—यह शुक, सैन्य व्यूह व्यवस्था परिवेक्षण मे नियुक्त था। और यह

अपरश्चायं सारणः सेतुनिर्माणव्यवस्था-विनाशे नियुक्तो विस्फोटकैः सह निगृहीतः।

लक्ष्मणः—(सक्रोधम्) किमिति रे राक्षसाधमौ समुद्रोल्लंघनश्रमेण श्रान्तिं भजतः। कतिपयदिवसैरेव वयं लङ्कामापतिताः पर्यवेक्षणे सुकरा भविष्यामः।

शुकः कोशलेन्द्र! क्षम्यतां मेऽपराधः। रावणादेशेन वयं परवशाः।

सारणः—नाथ! क एष रावणादेश-विरोधे स्थातुं समर्थः। रावणराज्ये वयं सनाथा अप्यनाथा एव।

लक्ष्मणः—(प्रहरिणः प्रति) मुञ्चन्तु नामैतौ राक्षसापसदौ।

शुकसारणौ—जयन्तु नामार्यकोशलेन्द्र-महोदयाः।

लक्ष्मणः—कौशलेन्द्र-शक्ति-साधनं वर्णयन्तौ युवां मे संदेशं वदेतां लङ्केश्वरम्। तद् यथा—

कृत्वा कोदण्डभङ्गं जनकपुरमखे जानकीं यः प्रपेदे,
ह्येकाकी तापसोऽपि प्रबलखरबलं दण्डके यो जघान।
हन्यादुल्लंघ्य सिन्धुं तनयमपि दहेत् त्वत्पुरीं यस्य दासः,
तन्मैत्री न प्रिया चेत् त्वमसि दशमुख! प्रीतिपात्रं यमस्य ॥१८॥

दूसरा सेतु निर्माण व्यवस्था के विनाश में नियुक्त विस्फोटकों के साथ पकड़ा गया है।

लक्ष्मण—(क्रोध के साथ) क्यों रे राक्षसाधमों! समुद्र उल्लंघन का परिश्रम करते हो, कुछ ही दिनों में हम लङ्का में आ पड़ेंगे, तो पर्यवेक्षण में सरल हो जाएंगे

शुक—कौशलेन्द्र! मेरे अपराध को क्षमा कर दें रावण के आदेश से हम परवश हैं।

सारण—नाथ! कौन रावण के आदेश के विरोध में ठहर सकता है? रावण के राज्य में हम सनाथ भी अनाथ ही हैं।

लक्ष्मण— (प्रहारियों से) इन नीच राक्षसों को छोड़ दो।

शुक,सारण—आर्य कौशलेन्द्र महोदय की जय हो।

लक्ष्मण—कौशलेन्द्र की शक्ति और साधन का वर्णन करते हुये तुम दोनों लङ्केश्वर से मेरा संदेश कह देना, वह इस प्रकार—

जनकपुर के यज्ञ में धनुष तोड़कर जिसने जनकपुत्री को प्राप्त कर लिया, दण्डक वन में अकेले जिस तपस्वी ने प्रबल खर की शक्ति का नाश कर दिया, जिसके सेवक ने समुद्र लाँघकर तुम्हारे पुत्र को मार डाला और तुम्हारी नगरी जला दी, उसकी मित्रता यदि नहीं प्रिय है तो हे दशमुख! तुम यमराज के प्रीतिपात्र हो गए हो ॥१८॥

चरानितः प्रेष्य किमित्थमुग्रो,
ज्ञाता मदान्धो भुवि रामशक्तिम्।
कोदण्डमुक्ता हृदयं प्रविश्य,
स्वयं वदिष्यन्ति शिताः शराग्राः ।।१९।।

शुकः यथाज्ञापयति महाभागः।

(इति प्रणमन्तौ निष्क्रान्तौ)

हनुमान्—(सहसा प्रविश्य) आर्य लक्ष्मण ! तत्रभवतार्यमहोदयेन राघवेन्द्रेण संसूचितं यत् सागरोपरि सेतु-निर्माणव्यवस्थां संनिहिता। तद् गत्वा तत्रैव सर्वैः प्रशस्तबेलायामस्यां गणेशपूजनावसरे पुलिनपार्श्वे समवेतै भाव्यम्।

लक्ष्मणः—शोभनमेतत् संसूचितम्। तद्वयं सर्वे गत्वा गणेशमावाह्याम:। महदेतज्जातम्—

न केवलं वानरराक्षसानां,
रामेण सेतु विहितः स्वधर्मे।
स कर्मयोगेन बबन्धसेतुं,
महोदधौ मानवता-हिताय ।।२०।।

(इति निष्क्रान्ताः सर्वे)

समाप्तोऽयं नवमोऽङ्कः

अरे मदान्ध ! इधर गुप्तचरों को भेजकर इस प्रकार तू, पृथ्वी पर राम की शक्ति को नही जान सकेगा। कोदण्ड से मुक्त पैने बाणों की नोके हृदय मे प्रवेश करके स्वय बताएगी ।।१९।।

शुक—महाभाग की जो आज्ञा।

(प्रणाम करते हुये जाते हैं)

हनुमान— (सहसा प्रवेश करके) आर्य लक्ष्मण ! श्रीमान आर्य राघवेन्द्र ने सूचित किया है कि सागर पर सेतु निर्माण की व्यवस्था समीपस्थ है अत. वही जाकर इस प्रशस्त वेला में गणेश पूजन के अवसर पर तट के समीप सबको एकत्र होना है।

लक्ष्मण—शुभ समाचार दिया है। तो हम सब चलकर गणेश का आवाहन करें। यह महान कार्य हो गया।

राम ने केवल वानर और राक्षसों के ही अपने अपने धर्म के मध्य सेतु निर्माण नही किया, उन्होंने कर्मयोग से मानवता के हित में महासागर पर सेतु बांध दिया। ।।२०।।

(सब जाते है)

नवम अङ्क समाप्त

॥ ॐ ॥

दशमोऽङ्कः

(ततः प्रविशति अशोकतरुतले विषण्ण वदना सीता)

सीता—अहो ! कथमपि व्यतीतेयं मे काल रात्रिः—

आच्छाद्य या त्रिभुवनं सहसा समन्ताद्,
ध्वान्तेन मोदमकरोन्ननु निश्चराणाम्।
कोकान् वियोज्य नलिनीं मलिनी विधाय,
सा तामसी व्यतिगता विषमा तमिस्रा ॥१॥

समुदितोऽसौ भगवानादित्यः। अनवरत जागरणाकुलेऽपि मे चक्षुषी लोकप्रकाशकानिमानमृतकरान् पातुमुत्सुके। अहो कुलदेवते ! कलङ्कितेयं कुलप्रतिष्ठानया जानक्या। वंशबीजस्यापि ते जीवनमत्र रावणेन सह संग्रामसंघर्षे विपद्गतम्। त्वमेव रक्षकोऽसि, त्वमेव साक्षी विवस्वानस्माकं विपत्सागरस्य नियन्ता। प्रणमतीयं वन्दिनी ते वधूः।

(उत्थाय परितो विलोक्य) श्रूयते पुनः कोलाहलः। मन्ये पुनः प्रवृत्तं युद्धम्। तदत्र सकलेऽपि निहते रक्षःकुले दशकण्ठसम्मुखे स्थितं रामं

(अशोक वृक्ष के नीचे खिन्नमुखी सीता का प्रवेश)

सीता—अहो ! किसी प्रकार मेरी यह काल रात्रि बीत गयी। जिसने सहसा चारो ओर से अंधकार के द्वारा त्रिभुवन को अच्छादित करके, चक्रवाकों को वियुक्त करके और कमलिनी को मलिनकर, निशाचरों को निश्चय ही आनन्दित किया था, वह विषम तामसी रात्रि बीत गई ॥१॥

भगवान सूर्य उदित हो गए। अनवरत जागरण से व्याकुल भी मेरे नेत्र लोक प्रकाशक इन अमृत किरणों को पीने के लिए उत्सुक है। अहो कुलदेवता ! इस जानकी ने कुल की प्रतिष्ठा को कलङ्कित कर दिया तुम्हारे वंशवीज का भी जीवन, यहां रावण के साथ संग्राम-संघर्ष में विपत्तिग्रस्त है। तुम्ही रक्षक हो, तुम ही साथी हो, विवस्वान ! हमारी विपत्ति सागर के नियन्त्रक ! यह वन्दिनी तुम्हारी वधू प्रणाम करती है।

(उठकर, चारों ओर देखकर) पुनः कोलाहल सुनाई देता है। लगता है पुनः युद्ध प्रारम्भ हो गया। यहां समस्त राक्षसकुल के नष्ट हो जाने पर भी दशकण्ठ

विज्ञाय कम्पते मे हृदयम् । अघटितघटना पटीयसीयं नियतिः किं विधास्यति कोऽपि न जानाति । मातर् ! बसुन्धरे ! त्वमेव मे शरणम् । अहो ! मे रक्षणे नियुक्ता कापि राक्षसी नात्र विद्यते ।

(प्रविश्य)

त्रिजटा—सीते ! अरुणे साश्रुणी ते लोचने । किमद्याप्यनिमीलित-लोचनैव रात्रि व्यंतीता ?

सीता—त्रिजटे ! किं करोमि दर्शन-परवशे इमे लोचने ।
प्रतीक्षा-निरते नित्यं स्वामिनो दर्शनाकुले ।
सहेते न क्षणं पक्ष्मपातं मे लोचने इमे ।।२।।

त्रिजटा—जानामि त्वत् परिभवपीडां स्नेह प्रगाढ़तां अधुना सर्वमेव समाप्तम् । विगता एव ते प्रतीक्षाक्षणाः । अन्तिममेव जानीहि रामरावणयो युद्धम् ।

सीता—त्रिजटे ! सीतेयं कथं विनाश-साक्षिणी भूयते । आर्यपुत्र-स्नेहकातरेयं तु केवल तत्सानिध्यं समीहते कांक्षते च सर्वेषां कल्याणम् ।

रक्षांसि वै विगतवैरभयाश्चरन्तु,
जीवन्तु कर्मणि रता मनुजा धरायाम् ।

के सम्मुख स्थित राम को जानकर मेरा हृदय काँप जाता है। यह नियति अघटित घटना में पटु हैं, क्या करेगी कोई नही जानता । माता ! बसुधंरा ! तुम्ही मेरी शरण हो । अरे ! मेरी रक्षा में कोई राक्षसी यहाँ उपस्थित नहीं है ।

(प्रवेश करके)

त्रिजटा—सीता ! तुम्हारी आसुओं से भरी आंखे लाल हो रही है। क्या आज भी बिना पलके झपके रात बीत गई ?

सीता—त्रिजटा ! क्या करूँ यह नेत्र दर्शन परवश है ।

स्वामी के दर्शन के लिए व्याकुल, नित्य प्रतीक्षा में निरत, यह मेरे लोचन, क्षणभर के लिए भी पलकों का गिरना सहन नहीं करते है ।।२।।

त्रिजटा—तुम्हारी परिभव पीडा और स्नेह प्रगाढता को जानती हूँ। अब सब कुछ समाप्त हैं। तुम्हारे प्रतीक्षा के क्षण बीत गऐ है । राम रावण के युद्ध को अन्तिम ही समझो ।

सीता—त्रिजटा ! यह सीता कैसे विनाश की साक्षणी हो। आर्यपुत्र के स्नेह में व्याकुल यह तो केवल उनका सामीप्य और सबका कल्याण चहाती है ।

निश्चय ही राक्षस शत्रुता और भय से मुक्त होकर विचरें, कर्म में लगे

सीता समग्रजन - मङ्गलमहीमाना ,
रामस्य भर्तुरियमिच्छति मङ्गलानि ।।३।।

त्रिजटा—सौभाग्यवति ! सर्वथा कल्याणं ते भर्तुः । हिंसकाणां विनाशस्त्वपरिहार्य एव । सर्वे प्रमुखराक्षसा रणे निहता एकाकी रावणोऽसौ युद्धस्य पूर्णाहुतिरेव ।

निराशः कुम्भकर्णस्य वधादिन्द्रजितस्तथा ।
जीवनस्यान्तिमे युद्धेऽवतीर्णोऽयं दशाननः ।।४।।

सीता—इत्येव मे चिन्ता-विषयः । यतः—

विजितसकलसुरलोकः, प्रवलः कूटक्रिया-कलापज्ञः ।
दशकण्ठो यदि युध्येत् सहसा मे शंकते हृदयम् ।।५।।

त्रिजटे ! आर्यपुत्रस्य पराक्रमेणाश्वस्तापि व्याकुली भवामि ।

त्रिजटा--सीते ! प्रियं प्रति तवेयं प्रगाढ़स्नेहकातरता पदे-पदे त्वां चिन्ताकुलीकरोति । लङ्काधुना वीरशून्या, छिन्नं रावणस्य शासनतन्त्रम् । त्वमपि बन्धान्मुक्ता । पश्य क्वापि दृश्यन्ते वाटिका-रक्षिणः ? इदानीमियं लङ्का—

मनुष्य पृथ्वी पर जीवित रहें । समस्त लोगों के मङ्गल की कामना करने वाली यह सीता अपने पति राम का मङ्गल चाहती है ।।३।।

त्रिजटा—सौभाग्यवती ! तुम्हारे पति का सर्वथा कल्याण है । हिंसकों का विनाश तो अपरिहार्य ही है । सभी प्रमुख राक्षस युद्ध में मारे गए अकेला यह रावण युद्ध की पूर्णाहुति ही है ।

कुम्भकर्ण और मेघनाद के वध से निराश यह दशानन जीवन के अन्तिम युद्ध में अवतीर्ण हुआ है ।।४।।

सीता—यही तो मेरी चिन्ता का विषय है । क्योंकि समस्त सुरलोक को जीतने वाला, कूटक्रियाकलाप का ज्ञाता, प्रवल दशकण्ठ यदि युद्ध करे तो मेरा हृदय सहसा शंकित हो जाता है ।।५।।

त्रिजटा ! आर्यपुत्र के पराक्रम से आश्वस्त भी व्याकुल हो जाती हूं

त्रिजटा—सीता ! तुम्हारी यह पति के प्रति प्रगाढ़ स्नेह-कातरता पदपद पर तुम्हे चिन्ता से व्याकुल कर देती है । लङ्का अव वीरों से शून्य हो गयी, रावण का शासन तन्त्र छिन्न हो गया, तुम भी बन्धन-मुक्त हो गयीं देखो कहीं भी वाटिका के रक्षक दिखाई देते हैं ? अव यह लङ्का—

धूमैः स्नातेयं चितावन्हिजातैः,
काकैः कङ्कैर्गृध्रगोमायुपूर्णा।
बालस्त्रीणां रोदनैरश्रुपातैः,
लङ्केदानीं शोकसिन्धौ विलीना ॥६॥

सीता—अहो ! मुक्ताहमिदानीम् । त्रिजटे ! आर्यपुत्र - दर्शनव्याकुले नयने तं द्रष्टुमुत्सुके । किमिदानीमेतच्छक्यते ?

त्रिजटा—इदानीं रणप्राङ्गणे गमनं नोचितं तथापि वाटिका-सौध-शृङ्गेण युद्धरतं पश्य राघवेन्द्रम् । तदायाहि मया सह ।

सीता—(सोत्सुका तया सह परिक्रम्य) कुतः स्वामिदर्शनं सम्भाव्यते ?

त्रिजटा—इत इतो देवि ! समायाहि । (परिक्रम्य) अधुनावां समुचितस्थाने समागते । तत्पश्य, दूरं त्वां युद्ध स्थलं दर्शयामि पश्य—(अंगुल्या निर्देशेन)

सैषा भूश्छिन्नमस्तः समरनिपतितो यत्र वै कुम्भकर्णः,

सीता—अहो ! भयङ्करता रणभूमेः ।

त्रिजटा—सीते ! दूरं तद् दुर्गमगिरिगह्वरं पश्यसि ?

चिता की अग्नि के धुएं से नहाई हुई काक, कङ्क, गिध्द और श्रृगालों से पूर्ण, बाल और स्त्रियों के रोदन और अश्रु पात से यह लङ्का अब शोक समुद्र में डूब गई है । ॥६॥

सीता—अरे ! अब मैं मुक्त हूं । त्रिजटा ! आर्यपुत्र के दर्शन के लिए व्याकुल नेत्र उन्हे देखने के लिए उत्सुक हैं । क्या इस समय यह हो सकता है ?

त्रिजटा—इस समय रण-प्रांगण में जाना उचित नही तथापि वाटिका सौध के शिखर से युद्धरत राघवेन्द्र को देख लो । तो आओ मेरे साथ ।

सीता— (उत्सुकता से उसके साथ चलकर) स्वामी के दर्शन कहां से सम्भव है ?

त्रिजटा—इधर इधर देवी जी ! आओ । (चलकर) अब हम दोनों उचित स्थान पर आ गए । देखो, वह दूर तुमको युद्धस्थल दिखा रही हूं । देखो—

(अंगुली के निर्देश से)

वह, वही भूमि है, जहां छिन्न मस्तक कुम्भकर्ण युद्ध में गिरा था,

सीता—अहो रणभूमि कितनी भयङ्कर है !

त्रिजटा—सीता ! दूर उस पर्वत कन्दरा को देख रही हो ?

तत्रैवं लक्ष्मणेनाप्यतुलबलचयो मेघनादो हतोऽसौ ।

सीता—आः ! हनुमद्बन्धनकारी हतोऽसाविन्द्रशत्रुः ? अहो ! विधे वैपरीत्यम्—

येषां भृकुटि-वक्रत्वं कम्पयेज्जगतीतलम् ।
श्रृगालैः क्रियते तेषां शरीरस्याद्य दुर्गतिः ॥७॥

त्रिजटा—सीते ! पश्य चिताधूमघनाडम्बरं तत्र दूरम्—

अन्ये चापि प्रहस्त-प्रमुख-रणविदो राक्षसा रामबाणै-
र्विद्धाः स्वर्गं प्रयाता ज्वलन-परिगतैस्तच्चिताधूमयानैः ॥८॥

सीता—(सविषादम्) महत्करुणं वर्तते । रक्षः-कुलविनाशमाकर्ण्यापि मे हृदयं भिद्यते । किमिदं सर्वं मत्कारणादेव ?

त्रिजटा—सर्वमेतद् विधे विलसितम् । पश्य देवि ! लङ्काद्वारम्—

दूराद्घर्घर-भूरिभैरवरवव्याप्तं बृहत्स्यन्दन—
मारुह्य स्वयमागतो रणमुखे लङ्केश्वरो रावणः ।

सीता—तदनुगामिनीं विकटरक्षोवाहिनीमपि पश्यामि । सर्वथा शं विदध्याद् भूतेश्वरः स्वामिनः शरीरस्य ।

त्रिजटा—पश्यार्ये ! अपरतः—

वहाँ, इसी प्रकार लक्ष्मण ने अतुलबलशाली उस मेघनाद को भी मार डाला ।

सीता—अरे ! हनुमान को बांधने वाला इन्द्रशत्रु मर गया ?

विधि की विपरीतता कैसी होती है ? जिनकी भृकुटि की वक्रता धरती को कपां देती थीं, उनके शरीर की आज श्रृंगाल दुर्गति कर रहे हैं ॥७॥

त्रिजटा—सीता ! वहां दूर पर चिता का घना धुआ देखो—

और अन्य प्रहस्त जैसे प्रमुख युद्ध विशारद राक्षस भी राम के बाणों से आहत, अग्नि से घिरे हुये चिता के धुएँ के विमानों द्वारा स्वर्ग को चले गए। ८॥

सीता—(विषाद के साथ) अत्यन्त करुण है। राक्षस कुल का विनाश सुनकर भी मेरा हृदय फटता है। क्या यह सब मेरे कारण ही है ?

त्रिजटा—यह सब विधि का विलास हैं। देवि ! देखो–लङ्का के द्वार पर–

दूर से घर्घर जैसे अत्यन्त भयानक शब्द से व्याप्त विशाल रथ पर बैठ कर लंकेश्वर रावण युद्धस्थल पर आ गया है।

सीता—उसके पीछे चलने वाली विकट राक्षसों की सेना को भी देख रही हूँ । स्वामी के शरीर का हर दशा में भगवान भूतेश्वर महादेव कल्याण करें।

त्रिजटा—आर्ये ! दूसरी ओर देखो—

एषोऽप्यार्यवरः करेण कलितं कोदण्डमास्फारयन् ।
दिव्योदात्तरथेन बानरगणै र्भ्रात्रान्वितः प्रस्थितः ॥९॥

सीता हा दैव ! दिष्ट्या वर्धामहे, दृष्ट एवार्यपुत्रः । पश्य, त्रिजटे ! पश्य, एषोऽसौ—

वने वियुक्तः स्वजनात् सुःदुखितः,
शरीरयष्ट्यापि कृशो धनुर्धरः ।
ज्वलन्निव क्षात्रबलेन वैरिणां,
दहन्निवातङ्कमसौ प्रतीयते ॥१०॥

त्रिजटा—सीते ! न केवलं प्रतीयते । दग्धएवातङ्कः । समाप्ता एवोग्रवादिनः सर्वे राक्षसाः । पश्य प्रवृत्तं युद्धम्—

शस्त्रैस्तोमरभिण्डपाल-परिघैः कुन्तैः शितै राक्षसा,
बाणै राघववाहिनीं सरभसं हन्तुं प्रवृत्ता रणे ।
वृक्षैः पर्वतपिण्डखण्डितशिरःस्फोटेन विस्फोटयन् ।
लङ्काकर्णमलङ्घ्यशक्तिसबलोऽसौ वानराणां गणः ॥११॥

सीता—अहो ! प्रवृत्तं युद्धम् ! जयनादेन सहैव सहसा रावणेनार्यपुत्रस्य रथो बाणैराच्छादितः । दिष्ट्या वर्धामहे क्षणनार्येण शरैश्छिन्नमाच्छादनम् ।

हाथ में शोभित कोदण्ड को ताने हुए दिव्य उद्यात्त रथ मे बैठे, वानरगण तथा भ्राता के साथ, उन आर्यवर (राम ने) भी प्रस्थान किया ॥९॥

सीता—हा दैव ! भाग्य से देख ही लिया आर्यपुत्र को ! देखो, त्रिजटा ! देखो—

बन में स्वजनों से वियुक्त, अत्यन्त दुःखित शरीर से दुर्बल होते हुए भी वे मानो क्षात्रबल से प्रज्वलित होते हुए शत्रुओं के आतङ्क को भस्म करते हुए से प्रतीत होते है ॥१०॥

त्रिजटा—सीते ! केवल प्रतीत ही नही होते हैं, आतङ्क को दग्ध ही कर दिया ! उग्रवादी सभी राक्षस समाप्त ही है । देखो युद्ध प्रारम्भ हो गया—

युद्ध में राक्षसगण तोमर, भिण्डपाल, परिघ तीक्ष्ण भाले और वाणों से सहसा राम की सेना को, और अलंघ्य शक्ति से बलवान वानरगण वृक्षों से तथा पर्वत खण्डों से खण्डित शिरों के स्फोट द्वारा लङ्का के कर्णो को फोड़ते हुए मारने लगे ॥११॥

सीता—अरे ! युद्ध प्रारम्भ हो गया । जय माद के साथ ही सहसा रावण ने आर्यपुत्र के रथ को वाणों से अच्छादित कर दिया । मेरा सौभाग्य है, क्षणभर में आर्य ने वाणों से आच्छादन छिन्न कर दिया ।

शरैः समन्तात् सहसावृतोऽसौ,
रथः क्षणं दृष्टिपथं न भेजे।
स्वतेजसा प्रज्वलितो विवस्वान्,
यथा क्वचिच्छ्यामघनैरुपेतः ॥१२॥

त्रिजटा—पश्य देवि! न केवलं छिन्नमाच्छादनं शितैः सायकै भँग्नो रथोऽपि, सहैव दशकण्ठ मनोरथेन।

हता अश्वा रथो भग्नः सारथिश्च निपातितः।
रामबाणैः सहैवाशु रावणस्य मनोरथैः ॥१३॥

सीता हा कष्टम्। दशकण्ठेन ब्रह्मशक्तिः संचोदिता—
वक्षसि प्रहतो रामो ज्वलता ब्रह्मतेजसा,
हा हतास्मि कथं स्वामी ब्रह्मशक्त्या समुद्धरेत् ॥१४॥

(इति मोहमुपगता)

त्रिजटा—समाश्वसिहि समाश्वसिहि भद्रे! पश्य ब्रह्मशक्त्या निपीडितः क्षणं मोहमुपगतः पुनः संज्ञामुपेतो राघवेन्द्रः।

सीता—(संज्ञामुपेत्य) आः! आर्यपुत्रो जीवनं धरति सत्यं मयि प्रसन्ना देवाः, सफलीभूता मे तपःसाधना।

वाणों से चारों ओर घिरा हुआ वह रथ क्षणभर के लिए दिखाई नही दिया जैसे अपने तेज से प्रज्वलित सूर्य कहीं पर श्यामघनों से घिरा हुआ दिखाई नहीं देता है है ॥१२॥

त्रिजटा—देखो देवि ! केवल आच्छादन ही छिन्न नहीं किया पैने वाणों से दशकण्ठ के मनोरथ के साथ ही रथ भी भग्न कर दिया।

राम के बाणों ने अश्व मार दिए, रावण के मनोरथ के साथ ही रथ भंग कर दिया और सारथी मार डाला ॥१३॥

सीता—हा कष्ट ! दशकण्ठ ने ब्रह्म-शक्ति का प्रयोग कर दिया—

हा मैं मरी ! जलते हुये ब्रह्म तेज से राम की छाती पर प्रहार किया गया है। ब्रह्मशक्ति से स्वामी की कैसे रक्षा हो ॥१४॥

(मोह को प्राप्त हो गयी)

त्रिजटा—आश्वस्त रहो भद्रे ! आश्वस्त रहो—देखो ब्रह्म शक्ति से निपीडित राघवेन्द्र क्षण भर बेहोश होकर पुनः होश में आ गये।

सीता—(होश में आकर) आह ! आर्यपुत्र जीवित हैं, सच ही देवता मुझ पर प्रसन्न हैं, मेरी तप साधना सफल हुई।

त्रिजटा—अहो किमेतत् ?

सहसा धूमलाभूता दिशो वाति प्रभञ्जनः ।
रुदन्त्यूर्ध्वमुखाः श्वानो, निर्मेघं व्योम गर्जति ।।१५।।

अहो कथमेते भयातुरा राक्षसा इतस्ततः पलायिताः ?

(नेपथ्ये)

रे रे रावणपालितास्त्रिभुवनातङ्कप्रदा राक्षसाः !
यूयं कुत्र भयादपास्य समरं त्रस्ताः समस्ता गताः ।
रामेणाद्य समग्रमानवमनः-प्रीत्यै प्रसज्यीकृतं ,
लोक-त्रास-विनाशनोद्यतमिदं ब्रह्मास्त्रमुज्जृम्भते ।।१६।।

सीता—अहो ! वत्सलक्ष्मणस्यैव शौर्यवचनानीमानि दिष्ट्या कर्णे पतितानि ।

त्रिजटा—सीते ! पश्य शक्त्याघातप्रकुपितेन राघवेणामोघमेतद् ब्रह्मास्त्रं संधानितम् । तन्निहतमेव जानीहि लङ्केश्वरम् । अहो ! कोदण्डमाकर्णीकृत्य मुक्तं ब्रह्मास्त्रम् पश्य—

ज्वलयन्निव दिग्भागान् ,
प्रस्फुटन्नशनि र्यथा ।

त्रिजटा—अरे ! यह क्या ?

सहसा दिशायें धूमल हो गयी । आँधी चलने लगी, श्वान मुँह उठाकर रोने लगे और बिना मेघ आकाश गर्जन करने लगा ।।१५।।

अरे यह भय से व्याकुल राक्षस इधर उधर क्यों भाग रहे हैं ?

(नेपथ्य में)

अरे रे ! त्रिभुवन को आंतक प्रदान करने वालों रावण द्वारा रक्षित राक्षसों ! तुम सब लोग युद्ध छोड़कर भय से डरे हुये कहां चले गये हो । आज समस्त मानव मन की प्रीति के लिये राम द्वारा धनुष पर चढ़ाया हुआ लोक का भय नाश करने के लिये उद्यत यह ब्रह्मास्त्र प्रज्वलित हो रहा हैं ।।१६।।

सीता—अहो ! वत्स लक्ष्मण के ही यह शौर्य वचन भाग्य से कानों में पड़ रहे हैं ।

त्रिजटा—सीते ! देखो शक्ति की चोट से कुपित राघव ने यह अमोघ ब्रह्मास्त्र संधान कर दिया है । तो लङ्केश्वर को मरा ही समझो । अहो ! धनुष को कान तक खीचकर ब्रह्मास्त्र छोड़ दिया । देखो—

दिशाओं को मानो जलाता हुआ, वज्र की भांति तड़पता हुआ, राक्षसेश्वर

विभिन्दन् निर्गतो बाणः,
पातयन् राक्षसेश्वरम् ॥१७॥

सीता—अहो ! अति दारुणं सम्वृत्तम्। असह्यमेतद् दर्शनम्। मुक्तास्म्यधुना राक्षसानां वन्धनात्। तदायाहि सखि ! समुत्कण्ठितं मे मनः स्वामिनश्चरणमाचुम्बितुम्।

त्रिजटा—पश्य राक्षसेन्द्रपतनेन सहैव युद्धविरामोजात स्वयं रथादवतीर्णो राघवेन्द्रः।

(नेपथ्ये)

क्वासि मातः ! क्व गतासि—

पूर्णप्रतिज्ञो रघुनन्दनोऽसौ,
हतो रणे रावणराक्षसेन्द्रः।
तदाज्ञयानेतुमितो हनूमान्,
सीतामहं सादरमागतोऽस्मि ॥१८॥

सीता—अहो ! हनुमान् मामाशोकमूले मार्गयति। तद् गच्छावः शीघ्रम्।

(इति निष्क्रान्ते)

को गिराता हुआ (हृदय) फाड़ता हुआ बाण निकल गया ॥१७॥

सीता—अहो ! अत्यन्त दारुण हो गया। यह असह्य दर्शन है। अब मैं राक्षसों के बंधन से मुक्त हो गयी। तो आओ सखि ! मेरा मन स्वामी के चरण चुम्बन के लिये उत्कण्ठित हो रहा है।

त्रिजटा—देखो, राक्षसेंद्र के पतन के साथ ही युद्ध विराम हो गया। स्वयं राघवेंद्र रथ मे उतर पड़े।

(नेपथ्य में)

कहां हो माता कहाँ गईं हो—

श्रीमान् राक्षवेंद्र ने प्रतिज्ञा पूर्ण कर दी, राक्षसेंद्र रावण युद्ध में मारा गया। उन्हीं की आज्ञा से मैं हनुमान सीता जी को लेने के लिये इधर आया हूँ ॥१॥

सीता—अहो ! हनुमान मुझे अशोक के पास खोज रहे हैं। तो शीघ्र चलें।

(दोनों चली गयी)

(ततः प्रविशति बाणाहतः पतितो रावणः)

रावणः—आः किमेतदापतितम् । प्रतापैश्वर्यसमृद्धं मत्सम्मुखे विनष्टं सकलमेव रक्षः कुलम् । शक्त्योपार्जितं दिग् व्याप्तं यशः सकलं धूलि-धूसरीभूतम् । क्व गतो भ्राता कुम्भकर्णः ? क्व गता मे भटा यूथपा राक्षसाः ? क्वासि पुत्र मेघनाद ? देहि मे प्रतिवचनम् । न कोऽपि, सर्वं विनाशितं गर्विते-नैश्वर्यमत्तेनानेन रावणेनैव । मयैव निष्ठुरेण सत्परामर्शः सदैव तिरस्कृतः । प्राणप्रिये मन्दोदरि ! त्वमपि तिरस्कृता । (दूरं विलोकयन्) कोऽसौ भ्राता मे विभीषणः ? आयाहि प्रियानुज ! किमद्यापि मद्वचनात् क्षुब्धोऽसि ? (विभीषणो रुदन् प्रविशति शिरोऽङ्के दधाति) कृतापराधस्तेऽयमग्रजः । वत्स ! मत्कारणात् सर्वं विनष्टम् (विभीषणो रोदिति) वत्स ! अल रोदनेन । प्रतिनिवृत्तोऽसि लङ्काम् । रक्षः कुलप्रतीकोऽसि । पश्येमामनाथां लङ्काम् । किमियं त्वयि नाथेऽप्यनाथा भवेत् । (पुनर्दूरं विलोक्य) अहो रामभद्र ! आर्यधुरीण ! कथमद्यापि रावणस्ते कृतापराधः शत्रुरेव (रामः सुग्रीवेण लक्ष्मणेन च सह प्रविशति) मदोद्धतस्येदं लङ्केश्वरस्य प्रायश्चितम् । राम ! विभीषणं स्वभ्रातरं लङ्काराज्येऽभिषेचयामि । (इति रक्तेन तिलकं करोति)

(वाण से आहत गिरे हुये रावण का प्रवेश)

रावण—आह ! यह क्या हो गया ? प्रताप-ऐश्वर्य से समृद्ध समस्त राक्षस कुल मेरे सामने नष्ट हो गया । शक्ति से उपार्जित दिग्व्यापी समस्त यश धूलिधूसरित हो गया । भाई कुम्भकर्ण कहाँ चला गया ? कहाँ गये मेरे भट-यूथप राक्षस ? कहाँ हो पुत्र मेघनाद ! मुझे उत्तर दो । कोई नही रहा, गर्वित-ऐश्वर्य-मत्त इस रावण ने ही सब नष्ट कर दिया । मुझ निष्ठुर ने ही सत्परामर्श सदा ठुकराया । प्राण प्रिये मंदोदरी ! तुम्हे भी तिरस्कृत किया (दूर देखते हुये) कौन ? यह मेरा भाई विभीषण ? आओ प्रिय अनुज ! क्या आज भी मेरे वचन से क्षुब्ध हो ? (विभीषण रोता हुआ प्रवेश करता है और सिर गोद में रख लेता है) तुम्हारा यह अग्रज अपराधी है। वत्स ! मेरे कारण सब नष्ट हो गया । (विभीषण रोता है) वत्स ! रोओ मत । लङ्का में वापस लौट आये हो राक्षसकुल के प्रतीक हो । इस अनाथ लङ्का को देखो, क्या यह तुम्हारे नाथ रहने पर भी अनाथ हो जाये ? (पुनः दूर देख कर) अरे राम भद्र ! आर्य धुरीण ! क्या आज भी रावण तुम्हारा अपराधी शत्रु ही है (राम सुग्रीव, लक्ष्मण के साथ प्रवेश करते हैं) मदोद्धत लङ्केश्वर का यह प्रायश्चित है । राम ! अपने भाई विभीषण को मैं लङ्का राज्य पर अभिषिक्त करता हूँ (रक्त से तिलक करता है)

रामः—राक्षसेश्वर ! तवानुतापाश्रुभिः सहैव सर्वं गलित शत्रुत्वम् । रामस्तु मानवधर्म - रक्षणे कृतव्रतः सकल जनमङ्गलमीहते काङ्क्षते तत्कृते तवापि सद्वचनम् ।

रावणः—कौशलेन्द्र ! चतुर्वेदान् षट् शास्त्राणि चाधीत्यैव रावणोऽयं दशकण्ठो जातः । तवैतत् ते लोकमङ्गलाभियानं न मेऽपरिचितमासीत् तथाप्य-हङ्कारबुद्ध्या मया न स्वीकृतम् । सर्वत्र च विरुद्धे स्थितम् । तद् राम ! श्रुयताम्—

अधीतान्यपि शास्त्राणि बुद्धे वैंदग्ध्यमेव च ।
अहङ्कारमतेः सर्वं सर्वथा निष्फलं भवेत् ॥१६॥

रामः—पण्डित प्रवर ! व्यपदेशेनोपदिष्टा वयम् कृतार्थीभूताः स्मः ।

रावणः—मरणासन्नस्य मे कीदृशान्युपदेशवचनानि तथापि जीवन-स्येमान्यनुभववाक्यानि । तद् यथा—

नीतिः सिद्धान्तहीना श्रमरहितधनं चान्तरात्मस्वरं वै ,
हत्वावाप्तं सुखं चेज्जगति बहुविधं निष्फल तत्तथैव ।
विज्ञानं मानवत्वाद् रहितमिह यथाऽनैतिक वृत्ति कार्यं,
पूजात्यागं विना सच्चरित-विरहितं ज्ञानमेव वृथैव ॥२०॥

राम—राक्षसेश्वर ! तुम्हारे पश्चात्ताप के अश्रुओं के साथ ही सम्पूर्ण शत्रुत्व बह गया । मानव धर्मरक्षा के लिए कृत संकल्प राम तो समस्त जन का मंगल चाहता हैं और उस के लिए तुम्हारा भी सद्वचन चाहता है ।

रावण—कौशलेन्द्र ! चारवेद और ६ शास्त्रों को पढ़कर ही यह रावण दशकण्ठ हुआ । तुम्हारा यह लोकमङ्गलाभियान मुझसे अपरिचित नही था तथापि अहङ्कार बुद्धि से मैंने स्वीकार नही किया और सर्वत्र विरोध किया । तो राम ! सुनिए—

पढ़े हुए शास्त्र और बुद्धि का वैदग्ध्य यह सब अहंकार-बुद्धि वाले पुरुष का सर्वथा निष्फल हो जाता है ॥१६॥

राम—पण्डितप्रवर ! इस बहाने हम लोगों को उपदेश दे दिया । हम सब कृतार्थ हुए ।

रावण—मरणासन्न मेरे कैसे उपदेशवचन तथापि जीवन के यह अनुभव वाक्य है—

सिद्धान्त हीन नीति, श्रम रहित धन, अंतरात्मा की आवाज को मारकर प्राप्त किया बहु प्रकार का सुख संसार में उसी प्रकार निष्फल हैं जिस प्रकार मानवता रहित विज्ञान, अनैतिक वृत्ति कार्य, त्याग रहित पूजा और सच्चारित्र के बिना ज्ञान व्यर्थ है ॥२०॥

रामः—अनेनैव बहूपदिष्टम् ।

(ततः प्रविशति हनुमता सह जानकी सीता)

रावणः—अहो ! सीता प्राप्ता । राम ! अस्ति किञ्चिदन्यदपि कथनीयम्, मृत्युसाक्ष्यवचनम् तद् यथा—

गर्वितेन मया सीता हृताद्यापि पतिव्रता ।
सादरं स्वीकारोत्वार्यो मा कश्चित् तां कलङ्कयेत् ॥२१॥

रामः—(सीतां निरूपयन्) देवि ! कृतापराधोऽस्त्यसौ ते रामः क्षमस्वैनम् ।

सीता—(पादयो निपतन्ती) स्वीकृतास्म्यार्यपुत्रेणेति सर्वं विगलितं मे कष्टम् (रामः बहुमानमुत्थापयति)

रावणः—कृतार्थोऽस्मि । न मेऽवशिष्टं हृदयेऽवसादपरिदेवनम् ।
(नेपथ्ये कोलाहलः)

"इत इतः स्वामिनी"

"हा प्राणनाथ ! देहि मे प्रतिवचनम्"

राम.—मन्ये शोकव्याकुलाः परिजना इत एवाभिवर्तन्ते । तद् विभीषण ! नीयतां राक्षसेन्द्रम् ।

राम—इससे ही बहुत उपदेश दे दिया

(तभी हनुमान के साथ सीता का प्रवेश)

रावण—अहो सीता आ गई । राम ! कुछ अन्य भी मृत्यु साक्ष्यवचन कहना है, वह इस प्रकार—

मुझ गर्वित द्वारा हरी गई सीता आज भी पतिव्रता है, आर्य उसे आदर के साथ स्वीकार करे कोई उसे कलङ्कित न करे ॥२१॥

राम— (सीता को देखते हुए) देवि ! यह राम तुम्हारा अपराधी है इसे क्षमा कर दें ।

सीता— (पैरों पर गिरती हुई) आर्यपुत्र ने स्वीकार किया इसी से मेरा सारा कष्ट गल गया । (राम आदर के साथ उठाते है)

रावण—मैं कृतार्थ हुआ, मेरे हृदय में दुःख की व्यथा नहीं रही ।
(नेपथ्य मे कोलाहल)

" स्वामिनी इधर आइए"

" हा प्राणनाथ ! मुझे उत्तर दो"

राम—लगता है शोकव्याकुल परिजन इधर ही आ रहे हैं अतः विभीषण ! लङ्केश्वर को ले जाइए ।

विभीषणः -यथाज्ञापयति महोदयः ।

(विभीषणः मरणासन्न-लङ्केश्वरेण सह निष्क्रान्तः)

रामः—आर्य सुग्रीव ! सैन्य-परावर्तनस्य व्यवस्था विधेया । अतस्तात ! यूथपाः यथोचितं निर्दिष्टव्याः ।

सुग्रीवः—यथाज्ञापयति महानुभावः (इति निष्क्रान्तः)

रामः—वत्स ! लक्ष्मण ! यथा बनवासदिवसाः समाप्तप्रायाः । अयोध्यानिवर्तन-प्रबन्धेन संसूचय तात ! विभीषणम् ।

लक्ष्मणः—यथाज्ञापयति भ्राता । (निष्क्रान्तः)

रामः—(सीतां प्रति) प्रिये ! जनहिते जीवनस्य कीदृशी परिणतिः ।

सर्वमेवानुभूतं वै त्वया सीते ! तथा मया ।
विषमं कण्टकाकीर्णं लोकनिर्माणदर्शनम् ॥२२॥

सीता—नाथ ! कीदृशं ते लोकनिर्माणदर्शनं मया न ज्ञायते । मया तु केवलं विषमं कण्टकाकीर्णं जीवनमेवानुभूतम् ।

रामः—प्रिये ! कीदृशीयं नियतिः ? पश्य सीते !

स्वर्गतुल्ये गृहे वासो मां विना नोररीकृतः ।
दैवेनैकाकिनीं वस्तुं राक्षसैः विवशीकृता ॥२३॥

विभीषण—जो आज्ञा महोदय !

(विभीषण मरणासन्न रावण के साथ चला जाता है)

राम—आर्य सुग्रीव ! सेना की वापसी की व्यवस्था करनी है अत. यूथपों को यथोचित निर्देश दे दें ।

सुग्रीव—जो आज्ञा महानुभाव (चले गये)

राम—वत्स लक्ष्मण ! जैसा कि वनवास के दिन समाप्त ही है अतः अयोध्या वापसी के प्रबन्ध के लिए विभीषण को सूचना दो ।

लक्ष्मण—भाई की जो आज्ञा (चले गए)

राम—(सीता के प्रति) प्रिये ! जनहित में जीवन की कैसी परिणति हुई ?

सीता ! तुमने और मैंने विषम कण्टकाकीर्ण समस्त लोक निर्माण के दर्शन का अनुभव किया है ॥२२॥

सीता—नाथ ! कैसा तुम्हारा लोक निर्माण दर्शन है मैं नहीं जानती हूँ मैंने तो विषम कण्टकाकीर्ण जीवन का ही अनुभव किया है ।

राम—प्रिये कैसा है यह भाग्य ! देखो सीता —

तुमने मेरे बिना स्वर्गतुल्य गृह मे वास स्वीकार नहीं किया पर दैव ने राक्षसों के साथ अकेले रहने के लिए विवश कर दिया ॥२३॥

सीता—आर्यनारीजीवनदर्शनमिदम् । यथा—

स्वामिपरायण-नार्या विपिननिवासोऽप्यसौ परीक्षैव ।
आसीदग्नि-परीक्षा लङ्कायामार्यनार्या वै ॥२४॥

रामः—प्रिये ! दैवेन यत्कृतं वरमेव तत् । अन्यथा कथमेष धर्म-समन्वयः सम्भाव्यते । कथं वा रावणातङ्केन लोकरक्षा सम्भवामीत ।

सीता—नाथ ! सर्वमेवोचितमेव जातम् । परं जीवने सीतया बहु विसोढम् । इदानीं तु—

बनवासेन चानेन लङ्कावासेन निश्चितम् ।
सीता वज्रमयी जाता जीवितुं विजनेऽप्यसौ ॥२५॥

रामः—प्राण प्रिये ! कथं नामाधुना ते पुनर्वनवास प्रसङ्गः ।

असह्य दुःखै र्विपिनेऽत्र रक्षः—
पुरे निवासव्यथयार्दितायाः ।
तपोऽभिपूतं हृदयं मदीयं,
निवासयोग्यं ननु केवलं ते ॥२६॥

(इति हृदयेनालिङ्गति)

सीता—आर्यपुत्र ! अचिन्तितान्यपि नियतेश्चरितानि को नाम ज्ञातुं समर्थः ?

सीता—यह आर्य नारी का जीवन दर्शन है—

स्वामीपरायणा नारी का वह बनवास परीक्षा ही था और लङ्का में निश्चय ही आर्य नारी की अग्नि परीक्षा थी ॥२४॥

राम—प्रिये ! दैव ने जो किया वह अच्छा ही था, अन्यथा कैसे यह धर्म समन्वय सम्भव होता और कैसे रावण के आतङ्क से लोक रक्षा सम्भव थी ।

सीता—नाथ ! सब उचित ही हुआ परन्तु जीवन में सीता ने बहुत सहा है । अब तो—

बनवास से और लङ्कावास से निश्चित ही यह सीता निर्जन वन में भी जीवित रहने के लिए वज्रमयी हो गयी है ॥२५॥

राम—प्राण प्रिये ! अब पुनः बनवास का कैसा प्रसंग—

वन में असह्य दुःख और यहाँ राक्षसों के नगर में निवास की व्यथा से व्याकुल तुम्हारे निवास के योग्य, निश्चय ही तप से पवित्र केवल मेरा हृदय है ॥२६॥

(हृदय से लगाते हैं)

सीता—आर्यपत्र ! अचिन्तनीय भी नियति के चरित्र कौन जान सकता है ।

लक्ष्मणः—(प्रविश्य विभीषणेन सह) आर्य ! पुष्पकं नामैतद् विमानमयोध्यागमनार्थं विभीषणादेशेन सज्जीकृतं वर्तते ।

विभीषणः—आरोहणेनानुगृह्णन्तु श्रीमन्तः ।

रामः—अनुगृहीता वयमनेन । यतः—

मत्प्रतीक्षातुरं तत्र भरतं द्रष्टुमुत्सुकम् ।
मनो मे व्याकुलीभूतमयोध्यागमनं प्रति ।।२७।।

विभीषणः -आरोहन्तु नामार्याः ।

(सर्वे समारोहन्ति)

रामः—विभीषण ! लङ्कातो गच्छतो ममेदानीमयं संदेशः —

जनाय लङ्कानगराधिवासिने ,
विधूतहिंसा-कलुषाय मानिने ।
समानधर्म-व्यवसायबन्धुता- ,
समृद्धये स्नेह-समादरं मम ।।२८।।

विभीषणः—कृतार्थाः खलु वयं लङ्कावासिनः ।

रामः—समादिशतु नाम विमानं समुद्रमुल्लङ्घयितुम् ।

विभीषणः—यथाज्ञापयत्यार्यवरः (संचालनं नाट्यन्) आर्य ! चालकैः संचालितमिदं भूतलमुत्सृज्य भूधराणामुपरि वर्ततेऽधुना पुष्पकम् ।

लक्ष्मण—(विभीषण के साथ प्रवेश करके) आर्य ! पुष्पक नामक विमान अयोध्या जाने के लिए विभीषण के आदेश से तैयार खड़ा है ।

विभीषण—श्रीमान आरोहण करके अनुगृहीत करें ।

राम—हम इससे अनुगृहीत हुये क्योंकि—

वहां मेरी प्रतीक्षा में व्याकुल भरत को देखने के लिए उत्सुक मेरा मन अयोध्या जाने के लिए व्याकुल है ।।२७।।

विभीषण—आर्य आरोहण करें ।

(सब आरोहण करते हैं)

राम—विभीषण ! लङ्का से जाते हुए मेरा इस समय यह सन्देश है :—

हिंसा के कलुष से मुक्त, सम्मानित लङ्कानगर निवासीजनों के लिए, समान धर्म और व्यवसाय पर आधारित बन्धुता की समृद्धि के लिए मेरा स्नेह और आदर है ।।२८।।

विभीषण - हम लङ्कावासी कृतार्थ हुए ।

राम—समुद्र पार जाने के लिए विमान को आदेश दें ।

विभीषण—आर्यवर जैसा आदेश देते हैं । (संचालन का अभिनय) आर्य ! चालकों द्वारा संचालित यह पुष्पक अब भूतल को छोड़कर पर्वतों के ऊपर पहुँच गया है ।

रामः—अहो ! वयमधुना सागरोपरि वर्तामहे । सीते ! पश्य—

वानरै र्निमितं सेतुस्थापत्यं सागरोपरि ।
लङ्काभारतमध्यस्थ दृश्यते सूत्रबन्धनम् ।।२८।।

हनुमान्—आर्य ! यानगति-वेगेन पृष्ठे गतं विस्तृतं सागरक्षेत्रम् । सम्मुखे सागरपुलिन-परिसरः परिदृश्यते ।

रामः—सीते ! सम्मुख एव सेतुबन्धनसमये प्रतिष्ठापितं महादेवायतनं दृश्यते । विभीषण ! तदत्र देवायतनेऽवारयन्तु पुष्पकं यतोऽस्माभिः पूजनीयोऽसौ महादेवः ।

विभीषणः—आर्य ! यथाज्ञापयति । सरलावतारेऽत्र पुलिनपरिसरे ऽवतीर्णं पुष्पकम् ।

(सर्वेऽवतरणं नाटयन्ति)

रामः—अहो ! प्राप्ता वयं देवायतनम् । सम्मुख एव प्रतिष्ठितोऽयं भगवान् वामदेवो विद्यते ।

(सर्वे प्रणमन्ति)

विभीणणः—आर्य राघवेन्द्र ! अयमेवास्माकं परं दैवतम् ।

रामः—विभीषण ! स्यान्नामासौ कदाचिदनार्याणामादिदेवः ।

राम—अरे ! हम लोग अब समुद्र के ऊपर हैं सीता ! देखो—

वानरों द्वारा समुद्र पर निर्मित सेतु की स्थापत्य कला, लङ्का और भारत के मध्य सूत्र-बन्धन सी दिखाई देती हैं ।।२८।।

हनुमान्—आर्य ! यान की गति की तीव्रता से विस्तृत सागर क्षेत्र पीछे चला गया । सामने समुद्र तट का परिसर दिखाई देता है ।

राम · सीता ! सामने ही सेतु बन्धन के समय प्रतिष्ठापित महादेव का मन्दिर दिखाई दे रहा है । विभीषण ! तो यहीं देवायतन में पुष्पक को उतार दें क्योंकि हम लोग महादेव की पूजा करेगें ।

विभीषण आर्य ! जैसी आज्ञा देते हैं। उतरने में सरल इस तटवर्ती प्रदेश में पुष्पक उतर गया ।

(सब उतरते हैं)

राम—अहो ! हम लोग देव मन्दिर में पहुच गये । सामने ही प्रतिष्ठित भगवान् वामदेव विद्यमान हैं ।

(सब प्रणाम करते है ।)

विभीषण - आर्य राघवेन्द्र ! यही हम लोगों के परम देवता हैं ।

राम विभीषण ! कभी यह अनार्यों के आदिदेव रहे हों । आर्यो ने प्रथम

आर्यैरेष प्रथमं दौर्वात्य:, स्तेनानांपति: स्तायूनां पतिस्तस्कराणां पतिरिति विशेषणै: समाहृत: । परं शनै: शनैरसौ शिव: शिवतर: शङ्कर इति विशेषणै र्विभूषितो देवानां महादेवो जात: । अधुना त्वसौ —

द्वन्द्वातीत: मम: शान्तो लोकमङ्गलकारक: ।
आर्याणां चाप्यनार्याणां रक्षसां सुप्रतिष्ठित: ।।३०।।

सीता—प्रणम्यतेऽसौ महादेव आशुतोष: ।

राम:—विभीषण ! लङ्काभिनानेऽसौ प्रथमं प्रतिष्ठित:, पूजितश्च सर्वसिद्धिकरो जात: । यत: —

अस्यानुग्रहतो समुद्रसलिले सेतुर्निबद्धो मया ,
लङ्काया: समरे त्रिलोकविजयी रक्षो हतो रावण: ।
देवस्यास्य कृपा विभूतिवदियं प्राप्ता पुनर्जानकी ,
कृत्वा नामतरीमिहास्य च मया तीर्ण: प्रतिज्ञोदधि: ।।३१।।

हनुमान्—तदार्यमहोदयेन प्रतिष्ठित: सर्वसिद्धिप्रदोऽसौ सेतुबन्धे महादेवो "रामेश्वरे" इति नाम्ना ख्यायताम् !

राम:—उचितमेव हनुमन् ! सत्यमेवायं रामेश्वर: ।

तो दौर्वात्य, चोरों के स्वामी, ठगों के पति, तस्करों के मालिक, जैसे विशेषण दिए परन्तु शनै: शनै: इनको शिव, शिवतर, शङ्कर जैसे विशेषण ने भूषित करते हुए देवों के महादेव बना दिया । अब तो यह —

द्वन्द्वातीत, सम, शान्त लोकमङ्गल कारक होते हुए आर्य अनार्य और राक्षसों में सुप्रतिष्ठित है ।।२६।।

सीता—आशुतोष महादेव को प्रणाम करती हूं ।

राम—विभीषण ! लङ्का अभियान में यह प्रथम प्रतिष्ठित और पूजित सर्व सिद्धिकारक हो गए । क्योंकि—

इनके अनुग्रह से समुद्र के जल में मैंने सेतु बना दिया । लङ्का के युद्ध में त्रिलोक-विजयी रावण मार डाला । इस देवता की कृपा विभूति के समान जानकी को पुन: प्राप्त कर लिया और यहाँ इनके नाम की नौका बनाकर मैंने प्रतिज्ञा का सागर पार कर लिया ।।३०।।

हनुमान—तो सेतु बन्धन पर आर्य महोदय के द्वारा प्रतिष्ठित सर्वसिद्धिप्रद यह महादेव 'रामेश्वर' इस नाम से विख्यात हों ।

राम—उचित ही है हनुमान ! सत्य ही यह रामेश्वर है—

. . . .

आस्तामेष तथाख्यातो दक्षिणोत्तरवर्तिनाम् ।
समन्वय-प्रतीकोऽपि जनानां धर्मदर्शने ॥३२॥

विभीषण:—आर्यवर ! एष एव धर्मसेतुः । यतः—

आर्याणां वानराणां च राक्षसानां च संस्कृतेः ।
सेतुबन्धे स्थितो देवः स्वयं सेतुरभूदसौ ॥३३॥

लक्ष्मणः—(दूरं विलोकयन्) अहो ! दक्षिणापथे संस्कृतिसेतुरसौ महर्षिरगस्त्य इत एवाभिवर्तते ।

रामः—(विलोक्य) सुखदेऽस्मिन् क्षणे महर्षेः समागमः परमानन्द जनको जातः ।

(ततः प्रविशति महर्षिरगस्त्यः सर्वे, वदन्ते)

अहो ! स्वागतमार्यमहर्षेः । एष ते कृपाकाङ्क्षी रामः सादरं प्रणमति ।

अगस्त्यः—वर्धतां विश्व-बन्धुत्वं लोकधर्मः समेधताम्
जयत्वार्यवरो रामो प्रजामङ्गल-कारकः ॥३४॥

रामः—सीते ! वन्दनीया खलु महर्षयः ।

सीता—वन्दते भगवन्तमेषा जानकी ।

दक्षिण और उत्तरदेश निवासी जनों के धर्मदर्शन में समन्वय के भी प्रतीक यह इसी नाम से विख्यात हों ॥३१॥

विभीषण आर्यवर ! यही धर्म के सेतु हैं, क्योकि—

सेतु वन्ध पर स्थित यह देव, आर्य, वानर और राक्षसों की संस्कृति के स्वयं सेतु हो गए है ॥३२॥

लक्ष्मण— (दूर देखते हुए) अरे ! दक्षिणापथ में संस्कृति के सेतु यह महर्षि अगस्त्य इधर ही आ रहे हैं ।

राम—इस सुखद अवसर पर महर्षि का आगमन परम आनंदजनक हैं ।

(महर्षि अगस्त्य का प्रवेश, सभी वन्दना करते है)

अहो ! आर्य महर्षि का स्वागत है । यह आपका कृपाकांक्षी राम सादर प्रणाम करता है ।

अगस्त्य—विश्व बंधुत्व की वृद्धि हो लोक धर्म बढ़े ।
और प्रजा मंगलकारक आर्यवर राम की जय हो । ॥३४॥

राम—सीता ! आर्य महर्षि को प्रणाम करो ।

सीता—यह जनकपुत्री श्रीमान को प्रणाम करती हैं ।

अगस्त्यः—सौभाग्येन वर्धतां देवि !
लोकत्राणे महत् कष्टमनुभूयापि जानकि !
आर्यनारीचरित्रस्य प्रस्तुतं मार्गदर्शनम् ॥३५॥

सीता—कृतार्थीकृतासौ जानकी श्रीमतामनुग्रहेण ।

रामः—आर्यमहर्षे ! भवत्कृपया पूर्णप्रतिज्ञोऽस्मि जातः-
रावणो निहतः संख्ये सुग्रीवश्च विभीषणः ।
आर्यमैत्रीमुपेत्यैतौ संजातौ लोकरक्षकौ ॥३६॥

अगस्त्यः—अत्रेदानीं दक्षिणे विहितः सर्वत्र संस्कृतिसमन्वयः ।

रामः—कृतार्था वयं स्मः । तदत्र वन्दनीयः सर्वैं रामेश्वरः शङ्करः ।

सर्वे—(कृताञ्जलयः पठन्ति)
शिवोऽयं विश्वात्मा त्रिगुणपरमेशः पशुपतिः,
निहन्तासौ धाता स्वयमपि विधाता च जगताम् ।
सुराणामुद्धर्ताऽप्यसुरनररक्षः-शरणदः,
पुराणोऽप्यार्याणां जयति विषमे शूलहरणः ॥३७॥

(सर्वे स्तुवन्ति)

अगस्त्य—देवि ! सौभाग्य की वृद्धि हों ।

जानकी ! लोकरक्षा में महान कष्ट का अनुभव करके भी, आर्यनारी चरित्र का मार्ग दर्शन प्रस्तुत किया ॥३५॥

सीता—श्रीमान् के अनुग्रह से जानकी कृतार्थ हुई ।

राम—आर्य महर्षि ! आपकी कृपा से मेरी प्रतिज्ञा पूर्ण हुई ।

युद्ध में रावण मारा गया और सुग्रीव तथा विभीषण आर्यों की मैत्री प्राप्त करके लोकरक्षक बन गये ॥३६॥

अगत्स्य—अब यहां दक्षिण में सर्वत्र संस्कृति का समन्वय पूर्ण कर दिया है ।

राम—हम कृतार्थ हुये । तो यहां सब को शङ्कर की वन्दना करनी चाहिये ।

सब लोग—(अञ्जलि बांध कर पढ़ते हैं । (शिवोऽय······)

यह शिव हैं, विश्वात्मा पशुपति और त्रिगुण के परमईश हैं । यह स्वयं जगत के विनाशक पालक और निर्माता हैं । यह देवताओं का उद्धार करने वाले होते भी असुर, नर और राक्षसों के शरणदाता हैं । प्राचीन होते हुये भी आर्यो की कठिनाई में शूल को हरण करने वाले हैं, इनकी जय हो ॥३६॥

(सब स्तुति करते हैं)

अगस्त्यः--किमतः परं ते प्रियं विधास्यामि ।

रामः—महर्षे ! अतः परमपि प्रियं चेदस्तु भरतवाक्यमिदम्—

शश्वल्लोकहिते समन्वयपराः सद्धर्म-नीतिप्रदाः,
नेतारः परिपालयन्तु जनतां वै लोकतन्त्रे स्थिताः ।
भूयाच्छस्यसमृद्धि-वृद्धिसुखदा विश्वम्भरा श्रेयसे,
वाणीयं प्रतिभासिता च सुकवेः कुर्याज्-जगन्मङ्गलम् ।।३८।।

(इति निष्क्रान्ताः सर्वे)

समाप्तोऽयं दशमोऽङ्कः

इति समाप्तमिदं सेतुबन्धम्

अगस्त्य—इससे अधिक आपका क्या प्रिय करूँ ।

राम—महर्षि ! इससे भी प्रिय यदि कुछ है तो यह भरत वाक्य हो । निरन्तर लोक हित और समन्वय में संलग्न, सद्धर्म और न्याय देने वाले लोकतंत्र में स्थित नेता गण जनता का पालन करें । शस्य समृद्धि की वृद्धि से सुखद विश्वम्भरा (पृथ्वी) कल्याण करने के लिये हो और यह सुकवि की प्रतिभासित वाणी जगत् का मंगल करे ।।३८।।

(सब जाते हैं)

दशम अङ्क समाप्त

सेतुबन्ध समाप्त

बलभद्रप्रसाद शास्त्री, गोस्वामी

जन्म स्थान—सकाहा, हरदोई।

शिक्षा— संस्कृत में एम० ए० प्रथम श्रेणी मैरिट के साथ,
साहित्याचार्य, साहित्यरत्न
शिक्षा विभाग में १२ वर्ष का अध्यापन अनुभव।

सम्प्रति—उ० प्र० शासन में ग्राम्य विकास विभाग में द्वितीय श्रेणी के राजपत्रित अधिकारी (खन्ड विकास अधिकारी)

रचनाएँ–१–नेहरूयशःसौरभम् (महाकाव्य) जिस पर उ० प्र० सरकार से ५०००) का 'कालिदास पुरस्कार' मिला

२–चक्रव्यूहम् (खण्ड काव्य)

३–सेतुबन्धम् (नाटक)
तीनों ही पुस्तकें हरियाणा सरकार द्वारा अखिल भारतीय 'गीता पुरस्कार' से पुरस्कृत हुई।